S.K.M 104/89(g)

श्री धरस्वामी कृता भावार्थ दीपिका टीका

भागवत "सप्तम स्कंध"

समय १८३७ 1780 ई०

पत्र ६७ (67)

॥ श्रीमद्भागवतपत्राणि ६७

॥ सप्तमस्कंध पत्राणि ६७ ॥

॥ पुस्तकस्वामिडीश्रीचैतन्य ॥
॥ दासडीको शुभं मंगलं ॥

भा० स०
१

॥श्रीगणेशायनमः॥श्रीरामायनमः॥ स्वभक्तपक्षपातेनतद्विपक्षविदारणं। श्रीनृसिंहमद्भुतंवंदेपरमानंदविग्रहं॥१॥ऊतिः पंचदशाध्यायैः॥सप्तमेवर्ण्यतेधुना॥ऊतयःकर्मवासनायोजातास्तत्कर्मानुसारणीः॥२॥असद्भिश्चसद्भिश्चेतिद्विधासाहेतुरुच्यते॥अ सतांमहतांकोपात्सतांमहदनुग्रहात॥३॥हरिद्वेषप्रयोज्यायांदैत्यकूटेष्वसत्स्वपिः। चतुःसनरुषाविद्धेष्वस्मिनसद्वासना॥४॥यथा हिरण्यगर्भेपिप्रह्लादस्यमतिस्थिरा: नारदानुग्रहात्तस्यविष्णोःसद्भक्तिवासना॥५॥स्वभक्तंचसदाविष्णुर्द्विषंतमपिरक्षति। तृ तीयेथनवेवासस्यैवकारोद्दामसत्पुनः॥६॥अतोमनीषिणायत्नकार्योमहदनुग्रहे। इत्येतदर्थमूतीनामवलक्षणमुच्यते। तत्रादौ

॥श्रीराजोवाच॥ समःप्रियःसुहृद्ब्रह्मन्भूतानांभगवान्स्वयं॥इंद्रस्यार्थेकथंदैत्यानवधीद्विषमोयथा॥१॥नह्यस्यार्थःसुरगणैःसाक्षान्निःश्रेयसात्मनः॥नैवासुरेभ्योविद्वेषोनोद्वेगश्चागुणस्यहि॥२॥

दशाभिर्दैत्यमत्तपुत्रमतिर्नेदितः॥महत्कोपानुकंपोत्थवासनात्नेदमुच्यते॥७॥सद्वासनाचयुद्धेपेतकर्मभिः शुद्धचेतसः प रैस्तुपंचभिस्तस्मात्क्रियतेधर्मनिर्णयः॥८॥तत्रतुप्रथमेध्यायेहिरण्यकश्यपोःसुतेः॥विष्णुभक्तेविरोधस्तुविवक्षार्थमुदी र्यते॥१०॥यदुक्तंपूर्वस्कंधांतेहतपुत्रादितिःशक्रपार्ष्णिग्राहेणविष्णुना। मन्युनाशोकदीप्तेनज्वलंतीपर्यचिंतयदिति तच्छ्रुत्वाविस्मितःपरीक्षित्तत्पृच्छति॥समइति त्रिभिः। नहिसमस्यसुहृदःस्वदेवेषुमध्येनामास्तिनचप्रियस्यप्रीतिकर्तृषुवैष म्यंयुक्तमित्यर्थः॥किंचयस्यस्वयंश्रेयोनंतंनिःश्रेयसततपक्षपातीभवतियेभ्योबिभेतितान्द्विषेण्हंतिनत्वतद्गाणास्तीत्याह नि त्रिः॥श्रेयसपरमानंदएवात्मास्वरूपंयस्यस्वगुणस्यश्चोद्वेगोभवोनास्ति।अतोविद्वेषोपिनास्त्येवतत्रहेतुः॥अगुणस्येतिः॥२॥

१

तदेवं मायागुणवशेनैव देवैषम्यं न स्वाभाविकमित्युक्तं तर्हि गुणपारतंत्र्याद्दीनीश्वरत्वमाशंक्याह । यदात्मनो जीवस्यात्मोपाधिपुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति । तदात्मोपाधिना स्वीयेन रजः । पृथक् सृजति विचित्रासु तासु पुरीषु रिरंसुः । क्रीडितुमिच्छुः सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति १० यदा सिसृक्षुरित्यादिनिर्दिष्टात् । अतीतकालपारतंत्र्यं परिहरन् प्रधानपुरुषपारतंत्र्यमपि वारयति । कालमिति हे । नरदेव प्रधानपुंभ्यां निमित्ताभ्यां सत्यकृतः । अमोघकर्ता ईश्वरस्तयोः सहकारित्वेनाश्रयं तं चरन्तं । वर्तमानकालस्तयमेव सृजति । स्वचेष्टारूपत्वात् कालस्य न पारतंत्र्यमित्यर्थः ॥ तथापि वस्तुतः किमापातत आह । य एष काल । सत्त्वमेधयति । अतो हेतोः ई-

यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया सत्त्वं विचित्रासु रिरंसुरीश्वरः ॥ शयिष्यमाणस्तम ईरयत्यसौ कालं चरन्तं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृतः ॥ १० ॥ य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ॥ ११ ॥ अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ॥ प्रीत्या महाक्रतौ राजन् पृच्छते जातशत्रवे ॥ १२ ॥ दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ । वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥ १४ ॥ तत्रासीनं सुरऋषिं राजा पांडुसुतः क्रतौ ॥ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं ॥ १५ ॥ युधिष्ठिर उवाच ॥ अहो अत्यद्भुतं ह्येतद् दुर्लभैकांतिनामपि ॥ वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १६ ॥ एतद्वेदितुमिच्छामि सर्व एव वयं मुने । भगवन्निंदया वेनो द्विजैस्तमसि पातितः ॥ १७ ॥

सतापि ईश्वरोपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीवेत्यर्थः ॥ ११ तत्प्रत्यनीकान् सुरपतिपक्षान् प्रमिणोति हीनस्त्रीवेत्यन्वयः । नुरुश्रवः कीर्तिर्यस्य सः कालिंशति महाप्रभुनिमितः । गुणागतः वैषम्यं स्थानिधिमात्रेण तद्विधिरंतरस्फुरतीति प्रकरणार्थः १२ इदानीं तयोर्वधेन सुरपक्षपातो नाकिंतु ब्रह्मशापेनासुरीयोर्जयोरनुग्रह इत्यर्थः । एवं तत्वतं मितिहासमुपक्षिपति अत्रैवेति द्विषादिरहितस्यापि चैद्यस्य वधे चेदिस्वन्नतुजः शिशुपालस्य १३ ॥ १४ । एकांतनक्तानामपि दुर्लभा प्राप्ति विद्वेषो जातेत्यद्भुतं हि ॥ १५ ॥

श्रीनारायणस्य गुणान् ॥ अनुग्रहदृष्टिगुह्यादीन् प्रति। ततं तं संशयं ३ ॥ भागवतस्य प्रह्लादस्य माहात्म्यं ४ ॥ कृष्णाय व्यासाय कृष्णं
मुनिं नत्वेत्यर्थः । यस्मात् प्रकृतेः परः अतो निर्गुणः अतएवाजः । अतएवाव्यक्तः रागद्वेषादिनिमित्तभूतदेहेन्द्रियादिरहितः
सोपि स्वमायागुणान् सत्वादीन् ॥ आविश्य [illegible] स्थापयबाध्यान् प्रति यद्देवासुरादीनां वा परस्परं बाध्यबाधकतां गतः ॥ प्राप्तस्त्र-
ग्रहेतु ज्ञात इत्यर्थः ५ ॥ तत्र गुणानां स्वीयत्वे सति [illegible] कृतपुरुषद्वैषम्यः स्यात् तन्नास्तीत्याह सत्वमिति ननु स्वेच्छया गुणाधिष्ठा-
नेनापि पक्षपातो वैषम्यं स्यादेव । न । तस्य कालकृतत्वादित्याह न तेषामिति सार्द्धं नन्वत्र सो वृद्धिः ७ ॥ सत्वस्य जय काले देवान्

इति नः सुमहाभाग नारायण गुणान् प्रति ॥ संशयः ॥ सुमहान् जातस्तद्भवांश्छेत्तुमर्हसि ॥ ३ ॥ श्रीशुक उवाच ॥ सा-
धु पृष्टं महाराज हरेश्चरितमद्भुतं ॥ यत्र भागवतमाहात्म्यं भगवद्भक्तिवर्द्धनं ॥ ४ ॥ गीयते परमं पुण्यमृषिभिर्नारदा-
दिभिः ॥ नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ॥ ५ ॥ निर्गुणोपि ह्यजो व्यक्तो भगवान् प्रकृतेः परः ॥ स्वमायागुणा-
माविश्य बाध्यबाधकतां गतः ॥ ६ ॥ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ न तेषां युगपद्राजन् ह्रास उल्लास एव वा ॥ ७ ॥ जयकाले तु सत्वस्य देवर्षीन् रजसोऽसुरान् ॥ तमसो यक्षरक्षांसि तत्कालानुगुणो भजत् ॥ ८ ॥ ज्योति-
रादिरिवाभाति संघातान्न विविच्यते ॥ विदंत्यात्मानमात्मस्थं मथित्वा कवयोंततः ॥ ९ ॥

ऋषींश्च भजन् । तत्तद्देहं प्रविश्य वर्द्धयतीत्यर्थः ॥ रजसो जयकाले तमसो जयकाल इत्यन्वयः ॥ तस्य कालस्यानुगुणः सन् ॥ ८ ॥ स-
मस्यापि निमित्तभेदेन वैषम्ये दृष्टांतः ज्योतिरिति यथा आकाशादिषु जलं यथा । पात्रेषु आकाशं यथा नानारूपं आभाति ननु तर्हि तद्वदेव विवे-
केन प्रतीयेत अत आह संघातात् सुरादिदेहात् न विविच्यते न पृथक् प्रतीयते तर्हि तान् भजतीति कुतो ज्ञायते तत्राह । विदंतीति आत्मस्थं पर-
मात्मानं कवयो निपुणाः मथित्वा कार्यदर्शनलिंगेन । विचार्य ज्ञानंतीति अततः ॥ स्वभावकर्मादिबाधेन विदंतीति पाठे लाभोपि ह्या-
न मेव । अत्रापि ज्योतिरादिरिवेति दृष्टांतो यथा हि सूर्यकांतादौ दाहदर्शनात् ज्योतिर्ज्ञायते । यथा च गंधदर्शनात् पृथ्वीत्यादि ॥ ९ ॥

भा० स०
३

यस्मिन्निबद्धोयमभिमानः तस्य देहसंबंधाद्वधश्च यथा तथा यस्याभिमानो नास्ति ॥ अस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते
न केनापि । अभिमानाभावे हेतुः कैवल्यमिति अद्वितीयत्वेनाभिमंतव्याभावात् । वैषम्याभावे हेतुः अखिलात्मनः सर्वात्मनः इति तर्हि कि-
मिति तत्राह परस्येति दमकर्तुः । हितार्थं दंडं करोतीत्यर्थः ।२४। यस्माद्भगवतो निंदादिकृतो वैषम्यं नास्ति । तस्माद्येन केनाप्युपा-
येन ध्यायतस्तेनैव निंदादिकृतपापस्यापि नाशात्सायुज्यं युक्तमित्याशयेनाह । तस्मादिति सप्तभिः । निर्वैरेण नास्ति वैरं के-

यन्निबद्धोभिमानोयं तद्वधात्प्राणिनां वधः ॥ तथा न यस्य कैवल्यादभिमानोखिलात्मनः ॥२४। परस्य दमकर्तुर्हि हिं-
सा केनास्य कल्प्यते ॥ तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा ॥२५। स्नेहात्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक् ॥ य-
था वैरानुबंधेन ॥ मर्त्यस्तन्मयतामियात् न तथा भक्तियोगेन । इति मे निश्चिता मतिः ।२६॥ कीटः पेशस्कृता रुद्धः
कुड्यायां तमनुस्मरन् ॥ संरंभभययोगेन विंदते तत्स्वरूपतां ।२७। एवं कृष्णे भगवति मायामनुज ईश्वरे । वैरेण पू-
तपाप्मानस्तमापुरनुचिंतया ।२८॥ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः ॥ आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः
।२९। गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ॥ संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ।३०॥

नोतमी

नापि यस्मिन्न तेन न भक्तियोगेनेत्यर्थः ।२५। युंज्यात् मनः इति शेषः यस्मादेतैरुपायैः । पृथक् नेक्षते इति । ते अपि वैरानुबंधः श्रेष्ठ इत्याह
यथेति न तथा भक्तियोगेनापि ॥२६। अत्र दृष्टांतः कीटः पेशस्कृता भ्रमरेण संरंभो द्वेषः । भयं चास एव योगस्तेन ।२७। वैरेण
यानुचिंता तयैव पूतः । पापमना येषां ते तमापुः ।२८। तदेवं कामादिनिमित्तं पापं हित्वा ॥३०॥

व

तस्य तु वै...नरकपातएवोचित इत्याह । भगवन्निंदयेति । तमसि नरके २६ दमघोषस्य सुतः श्रीमान् शिशुपालः कलभाषणात् बाल्ये कोमलभाषणमारभ्य संप्रति अधुनापि अमर्षी क्रोधी मत्सरी वा २७ श्वित्रं कुष्ठं २८ दुःखग्राह्यं दुःप्रापं धाम स्वरूपं यस्य तस्मिन् लयं सायुज्यं ईयतुः जग्मतुः । अनेन तस्यापि इदं तव कुलयस्य तस्मिन् लयं सायुज्यं तत् किं ग्रामारण्येन सिद्धवन्निर्दिष्टः २९ एतत् अद्भुततमं कुं । अतः एतत्प्र तिज्ञामभ्याति भगवान् सर्वज्ञः त्वं ब्रूहि २० आभाष्य संबोध्य सीदंति निषीदंति अस्यामिति सदः तस्याः सदसः शृण्वत्याः कथा अहेतु

दमघोषः सुतः पाप आरभ्य कलभाषणात् ॥ संप्रत्यमर्षी गोविंदे दंतवक्रश्च दुर्मतिः । २७ शपतोरसकृद्विष्णुं यद्ब्रह्म पर मव्ययं ॥ श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः । २८ कथं तस्मिन् भगवति दुरवग्राह्यधामनि ॥ पश्यतां सर्वलोकानां लयमीयतुरंजसा । २९ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ॥ ब्रूह्येतदद्भुततमं...भगवांस्तत्र कारणं । २० श्रीशुक उवाच । राजस्तद्वच आकर्ण्य नारदो भगवानृषिः ॥ तुष्टः प्राह तमाभाष्य शृण्वंत्यास्तत्सदः कथाः । २१ श्रीनारद उवाच ॥ निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं ॥ प्रधानपरयो राजन्नविवेकेन कल्पितं । २२ हिंसा तदभिमानेन दंडपारुष्ययो र्यथा ॥ वैषम्यमिह भूतानां ममाहमिति पार्थिव । २३ ॥

न्वयः । २२ भगवन्निंदकस्य नरकपातेन भाव्यमिति वदंतं स्तवकोऽपि घातः । भगवत्पीडाकरत्वेन वा । तद्भवे पि सुरापानादिव निषिद्धनिंदाचरणाद्याः । तत्र तावत् देहाभिमानकृतनिंदादिनिमित्तत्वात् । पीडादीनां भगवतश्च तदभावान्न पीडासंकास्तीत्याह स्याद् इति त्रिभिः । निंदनं दोषकीर्तनं तिरा । अर्थे कारस्तिरस्कारः । निंदनस्तवादिज्ञानार्थं । प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं रचितं । २२ तदभिमानेन भूतानामयं ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति । तथा नयस्येत्युत्तरेणान्वयः । दंडस्ताडनं

कथंभूताः पंचवाषड्ढाहायनो येषांते अर्भो बालाः तद्वद्रारा येषांते सर्वेषामपि चादिरामपिः दिग्वासदिगंबराः अतःशिश्नम्रलावासमपिनार्हथकुतः पुनस्ततसेवामितिचकारार्थः ३७ हे बालिमोऽतोहेतोः अस्मातांवांपुवयोस्त्रिनिर्ङ्कलनारिः

पंचषड्वायनार्भोनाः सर्वेषामपि सर्वेज्ञाः ॥ दिग्वाससः शिश्नम्रलाः ह्यास्योतान्स्तपसेधतां ॥ ३६ ॥
अत्रायुनंपितारवं ॥ पुवांवासंनचार्हथः रजस्तमोन्यांरहितेपारम्रलेमधुद्विषः ॥ ३७ पापिष्टामांसुरींयोनिंबालिशापातुमार्हतः ॥ रावंसंसौससृवुनात्पतंतैःतेः कृपालुनिः ॥ ३८ प्रोक्तोपुनर्जन्मनिर्द्धांद्विजितिर्लोकायकल्पितांयज्ञातेतोदितेः पुत्रौदैत्यदानववंदितो ३९ हिरण्यकश्यपुर्ज्येष्ठोहिरण्याक्षोनुजस्ततः ॥ हतोहिरण्यकश्यपुर्हरिणासिंहरूपिणा ४० ॥ हिरण्याक्षोधरोधारेविश्चतासौकरंवपुः ॥

लोकायस्वस्थानप्राप्तयेकल्पितांतावतापियंसाथः समाप्यतामितिपुनः प्रोक्तावित्यर्थः ३९ धरोधारे निमितेतलप्रतिघातांहतः ४० ॥

तर्हि वेनः किमिति नरके पातितः। तीव्रध्यानाभावात् पापमेव तत्फलितमित्याह ३१। कतमोपीति पुरुषं श्रीहरिं प्रति पुरुषेपुरुषस्य कामासंभवात्। नयादिनिश्चितपक्षानां पंचानां मध्ये नैकतमोऽपि ऽस्त्युक्तं ३२ तदेवमितिहासप्रस्तावकथामुक्त्वा श्रीकृष्णेशिशुपालस्य वैरानुबंधे कोहेतुरित्यपेक्षायां तमेवेतिहासं वक्तुमाह। मातृष्वस्रेय इति पार्षदौ वैकुंठात्प्रच्युतेः हरिद्वासौ अनिमृशति। नवतीति तयो।

कतमोपि न वेनः स्यात्पंचानां पुरुषं प्रति। तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्॥३१॥ मातृष्वस्रेय वश्चैद्यो दंतवक्त्रश्च पांडवः॥ पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतौ॥३२ युधिष्ठिर उवाच॥ कीदृशः कस्य वा शापो हरिदासाभिमर्शनः॥ अश्रद्धेयइवाभाति हरेरेकांतिनां भवः। २३॥ देहेंद्रियासुहीनानां वैकुंठपुरवासिनां॥ देहसंबंधसंबद्धमेतदाख्यातुमर्हसि॥२४॥ श्रीनारद उवाच॥ एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया॥ सनंदनादयो जग्मुश्चरंतो भुवनत्रयं॥३५॥

अश्रद्धेयः। अनादरणीय इव असंभवात भवो जन्मः ३२। असंभवमेवाह॥ जन्महेतुभूतैः प्राकृतैर्देहेंद्रियासुभिर्हीना॥- नानां सुद्धसत्वमयदेहानाः॥ इत्यर्थः प्राकृतदेहसंबंधेन संबंधमेतदाख्यानमाख्यातुमर्हसि ३४॥ ३५॥

द्वितीये विष्णुरोषेण॥ लोकं विद्राव्य दानवैः। तद्बंधूनात्मपुत्रादीनितिहासैरसांत्वयत्॥१॥ भगवद्द्वेषे पि कारणमित्याशये
नाह। भ्रातरीत्यादिना। एवं देवपक्षपातेन कोपेन उत्तप्तस्यापि। तिरस्कारेण ज्वलद्भ्यां कोपाग्निधूम्रमंबरं निरीक्षमाणः॥२॥ करालद्
दंष्ट्राभिर्युक्तया उग्रया दृष्ट्या॥ दुःप्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः॥५॥ समेनापि उपधावनैर्भजनैर्निमित्तभूतैः पार्ष्णि

श्रीनारद उवाच॥ भ्रातर्येवं विनिहते हरिणा क्रोडमूर्त्तिना॥ हिरण्यकश्यपू राजन्पर्यतप्यद्रुषा शुचाः
॥१॥ आह चेदं रुषा पूर्णः संदष्टदशनछदः॥ कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमंबरं। २॥ करालदंष्ट्रो
ग्रदृष्ट्या दुःप्रेक्ष्यभ्रुकुटीमुखः शूलमुद्यम्य सदसि दानवानिदमब्रवीत्। ३। भो भो दानवदैतेया द्वि
मूर्द्धंस्त्र्यक्ष शंबर॥ शतबाहो हयग्रीव नमुचे पाक इल्वल॥४॥ विप्रचित्ते मम वचः पुलोमन्शकुनादयः
शृणुतानंतरं सर्वे क्रियतामाशु मा चिरम्॥५॥ सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत्॥ पार्ष्णिग्राहे
ण हरिणा समेनाप्युपधावनैः॥६॥ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः॥ भजंतं भजमानस्य बालस्येवा
स्थिरात्मनः॥७॥

ग्राहेण सता॥६॥ एवं त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शुद्धतेजोमयस्यापि मायया वनौकसः। व
राहरूपस्य सतः अस्थिरात्मनः। अ[illegible]विवस्थितचित्तस्य कुतः। यो यो भजति तं तं भजमानस्य अनुसरतः॥७

हिरण्यकश्यपयोर्वधे कारणं ॥ सूचयति हिरण्यकशिपुः पुत्रमिति ४१ ॥ सर्वभूतानामात्मभूतः समं ब्रह्मैव पश्यतीति तथा तश्च
तः प्रशान्तद्वेषादिरहितः ॥ अत एव भगवत्तेजसा स्पृष्टं व्याप्तं नाशक्नोद्धन्तुमुद्यमैः शस्त्रप्रहारादिभिः ४२ ॥ विश्रवसः तद्धितेन रूप

हिरण्यकश्यपुः पुत्रं प्रह्लादं केशवप्रियं ॥ जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४१ ॥ तं सर्वभूतात्मभूतं
प्रशान्तं समदर्शनं ॥ भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ४२ ॥ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवः
सुतौ ॥ रावणः कुम्भकर्णश्च सर्वलोकोपतापिनौ ४३ ॥ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ॥ रामवि
र्यं श्रोष्यसि त्वं मार्कण्डेयमुखात्प्रभो ४४ ॥ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ॥ अधुना शाप
निर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४५ ॥ वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मतां ॥ नीतौ पुन[illegible]
[illegible] युधिष्ठिर उवाच ॥ विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि ॥ ब्रूहि मे
भगवान्येन प्रह्लादस्याच्युतात्मनः ॥ ४७ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे नारदयुधिष्ठिर
संवादो नाम प्रथमोध्यायः ॥ १ ॥

यनीयमित्युक्तं प्रत्याह ॥ रामवीर्यमिति ॥ कृष्णचक्रेण हतमंहो ययोस्तौ तयोः यायमेव हतं न तु ताविति अर्थः ॥ ४५ ॥ येन कारणेन
प्रह्लादस्याच्युतात्मनः ॥ अच्युते कथितत्वं तदपि ब्रूहीति शेषः ॥ सप्तमे प्रथमोऽध्यायः १ ॥

तस्य रुधिरेण यावत्तर्पयिष्यामि तावद्यूयं भुवं यातेति तृतीयेनान्वयः॥८॥ ननु देवैस्तद्वधः कारितः अतस्ते किं न हन्यंते तत्राह॥ त
स्मिन् कूटे अहिते अतिपक्षे कुटमी हि तस्यस्पेति वा। नष्टे अदृष्टे सति देवाः सुष्यंति स्वयमेव नाशं यास्यंति। कुतः विष्णुर्देव प्रा
त याणे येषां ते॥९॥ तपोयज्ञादि प्रवृत्तेन सूदयध्वं घातयत॥१०॥ ननु तेः किं समपराधं तत्राह। विष्णुरिति। विष्णुर्हि द्विजानां क्रिया
ना अनुष्ठानं मूलं यस्य सः यतो सौ यज्ञः धर्ममयश्च परायणं परमः आश्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वात्॥ मा म्नाद्

मत्सूलनिभिन्नग्रीवस्य भूरिणा रुधिरेण वै॥ रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः॥८॥ तस्मिन्न ति कूटे हि
ते नष्टे कृत्तमूले वनस्पतौ॥ विटपा इव सुष्यंति विष्णुप्राणा दिवौकसः॥९॥ तावद्यात भुवं यूयं विप्रक्षत्रसमु
मेधितां सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः॥१०॥ विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान्॥ देवर्षि
पितृभूतानां धर्मस्य च परायणं॥११॥ यत्र यत्र द्विजा गावो वेदवर्णाश्रमक्रिया॥ तं तं जनपदं यातः संदीपय
त वृश्च्यत॥१२॥ इति ते भर्तृनिर्देशमादाय सिरसादृताः॥ तथा प्रजानां कदनं विदधुः कदनप्रियाः॥१३॥ पुर
ग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान्॥ खेटखर्वटघोषांश्च ददहुः पत्तनानि च॥१४॥

स्यंत तदा श्रयणा द्वि वधा इति नाव॥११॥ तस्मात्परमं मंत्रं शृणत ते साहयत्र यत्रेति संदीपयत दहत वृश्चत छेदं कुरुत॥१२॥ पुरं द्रग्गादिम
त ग्रामस्तु तद्रहितः व्रजो गवां वासः उद्यानं अकृत्रिमं वनं क्षेत्रं व्रीह्यादेः आरामः कृत्रिमं वनं आश्रमः ऋषीणां स्थानं आकरोर
त्नादीनां॥१३॥ खेटः कृषीवलानां वासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोषश्चाभीराणां वासः पत्तनं राजधानी॥१४॥

ना० स०
६

खनित्रैः खननसाधनैः आजीव्यान् शरणानि गृहान् ॥१५॥ विप्रकृते उपद्रुते यद्वा नार्जनामुकोनीत ॥ दिवं परित्यज्य ॥१६॥ तदेवं भ्रात्रा-
नाकदनं दानवेषु कुर्वन्स्तुयं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः । प्रथमं यत्नं तवान् । तदाह हिरण्यकशिपुरित्यादिना कटोदकं

केचित्खनित्रैर्विभिदुः सेतुप्राकारगोपुरान् ॥ आजीव्यांश्छिच्छिदुर्वृक्षान्केचित्परशुपाणयः ॥ प्रादहन्शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥१५॥ एवं विप्रकृते लोके दैत्येंद्रानुचरैर्मुहुः ॥ दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥१६॥ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः ॥ कृत्वा कटोदकादीनि भ्रातृपुत्रानसांत्वयन् ॥१७॥ शकुनिं संबरं धृष्टं भूतसंतापनं वृकं । कालनाभं महानाभं हरिश्मश्रुमथोत्कचं ॥१८॥ तन्मातरं रुषाभानुं दितिं च जननीं गिरा ॥ श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वरः ॥१९॥ हिरण्यकशिपुरुवाच ॥ अंबांब हे वधूः पुत्रा वीरं मार्हथ शोचितुं ॥ रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ भूतानामिह संवासः प्रपायामिव सुव्रते ॥ दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥२१॥

तापनं देयं मुत्कचं आदिसस्याप्येतसाधं च ॥१७॥ हे वधूः इति भ्रातुर्भार्यां संबोधयति ॥१८॥ भ्रातुर्नाम तस्य श्लाघ्यो वध तथाप्यस्माकं तद्व दुःखं तर एवेति चेत्तत्राह ॥२०॥ भूतानामिति दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां [illegible] पुनश्च [illegible] स्वैः स्वैः कर्मभिरुन्नीतानां वियोजितानां ॥२१॥

६

रा॰ग॰ स॰
७

अत्रापि शोकहेतुं ॥ विना दैवेनायं शोकः कस्य स्मिन् ॥ न पश्येत् प्रेतस्य मृतस्य कस्यापि विधेयं बंधवस्तेषां च ॥ २७ उपासत तत्समी
पे आवृत्य स्थिता ॥ २८ विशीर्णरत्नमयकंकवचं यस्य । विनष्टानि आभरणानि यस्य सरेणा । निर्भिन्नं हृदयं यस्य । असृक्धाराक्ते
न आविलं लिप्तं २९ प्रकीर्णाः केशा यस्य ध्वस्तिः अहरणी यस्य रत्नसंरंभेण दृष्टौ दष्टः दंतः छदौ उष्टौ येन रदैः । सा कुंठं आवृतं मुखं
सा

अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ यमस्य प्रेतबंधूनां संवादं तन्निबोधत ॥ उशीनरेष्वभूद्राजा सुयज्ञ इति
विश्रुतः ॥ सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥ २८ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजं । सर[illegible]भिन्न
न्नहृदं शयानमसृग्विलं ॥ २९ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदं । रजः कुंठमुखांभोजं छिन्ना
युधभुजं मृधे ॥ ३० उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः । हताः स्म नाथेति करैरुरो
दृसं ॥ घ्नंत्यो मुहुस्तत्पदयोरुपापतन् ॥ ३१ रुदंति उच्चैर्दयितांघ्रिपंकजं सिंचत्य अश्रैः कुचकुंकुमारुणैः
विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्याक्रंदनया विलेपिरे ॥ ३२ अहो विधात्राकरुणेन नः प्रभो भवान्प्र
णीतो दृगगोचरीं दशां । उशीनराणामसि वृत्तिदः पुराकृतोधुना येन शुचां विवर्द्धनं ॥ ३३ ॥

भोजं यस्य । छिन्नमायुधं भुजश्च यस्य तस्य पादयोः उपसमीपे आसमंतात् पतत ३१ विलापमेवाह । अहो इति द्वाभ्यां अकरु
णेन मेवाकः दृशां गोचरी दृष्टां येन भवान् प्रणीतः गमितः तेन विधात्रा त्वमधुना शुचां विवर्द्धनः कृतोसि इत्यन्वयः ३३

एवंलौकिकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्या वारयति नित्य इति नित्यः मृत्युशून्यः शुद्धः निर्मलः सर्वगः । सर्वगतः सर्ववित् । सर्वज्ञश्च
र्वत्रहेतुः परः । देहादिव्यतिरिक्तः ॥ अतो मृत इति क्रोश इति मलिन इति वियुक्त इति अज्ञ इति च शोको नर्थ्य इत्यर्थः । कथं तर्हि तस्य सं
सारः तत्राहः धत्त इति ॥ आत्मनो मायया स्वविद्यया लिंगं धत्ते गुणानुच्चावचान्देहान्सुखदुःखादीन्वा विशेषेण सृजन् । स्वीकु
र्वन् लिंगशरीरोपाधिः संसार इत्यर्थः ॥२२॥ एतत्सदृष्टांतं प्रपंचयति ॥ यथेति चलन्ति तरवः प्रतिबिंबिताः ॥ उपाधिधर्मान्वे

नित्य आत्माव्ययः सुद्धः सर्वगः सर्ववित्परः ॥ धत्तेऽसावात्मनो लिंगं मायया विसृजन्गुणान् ॥२२॥ यथांभ
सा प्रचलता तरवोपि चला इव चक्षुषा भ्राम्यमाणेन । दृश्यते चलतीव भूः ॥२३॥ एवं गुणैर्भ्राम्यमाणे मन
स्यविकलः पुमान् ॥ याति तत्साम्यतां नेह्यलिंगो लिंगवानिव ॥२४॥ एष आत्मविपर्यासो ह्यलिंगे लिंगभा
वना ॥ एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृति ॥२५॥ संभवश्च विनाशश्च सोकश्च विविधस्ततः
अविवेकश्च चिंता च विवेकास्मृतिरेव च ॥२६॥

पहितेभवंतीति दृष्टांतमुक्त्वा ग्राहकधर्मा ग्राह्ये भवंतीति दृष्टांतमाह ॥ चक्षुषेति ॥२३॥ अविकलः परिपूर्ण एव तत्साम्य
तां मनःसमतामित्यर्थः ॥२४॥ लिंगभावना देहादिभिमानः एष आत्मनो विपर्यासः । अन्यथाभावः । तमेवाह प्रियैर्वियोग
अप्रियैर्योगश्च कर्म वा संसृतिश्च नानागर्भप्रवेशः ॥२५॥ ततश्च संभव उत्पत्ति । विवेकस्यास्मृतिरनुसाधनं ॥२६॥

ननु तस्येश्वरस्यापि किं प्रयोजनं न किंचिदपि किंतु क्रीडैव केवलमित्याह । यदिच्छया: इदं विश्वं सृजति रक्षति संहरति च । नोऽस्य
बलात्तस्येशितुश्चराचरं क्रीडासाधर्मकृः । अतः स एव निग्रहे संहारे संग्रहे पालने च प्रभुः ३८ । प्रभुत्वमेवान्वयव्यतिरे-
काभ्यां दर्शयति पथ्येति ॥ दिष्टेन दैवेनेश्वरेण हणार हृतं तेनेश्वरेण विहितं । अस्य हतः तेनोपेक्षितः ३९ । तद्देवमात्म-

यदृच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुंपते च यः ॥ तस्याबलाः क्रीडनमाहुरीशितुश्चरा-
चरं निग्रहसंग्रहे प्रभुं ३९ । पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति जीवत्यना-
थोपि ॥ तदीक्षितो वने गृहेपि गुप्तोस्य हतो न जीवति ४० ॥ भूतानि तैस्तैर्निजयोनिकर्मभिर्भवंति का-
लेन भवंति सर्वशः ॥ न तत्र हात्मा प्रकृतावुपस्थित ॥ स्तस्या गुणैरन्यतमो निबध्यते ४१ ॥

तो जन्ममरणादिकमंगीकृत्येश्वराधीनत्वान्न शोकः । कार्य इत्युक्तं इदानीं तु देहानामेव जन्मादिमत्त्वान्नात्मन इत्याह त्रिभिः भूता-
नि देहाः निजयोनिः स्वकारणं तेन लिंगशरीरेण तन्निमित्तैः कर्मभिर्भवंति उत्पद्यंते च सर्वशः देवादिदेहा अपि तत्राह अपि तत्र प्रकृ-
तौ देहे स्थितोप्यात्मा तस्या गुणैः देहधर्मैर्जन्मादिभिर्न बाध्यते न युज्यते ॥ अतः अन्यतमः देहादत्यंतविलक्षणः ४१ ॥

त्वया सुहृत्तमेन विना वयं कथं स्याम न जीवेमः अतः हे वीर यत्र त्वं यास्यसि तत्र ते अनुगमनं तव पादयोः । शुश्रूषां कु
र्वतीनामस्माकं दिश देहि ॥ ३६ ॥ निर्हारं दाहं यन् अपतत् । अस्तं । अस्ताचलं प्रति ॥ ३५ ॥ परिदेवितं रोदनं स्वपार्श्वमेवाश्रुत्य श्रु।
त्वा तत्र स्वयमेव उपागतो यमस्तानाह ॥ ३७ ॥ अहो इत्यादिना । वयसा स्मृतोधिकानामपि लोकस्य विधिं जन्ममरणादिरू

त्वयाकृतदेहेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते ॥ तदनुयातं तव वीर पादयोः शुश्रूषतीनां दिश यत्र या
स्यसि ॥ ३६ ॥ एवं विलपतीनां वै परिगृह्य मृतं पतिं ॥ अनिच्छतीनां निर्हारमर्कोस्तं संन्यवर्तत ॥ ३५ ॥ तत्र ह प्रे।
हबन्धूनामाश्रुत्य परिदेवितं ॥ आह तान्बालको भूत्वा यमः स्वयमुपागतः ॥ यम उवाच ॥ अहो अमीषां
वयसाधिकानां । विपश्यतां लोकविधिं विमोहः ॥ यदागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचंत्यपार्थं।
॥ ३७ ॥ अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिंतयामः ॥ अभक्ष्यमाणा अबला वृकादिभिः ॥ यो
रक्षिता रक्षति यो हि गर्भे ॥ ३८ ॥

कारं विपश्यतामपि ॥ यस्मादव्यक्तादागतः । तत्रैव गतम् अयथार्थं शोचंति तदुक्तं गीतासु अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारतः
। अव्यक्तनिधनान्येव । तत्र का परिदेवनेति किंच स्वयमपि सधर्मा मृतेन सह समानो मृत्युलक्षणो धर्मो येषां तथा भूता अपि
॥ ३७ ॥ अबला दुर्बला अपि वृकादिभिरहन्यमाना वयं तत्र हेतुः । यो गर्भे रक्षति स एव हि विश्वं रक्षिता रक्षति ॥ ३८ ॥

भा० स०
९

किंविद्वद्भिर्मूढाः यमनुशोचथ सोयं युष्मद्दृष्टोस्तु यज्ञः श्रोतेति किमिति शोचथ तन्वेतावंतं कालमसौ शृणोति । अनंतरं श्रुतिवक्ति च । इदा
नीं तस्या दर्शनान्मृत ॥ इति शोचाम इति चेत्तत्राह । शतु शोचंतीयो न नवति प्रागयितस्य त्वन्नेर्नहित्याह । यः श्रोतेति । ४४
ननु मुख्यनासिकासंचारी प्राणः श्रोता वक्ता च दृश्येत वा नात्मा श्रोता वक्ता च इ चेतनत्वादित्याह ॥ ४५ ॥ न श्रोतेति महा
न सर्वेंद्रियमुख्येष्टाहेतुः । अत एव मुख्यः । प्राणो वै मुख्य इति श्रुतेः कस्तर्हि वक्ता श्रोता च तत्राह ॥ यस्त्विहेति देहेंद्रिये स्वतः

सुयज्ञोनन्वयं शेते तमह्रायमनुशोचथ । यः श्रोता योनुवक्तेह स न दृश्येत कर्हिचित् ॥ ४३ ॥ न श्रो
ता नानुवक्तायं मुख्योप्यत्र महानसुः ॥ यस्त्विहेंद्रियवानात्मा स चान्यः प्राणदेहयोः ॥ ४४ ॥ भूतेंद्रिय
मनोलिंगानदेहानुच्चावचान्विभुः ॥ भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥ ४५ ॥

र्थ इंद्रियवानात्मा स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव चेतनः ॥ ४६ ॥ ननु चेतनश्चेन्न अनुपलभ्येत तस्याहंकारः स्थूलः काणो वि
धिरः इत्यादि देहादिधर्मोपलब्धिः कुतः तत्राह । भूतेंद्रियमनोभिर्लिंग्यंते लक्ष्यंते इत्यत तथा तान्देहान्नते सो अन्य ए
व न भवति । अहमिति मन्यते तर्हि कथं मोहः तत्राह स्वेन तेजसा विवेकबलेन उत्सृजत्यपि हा त्यनु न वप्रमाणे
इति ॥ ४७

९

नन्वहं कृशः स्थूल इत्यादौ न वैलक्षण्यं प्रतीयते तत्राह ॥ इदं मोहजं अविवेकादात्मत्वेन जातं वस्तुतस्तु पृथगेव यत इ
र्यते दृश्यते मौक्तिकवद्यथाग्रैमित्यन्वयः । अत्रैव प्रयोगः देहात् मौक्तिकाच्च पुरुषाच्छरीरं भिन्नं दृश्यत्वात् मौक्तिकत्वाच्च य
थात्मता विवेकिन ॥ आत्मत्वेनाभिमतमपि गृहं ततः पृथक् तद्वदिति मौक्तिकत्वानुमानं विकृष्टवनात्मनां जन्माद्यभाव
मुपसंहरति ॥ यथा औदकैः परमाणुभिर्जातो बुद्बुदादिः ॥ यथा पार्थिवैर्जातो घटादिः । यथा च तैजसैर्जातः कुंडला

इदं शरीरं पुरुषस्य मोहजं ॥ यथा पृथङ्मौक्तिकमीयते गृहं ॥ यथोदकैः पार्थिवतैजसैर्जनः
कालेन यातो विकृतो विनश्यति ॥ ४२ ॥ यथानलो दारुषु भिन्न ईयते ॥ यथानिलो देहग
तः पृथक्स्थितः ॥ यथा नभः सर्वगतं न सज्जते ॥ तथा पुमान्सर्वगुणाश्रयः परः ॥ ४३ ॥

दिर्विनश्यति ॥ तथा तैरेव त्रिविधैः परमाणुभिर्जातो जातो देह एव विकृतः सन् विनश्यति । न त्वात्मेत्यर्थः । ४२ । पृथग
वस्थानाभावेपि भिन्नत्वे दृष्टांतं दर्शयन्नाह यथानलो दारुष्ववस्थितोपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते य
था देहगतोनिलो नासिकादिषु पृथक्स्थितोपि प्रतीयते देहस्थत्वेप्यात्मन ॥ स्तत्कर्मयोगाभावे दृष्टांतमाह । यथा नभो न
सज्जते क्वापि संगं न प्राप्नोति । तथा पुमानपि सर्वेषां गुणानां देहेंद्रियादीनामाश्रयः । तेषां भिन्नो वा परः पृथगेवेत्यर्थः । ४३ ।

शिवस्त्वं तां जालस्य तस्ते अ॥ सृजत॥ वंधंजाय॥ आयन्त्या आपतद्वां आत्तां॥५२॥ आकुलराय सर्वतो नुकंप्य या॥५३॥ आत्मनोदे
हस्पोर्द्धन॥५४॥ विधुरायुषा नायां स्त्रि जीविते नानेन दुःखं यथा न वलेवजीविता किं मे अयोजनं। अतो मामपि कामं नय त्विनान्व
सासज्जात सिवि स्तं त्यां महिषी कर्लयं चिता॥ कुलिंगस्तां तथा पन्नां निरीक्ष्य भृसदुःखितः। ५२॥ स्नेहाद कल्पः कृपणां पुर्य
देवयत॥ अहो अकरुणो देव स्त्रिया करुणया विभुः। ५३॥ कृपणं मानुशोचंत्या दीनया किं करिष्यति। कामं नयतु मा
देव किमर्द्धेनात्मनो हि मे॥५४॥ दीनेन जीविता दुःखं मनेन विधुरायुषा। कथं तु जातपक्षांस्तान मातृहीनान् विभर्म्यहं॥
५५॥ मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजा॥ एवं कुलिंगं विलपंतमारात्प्रियावियोगातुरमश्रुकंठं। सुर एव तं शाकुनिकः
सरेण विव्याध कालप्रहितो विलीन एवं स्वयमपत्यपंते स्वतमायायमवुध्य्यः॥ नैनं प्राप्स्यथ शोचंत्यः पतिवर्षशतैरपि॥५७॥
हि॥ एष॥ त्र॥ पु॥ रु॥ ष॥ बाल एवं प्रवदति सर्वे विस्मितचेतसः॥ ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं॥५८॥ यम एतदुपा
ख्याय ततैवांतरधीयतः॥ ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं॥५९॥ ततः शोचत मा यूयं परं चात्मानमेव च॥ कः आत्म
कपरो वात्र स्वीयः पारक्य एव वा॥६०॥ स्वपराभिनिवेशेन विनाज्ञानेन देहिनां॥६१॥ ना॥ द॥ वा॥ च॥ इति दैत्यपतेर्वाक्यं दित्य
राकार्ण्य सस्नुषा पुत्रशोकं क्षणात्त्यक्त्वा तत्वे चित्तमधारयत्॥६२॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे द्विती
योऽध्यायः॥२

य: नडातायत्त्वये मां तान कथं विनर्मियोष्यामि प्रजाः मातरं प्रतीक्षंते शाकुनि
कः कुलिंगकः पक्षहंता निलीनः सन्
वि॥५६॥ आत्मा पापं स्वमृत्युम अयथोत्थितं मिथ्यैवोत्थितं॥५८॥ सांपरायिकं परलोककृत्यं॥५९॥ अशोचंतोनि पाठे अज्ञागम आर्षः स्वपर
स्वपराभिनिवेश एवाज्ञानं तेन विनाशस्तु मायांस्तु हिता॥६२॥ इति सप्तस्कंधे द्वितीयः॥२॥

ननुविवेकानंतरमप्याहारादिकर्मसुप्रवृत्तेर्बंधः स्यादेवेत्यतआह यावल्लिंगशरीरेणान्वितोतदभिमानेवानात्मानवति तावदेवतस्यतत्
कर्मनिर्बंधहेतुर्भवति ततोविपर्ययः देहधर्मेणोक्तारंततः क्लेशश्चानुवर्तते ननुलिंगाभिमानेनिवृत्तेपियतोयंमायायोगोविपर्य
यादिमायया युज्यत इति तथा न परमार्थः ४७ ननुसुखदुःखादीनांतत्साधनानांचसत्यत्वप्रतीतेः कुतोमायामयत्वंतथाच
बहवोवादिनः सत्यत्वमेववदंतीत्यतआह वितथोमिथ्यानृतोऽयमभिनिवेशः कोसौ गुणेषुतत्कार्येषु अर्थः परमार्थइ
तिदृक्वचश्चेतियत्सः कुतइत्यतआह यथेति ४८ उपसंहरति अथतस्मात् नित्यमात्मानं अनित्यं देहंवातद्विदः नित्य

यावल्लिंगान्वितोह्यात्मा तावत्कर्मनिबंधनं ततोविपर्ययः क्लेशो मायायोगोनुवर्तते ४७
वितथाभिनिवेशोयं यद्गुणेष्वर्थदृग्वचः यथामनोरथः स्वप्नः सर्वमैंद्रियकंमृषा ४८ अथ
नित्यमनित्यंवानेहशोचंति तद्विदः नान्यथाशक्यतेकर्तुं स्वभावःशोचतामिति ४९ लुब्धकोवि
पिनेकश्चित्पक्षिणांनिर्मितोंतकः वितत्यजालंविदधे तत्रतत्रप्रलोभनं ५० कुलिंगमिथुनंतत्रवि
चरत्समदृश्यत तयोःकुलिंगीसहसालुब्धकेनप्रलोभिता ५१

मनित्यंचज्ञानंततः नन्वेवमुपदेष्टारोपिशोचंतोदृश्यंतेतत्राहनान्यथेति ज्ञानाद्यज्ञानाद्वास्वभावोननिवर्तते इत्यर्थः ४९
स्वयंसधर्मोप्यपीतियदुक्तंतत्रेतिहाससमाह लुब्धकइत्यादिनापक्षिणामंतकः ईश्वरेणनिर्मितः सनयत्रयत्रतेतत्रत
त्रान्प्रलोभनयन्जालंविस्तार्यविशेषेणधृतवान् पाठांतरेतेषामामिषादिभिः प्रलोभनंकृतवानित्यर्थः ५० कुलिंगः कंद
नद्धीविशेषः यतः आलिंगयोर्मिथुनं ५१

अन्यरणस्तस्मिन्नदेव मुत्पादयितुं ॥ तत्संकल्पमाह ॥ तस्येति चतुर्भिः अथाप्यस्मासिर्न्ने वेदितं त्वया ॥ श्रूयतां तपयोगयोः समाधिनातिशयास्सर्वे धि
ष्ण्येभ्यः श्रेष्ठं निद्रासनं सत्यलोकं यया अधास्ते अधितिष्ठति तत् त्वेवात्मनः साधयिष्यामि ननु अहं रणः ॥ अतिदीर्घोयुषात् यस्त स्यात् ततस्मा
धितं अन्यः कुतस्साधयेत ॥ तत्राह कालात्मनोरिति यद्यथा पुसोल्पत्वेन देहो वारवार म्रियेत तथापि कालस्यात्मनः ॥ अनित्यत्वात् वकुमिष्टं
नमित्तपस्तस्यात् तत्साधयिष्यामेवेति वर्द्धमानेनेति यदुक्तं तस्य फलमाह ॥ अन्यथेति सुरासुरैर्दिव्यतपेन ॥ अयथापूर्वं पुरणपापादि

तस्यायं किलसंकल्पः चरतोऽदुश्वरं तपः श्रूयतां किं न विदितं ॥ स्तवाथापि निवेदितं स्थाचराचरमिदं तयोयोग
समाधिना ॥ १९ ॥ अध्यास्ते सर्वलोकेभ्यः परमेष्ठी निद्रासनं ॥ तदहं वर्द्धमानेन तयोयोगसमाधिना ॥ २० ॥ कालात्म
नाश्च नित्यत्वात्साधयिष्येतथात्मनः ॥ अन्यथेदं विधास्येह न तथापूर्वमोजसाः ॥ किमन्यकालनिर्दिष्टैः कल्पां
तेवैष्णवादिभिः ॥ २१ ॥ इति शुश्रूमनिर्वेधं तपः परममास्थितः ॥ विधत्स्यानंतरं युक्तं स्वयं त्रिभुवनेश्वरः ॥ तवासनं
द्विजगवां पारमेष्ठ्यं जगत्पते ॥ २२ ॥ नवाय श्रेयसेन्नूत्यै क्षेमाय विजयाय च ॥ इति विज्ञापितो देवैर्भगवानात्मभूर्नृ
प परीतो भृगुदक्षाद्यैः ॥ ययौ दैत्येसुराश्रमं ॥ २३ ॥

अतएवेनइदं जगद्विधास्यामि वैष्णवादिभिर्धुवादिपदैः किं च योऽन्तं अतस्तदेव साधयिष्यामि इति त्वत्पदापहरणे तस्य निर्वेधां
शुश्रुम अतएवासौ तपः परममास्थितः पदत्रयुक्तां तत अनंतरं विधत्स्व ॥ अन्यथा तवस्थान ध्वंसं सति साधूनं मनिष्टं स्यादि
ति सोचं तत्राह ॥ तवयारमेष्ठ्यादिपदमासनं द्विजानां गवां च नवाय उद्भवाय श्रेयसे सुखाय नूतस्यै ॥ ऐश्वर्याय पदे नायतं वा पाल ।

तृतीये तस्य तपसा तप्तसंवीक्ष्य ऊर्द्धदिधिः। आगत्य विस्मितस्तेन संस्तुतश्च वरानदात्। १। तदेवं साधुनां कदनेदानवानादिश्य पूर्वं धूतानां च शो
कं। तत्व निरूप्य शोकापनोदाय यत्कृतवान्। तदा हिरण्यकशिपुरित्यादिना अप्रतिद्वंद्वं प्रतिपक्षहीनं। एकराड्रूपं एकमेव राड्राजानं तु
व्यधित्सत। कर्त्तुमैछत्। ऊर्द्ध्वो बाहुर्यस्य नभसि दृष्टिर्यस्य पादांगुष्ठेना श्रितावनिर्येन। जटानां दीधितिभिः कांतिभिः। अ

श्रीनारद उवाच॥ हिरण्यकशिपू राजन्नजेयमजरामरं॥ आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत। १॥ सतेपे मंदर
द्रोण्यां तपः परमदारुणं। ऊर्द्ध्वबाहुर्नभोदृष्टिः पदांगुष्ठाश्रितावनिः। २॥ जटादीधितिभी रेजे संवर्त्तार्क इवांशु
भिः॥ तस्मिन् तपस्तप्यमाने देवाः स्थानानि भेजिरे॥ ३॥ तस्य मूर्द्ध्नः समुद्भूतः सधूमोग्निस्तपोमयः। तिर्यगूर्द्ध्वमधो लो
कान्। तपद्विष्वगीरितः॥ ४॥ चक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः। निपेतुः सग्रहास्ताराः जज्वलुश्च दिशो दश।
। ५। तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः॥ सुराः धात्रे विज्ञापयामासुर्देवदेव जगत्पते। ६। दैत्येंद्रतपसा तप्ता दिवि स्था
तुं न शक्नुमः तस्य चोपशमं भूमन्॥ विधेहि यदि मन्यसे। ७॥ लोका न यावन्नंक्ष्यंति बलिहारास्तवाभिभो॥ ८॥

भुभिः रश्मिभिः। प्रलयकर्त्ता सूर्य्य इव रेजे। पूर्वं ये अलक्षिताः संतो विचेरुः ते देवाः पुनः धानि स्थानानि भेजिरे विष्वगीरितः सर्वतः प्रसृतः
सनद्वीपैरद्रिभिश्च सहिता चचाल चलिता। तव बलिहाराः करप्रदाः। पूजाकारिण इति वा। अभितो भवतीति अभिभुः हे विभो सर्वाधिपतये
पाठांतरे भो इति संबोधनं अभितो यावन्न नंक्ष्यंतीति संबंधः। ८।

हर्षेणाश्रुकलिणापुलकोद्भवोनेत्स्यतस्यअंधेनानिविष्टेनतत्रहेतुः कालसर्पेनप्रकृतिगुणरूपेणानुध्यातेनतपसावृतमिदंजगत्तयः। अपि
व्यक्तामितिकरोत्तपश्च गुणेनआत्मनाइदंसृजति। अबुत्तिलुंपति। तस्मैरजःसत्वतपसाधाम्नआश्रयायमहतेपरायपरमेश्व
यनमइतिद्वयोरन्वयः॥ अत्रचेत्स्वप्रकाशत्वंजगत्प्रकाशकत्वंतत्कारणत्वंसृष्ट्यादिकर्तृत्वंमहत्वंपरमेश्वरत्वंचेतिषट्विधिमु
क्तांदतदेवप्रपंचयन्॥ नमस्करोतिनमइत्यादिचतुर्भिः। बीजायकारणायतत्रहेतुः आद्याडज्ञंज्ञप्तिःविज्ञानंविषयोकारज्ञानंतेम॥।

उत्थायप्रांजलिःप्रह्वस्त्वमाराधेदृशाविभुं॥ हर्षाश्रुपुलकोद्भेदोगिरागद्गदयागृणन्॥ श्रीहिरण्यकशिपुरुवाच॥
कल्पांतेकालसृष्टेनयोधेनतमसावृतं॥ अभिव्यनग्जगदिदंस्वयंज्योतिःस्वरोचिषा। आत्मनात्रिवृताचेदंसृजत्य
वत्यलुंपति॥ रजःसत्वतमोधाम्नेपरायमहतेनमः॥ नमआद्यायबीजायज्ञानविज्ञानमूर्तये॥ प्राणेंद्रियमनोबु
द्धिविकारैर्व्यक्तिमीयुषे॥ त्वमीशिषेजगतस्तस्थुषश्चप्राणेनमुख्येनपतिः प्रजानांचित्तस्यचित्तेर्मनइंद्रियाणां
पतिर्महान्भूतगुणाशयेशः॥ ३०॥

तिर्यस्यतस्मैअनेनस्वप्रकाशकत्वंजगत्प्रकाशकत्वंचदर्शितं बीजायेति॥ त्रिमितत्वमेवजगतोतुंगमस्यतस्थुषःस्थावरस्य
चईशिषेनियंतानवसि॥ केनमुख्येनप्राणेनसूत्रात्मरूपेण अतस्त्वंप्रजानांपतिः तासांचित्तस्यचित्तेरतत्परिमाणेनहतायाश्चेति
नायाःमनसश्चतन्नियमानांइंद्रियाणांचपतिः॥ अतस्त्वमेवमहान्भूतानामाकाशादीनांततःगुणानांशब्दादिविषयाणांआस
यानांतद्वासनागुणानाममीशश्चरणतेतेनेवसर्वस्वंदर्शितमरूतत्वंमुक्तः अपादानत्वमाह प्राणादयोविकारास्तैरुपैर्व्यक्ति
कार्यकारेंद्रियेषुप्रसवतोएवमात्मनोत्रिवृतान्येनोक्तंकारणत्वंद्विधादर्शितं॥ ३०॥

वाल्मीकादिभिः प्रतिछन्नं अथ मंददर्शिपश्यात कथंचित ॥ विलस्य वं शाहेति द्वयोरन्वयः ॥ अर्चीर्णं समंतात् भक्षितां मेदश्चत्वक् । चर्मांशश्शो
णितं चयस्य स अर्चैः पिहितं छन्नं रवि किंच विलस्य महत्सारं धैर्यं दृष्ट्वा मेदिकाविशेषे भक्षितो देहो अस्य निरंबु निःक्षुद्भ्रंबु येन सत्यक्तो ॥

नदद्दर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ॥ पिपीलिकाभिराकीर्णं मेदस्त्वग्मांसशोणितं ॥१५॥ तप्यंतं तपसा लोकान्
यथाभ्रपिहितं रविं ॥ विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः ॥१६॥ श्रीब्रह्मोवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते तपः सिद्धोसि ।
काश्यप ॥ वरदोहमनुप्राप्तो व्रियतामीप्सितो वरः ॥१७॥ अद्राक्षमहमेतत्ते हृत्सारं महदद्भुतं ॥ दंसभक्षितदेहस्य प्राणा
ह्यस्थिषु शेरते ॥१८॥ नैतत्पूर्वर्षयश्चक्रुर्न करिष्यंति चापरे ॥ निरंबु धारयेत्प्राणान् कोवै दिव्याः शमाः शतं ॥१९॥ व्यवसायेन
तेनेन दुष्करेण मनस्विनां ॥ तपोनिष्ठेन भगवताजितोहं दितिनंदनः ॥२०॥ ततस्त आशिषः सर्वा ददाम्यसुरपुंगव ॥ म
र्त्यस्य ते अमर्त्यस्य दर्शनं नाफलं मम ॥२१॥ नारद उवाच ॥ इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलिकैः ॥ कमंडलुजलेनौक्ष
त् दिव्येनामोघराधसा ॥२२॥ स तत्कीचकवल्मीकात् सहओजोबलान्वितः सर्वावयवसंपन्नो वज्रसंहननो युवा
॥२३॥ उत्थितस्तप्तमानो विभावसुरिवेधसः स निरीक्ष्यांबरे देवं हंसवाहमवस्थितं ननाम शिरसा भूमौ तद्दर्शनम
होत्सवः ॥२५॥

दक् । ते अनेन विव्यवसायेन एवं तावज्जितोहं तयोनिष्ठेन भवान् तु सु तरां जितं अमर्त्यस्य मम दर्शनमफलं न भवति
आदौ नवतीत्यादि भवः । औक्षित प्रोक्षितवान् ॥ वज्रवत् संहननं अंगदाद्यस्यात् सहे मह इव आभा यस्य तत्रूपदर्शनमेव महानुत्सवो यस्य ॥
॥२५॥

उ

हे

ननुब्रह्मांडशरीरस्यममकुतोब्रह्मत्वंवाब्रह्मांडगर्भत्वात्तत्राहव्यक्तंकार्यमिदंतवशरीरंव्यक्तंसत्यमित्यपायेन। शरीरेणत्वमिंद्रियप्राणा
मनसागुणान्। विषयान्भुंक्षेकिंचपारमेष्ठ्ये परमैश्वर्येधामनिस्वरूपेस्थितएवभुंक्षेनतुस्वस्वरूपतिरोधानेन॥ अतस्त्वमव्यक्तआ
त्मानिरुपाधिर्ब्रह्मैवपुराणपुरुषश्चेत्यर्थः। ननुब्रह्मत्वंपुराणपुरुषत्वंकथमेकस्यतत्राह। हेअनंतयेनत्वयाव्यक्तेनमनोवचनागोचर
रूपेणइदंविश्वंततंव्याप्तंतस्मैतुभ्यंभगवतेअचिंत्यैश्वर्यायनमः चित्शक्तिर्विद्या॥ अचिच्छक्तिर्मायाताभ्यांयुक्तायेति अन्यस्मा

व्यक्तंविभोस्थूलमिदंशरीरंयेनेंद्रियप्राणमनोगुणांस्त्वं। भुंक्षेस्थितोधामनिपारमेष्ठ्ये॥ अव्यक्तआत्मापुरुषः
पुराणः॥ अनंताव्यक्तरूपेणयेनेदमखिलंततं॥ चिदचिच्छक्तियुक्तायतस्मैभगवतेनमः। यदिदास्यस्यभिमतान्व
रान्मेवरदोत्तम। भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्ममप्रभो॥ नांतर्बहिर्दिवानक्तमन्यस्मादपिचायुधैः नभूमौनां
बरेमृत्युर्ननरैर्नमृगैरपि।३६। व्यसुभिर्वासुमद्भिर्वासुरासुरमहोरगैः॥ अप्रतिद्वंद्वतांयुद्धेऐकपत्यंचदेहिनां
सर्वेषांलोकपालानांमहिमानंयथात्मनः॥ तपोयोगप्रभावाणांयन्नरिष्यतिकर्हिचित्।३८ ॥इतिश्रीभागवतेम
पुराणेसप्तमस्कंधेयुधिष्ठिरनारदसंवादेतृतीयोध्यायः॥३॥

तत्वत्सृष्टव्यतिरिक्तादपिनग
दान्आयुधैर्माभूत्व्यसु
निश्वासैः असुमद्भिःसप्राणैः। यथात्मनस्तवास्तितथाअप्रतिद्वंद्वतादिकंदेहीति शेषः तपसायोगेनचप्रभावोयेषांतेषां
यत्अणिमाद्यैःस्वर्यंनिरीक्ष्यतो। ननुअपतितच्चदेहीत्यर्थः।३८॥सप्तमेतृतीयः॥३॥

स्त्रानीयज्ञप्रवर्त्तकत्वेनअंतर्यामित्वेनजगत्पालकत्वमाह। त्वमेवसप्ततंतुः। अग्निष्टोमादियज्ञान्विस्तारयसि कयंजुष्यात्त्वाद्देवत्रया
रूपेकयंत्रताया च त्वारोहोतारोयत्रचतुर्होत्रिकं कर्म तद्विध॥ याविद्यया आत्मवतांप्राणिनामात्मन्तस्त्वमेवांतरात्मा च अंतर्यामि च कवि कुतः
। यतः सर्वज्ञः तत्कुतः एकः। अखंडतत्रहेतुः॥ अनादिरनंतपरश्चेति। नास्त्यंतकालतः। परं च दिशातो यस्य सः कालरूपेण संहर्तृत्वमा
ह त्वमेवेति त्वं वाद्यौर्विभयैः॥ निमेषादिरूपस्तद्देवं सृष्ट्यादिकर्तृत्वेपि विकारत्वमाह कूटस्थ इति तत्र हेतवः। आत्माज्ञानरूपः। परमेष्ठी
परमेश्वरः अजः जन्मरहितः महान् अपरिछिन्नः किं च जीवलोकस्य च जीवत्वमेवसाक्षान्मादिविक्रिते त्वं तु तस्य जीवने हेतुः। यतस्तस्यात्मेति
य

त्वंसप्ततंतून्वितनोषितन्वात्रय्यांचतुर्होत्रकविद्ययाच। त्वमेवआत्मात्मवतामनादिमनंतपारःकविरंतरात्मा
॥३१॥ त्वमेवकालोनिमिषोजनानामायुर्लवाद्यावयवैःक्षिणोषिकूटस्थआत्मापरमेष्ठिजोमहान्त्वंजीवलो
कस्यचजीवआत्मा॥३२॥ त्वत्तःपरंनापरमप्यनेजदेजच्चकिंचिद्व्यतिरिक्तमस्ति॥ विद्याकलास्तेतनवश्च
सर्वाहिरण्यगर्भोसिबृहत्त्रिपृष्ठः॥३३॥

यं तातत्कुतः तत्राह त्वत इति॥ त्वत्तो व्यतिरिक्तं यत् किंचिद्भवेत्। तर्हि तस्मात्तव जन्मादिविकारो नियम्यत्वादिकं वा भवेत्। त्वत एवं परं
कारणं। अपरं कार्यं तत्र च एतत् जंगमं अग्नेः तत्स्थावरं च व्यतिरिक्तं नास्ति बोधकं शास्त्रं व्यतिरिक्तमस्तीति चेत्। नायतः विद्यावेदोपवे
दादिविद्याख्या। नानिकलाश्च तदंगानि ते तव तनवः। ननु त्वद्व्यतिरिक्ता तत्। कुतः यतः त्वं बृहत्। ब्रह्मैवासि। तदपि कुतः तत्राह हिरण्यरू
पं ब्रह्मांडं गर्भे यस्य सः। नष्टत्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः। अक्षरात्परतः। इत्यादिश्रुतेः॥३३॥

त्वा

नाग०स०
२७

ऊरुगंधेन मधुनाऽसुरयानेन अत एव विघूर्णिते विघूर्णिते ताम्रे अक्षिणी यस्य तं। अशोकधिह्म्यया। सर्वे लोकपालाः। आपन्नयु
क्तैः पाणिनिरूपासत त्रिभिर्ब्रह्मारुद्रविनापदं आशंसन्त तं उपासनप्रकारमाह।। गुरुरिति। पत्योनघः उकुः वहंतिस्म रत्नाकरा

रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखं।। तस्मिन्महेंद्रभवने महाबलो महामना।२२। निर्जितलोक एकराड्रेमेऽनिवंद्यां
घ्रियुगः सुरादिभिः प्रतापितैऊर्जितचंडशासनः। तमंगमत्तं मधुनोरुगंधिना विघूर्णिताताम्रदृशं सुधिह्मया। उपाश्र
तोपायनपाणिभिर्विना त्रिभिस्त्रयोयोगवलोऽसांपदं।। जगुर्महेंद्रशासनमोऽसास्थितं। विश्वावसुस्तुंबुरुरस्मदा
दयः।। गंधर्वसिद्धामुनयोस्तुवन्नरुर्विद्याधराः सरसश्च पांडव।। सएव वराण्यत्रिभिः क्रतून्निर्न्नरिंद्रहरोः।।२४।
ऽपमानोहविर्भोगान गृहीतस्वेन तेऽसा।। अकृष्टपच्यातस्यासीत्सप्तद्वीपवतीमही।। तथाकामदुघाधेनुस्तुनाना
श्वर्यधूढंननं।। रत्नाकरश्च रत्नौघांस्तत्पल्यश्चोरुकूल्मिभिः।। क्षारसिंधोधृतक्षौद्रादधिक्षीरामृतोदका।२८। शैला
द्रोणीभिराकीर्णसर्वर्तुषुगुणान्द्रुमाः। दधारलोकपालानां एक एव पृथग्गुणान्।२९।

नेवाह। क्षीरेति। आक्रीडं क्रीडास्थानं गुणान् पुष्कलादीन् स च लोकपालानां पृथग्विधान् गुणान् वर्षेण दहन शोषणादीनेक
दधारः।२९।

चतुर्थे वरान् लब्ध्वा विजित्याखिललोकपान् विष्णुद्वेषेण तल्लोकान् दैत्येंद्रः समपीडयत् १ शतधृतिर्ब्रह्मा ममतः पतयश्चापि इमे दुर्लभाः अमोघोनुग्रहो यस्य दर्शनं तपस्त तंत हाह एवमित्यादिना सर्वेषां सत्वानां प्राणिजातीनां ये पतयः तान् त्रिविष्टपं स्वर्गं ।

श्रीनारद उवाच एवं वृतः शतधृतिर्हिरण्यकशिपोरथ प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १ ब्र॰ वा॰ ताते मे दुर्लभा पुंसां यान् वृणीषे वरान्मम तथापि वितराम्यंग वरान् यद्यपि दुर्लभान् २ ततो जगाम भगवानमोघानुग्रहो विभुः पूजितो सुरवर्येण स्तूयमानः प्रजेश्वरैः एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः देवासुरमनुष्येंद्रान् गंधर्वगरुडोरगान् सिद्धचारणविद्याधरान् ऋषीन् पितृपतीन् मनून् यक्षरक्षपिशाचेशान् प्रेतभूतपतीनथ सर्वसत्वपतीन् जित्वा वशमानीय विश्वजित् जहार लोकपालानां स्थानानि सह तेजसा देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिपिष्टपं महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् यत्र विद्रुमसोपाना महामारकता भुवः यत्र स्फाटिककुड्यानि वैडूर्यस्तंभपंक्तयः यत्र चित्रवितानानि पद्मरागासनानि च पयःफेनसमाः शय्या मुक्तादामपरिच्छदाः कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः ११

अध्यास्ते स्म अधिष्ठितवान् तत्र च महेंद्रभवनमध्युवास अधिवसति स्म अखिलर्द्धिमत् ऋद्धयः उज्जितः मधिकं चडं तिब्रशारा नंसया श्रृंगहे राजन् ऊरुगंधिना ११

तस्येत्यादिना गुणैर्महान् । भूतगुणानेवाह । महदुपासकः इत्यादिना सत्यसंधा प्रतिज्ञा यस्य एक एव ॥ प्रियश्च सुहृत्तमश्च सम्यक्हिता॥
आर्याणां मंघ्रयो येन ईश्वर इति भावना यस्य विसने षु नोद्विग्नचित्तः । गुणेषु विषये षु निस्पृहः । यतस्तेषु ऽवस्तुदृक् । दांतइंद्रियाद्

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ॥ प्रह्लादोभूत महांस्तेषां गुणैर्महदुपासकः ॥ ब्रह्मण्यशील संपन्नः सत्यसं
धोजितेंद्रियः ॥ आत्मवत्सर्वभूतानामेकप्रियसुहृत्तमः ॥ दासवत्सन्नतार्यांघ्रिः पितृवद्दीनवत्सलः ॥ भ्रातृवत्सदृ
शे स्निग्धो ॥ गुरुष्वीश्वरभावनः विद्यार्थरूपजन्माढ्यो मानस्तंभविवर्जितः ॥ नोद्विग्नचित्तो विसनेषु निस्पृहः ।
श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ॥ दांतेंद्रियप्राणशरीरधीः सदा ॥ प्रसांतकामो रहितासुरोसुरः । यस्मिन्मह
द्गुणा राजन्गृह्यंते कविभिर्मुहुः ॥ नते धुनापिधीयंते यथा भगवतीश्वरे ॥ यं साधुगाथासदसि रिपवोपि सुरान्नृ
प प्रतिमानं प्रकुर्वंति किमुतान्ये भवादृशाः । गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते । वासुदेवे भगवति यस्य नैस
र्गिकी रतिः ॥ न्यस्तक्रीडनको बालो । जडवत्तन्मनस्तया कृष्णग्रहगृहीतात्मा । न वेद जगदीदृशं आसनः पर्यटन्नश्न
न्शयानः प्रपिबन् ब्रुवन् ॥ नानुसंधत्त एतानि गोविंदपरिरंभितः ६० ॥

योयस्य रहितश्च असुरो भावो मत्सरादिर्यस्य असुरोपि सन् । तन्मनस्तया तद्दैकचित्तत्वेन । एतानि आसनादीनि गोविंदेन परिरंभितः ॥
आत्मना एकीकृतः ६० ॥

निर्ज्जिताः ककुभो येन यथोपयोषं ॥ यथाप्रीति ॥ अरूपा आकृतिरहिता ॥ मम दर्शनं श्रवणं सर्वेषां श्रेयसां उत्पत्तये प्राप्तये न तु देवा

स इत्थं निर्ज्जितककुबेकराट् विषयान्प्रियान् ॥ यथोपयोषं भुंजानो नातृप्यदजितेंद्रियः ॥ एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्त्तिनः ॥ कालो महान्व्यतीताय ब्रह्मशापमुपेयुषः तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः ॥ अन्यत्रालब्धशरणाः ॥ शरणं ययुरच्युतं तस्मै नमोस्तु काष्ठायै ॥ यत्रात्मा हरिरीश्वरः ॥ यद्गत्वा न निवर्त्तंते शांताः सन्यासिनोऽमलाः ॥ इति ते संयतात्मानः समाहितधियोऽमलाः ॥ उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥ तेषामाविरभूद्वाणी अरूपा मेघनिस्वना सन्नादयंती ककुभः साधूनामभयंकरी ॥ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ॥ मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् ॥ तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत ॥ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः ॥ स वा आशु विनश्यति ॥ निर्वैराय प्रशांताय महात्मने प्रह्लादाय यदा द्रुह्येत हनिष्येऽपि वरोर्जितं ॥ २९ ॥ श्रीनारद उवाच ॥ इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ॥ निवर्त्तंत गतोद्वेगा मेनिरे चासुरं हतं ॥ ३० ॥

दितिद्वेषो यस्य विनाशो नास्त्ववरेणोर्जितत्वात् ॥ तत्राह निर्वैरायेति सर्वमहं सहेत मद्भक्तद्रोहमिति भावः ॥ तमेव द्वेषं वक्तुमादौ सुतस्य महत्त्वमाह ॥ ३० ॥

अनुवशान् अनुकूलान् साधन् अत्र आगतो यावान् गुरुः पितेव देवताये यां ॥ तानुद्दिश्य पाद्यं न कुर्वतीति किमुत्र वक्तव्यमित्यर्थः पुत्राय
पुत्र मुग्धरूप पितुर्द्वेषः । पित्राकृतो द्वेषः पुत्रस्य मरणाय प्रयोजितः । प्रवर्तितः इति यत् एतत् कौतूहलं विधम अपाकुरु पद्या
घ्य स्मात् पुत्राय यो द्वेषः स पितुर्मरणाय प्रयोजितः । अत एव कौतूहलं विधमेत्यर्थः । इति सप्तमे चतुर्थे । पंचमे गुरुतो धातं त्यक्ता
विष्णुस्तुतौ रतो । घातय द्विपसर्प्याद्यैः सुतं दैत्यो न चाशकत् तन्न भवद्भक्तिरेव द्वि द्वेषकारणमिति वक्तुमाह योरोहित्य पित्यादिना का
य

किमुतात्मवशान् शाधि स्वाद्दृन्न गुरुदैवतान् एतत्कौतूहलं ब्रह्मन् ॥ अस्माकं विधमन् प्रभो पितुः पुत्राय यद्द्वेषो मरणा
य प्रयोजितः ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्थोध्यायः ॥ ४ ॥ श्रीनारद उवाच ॥ पौरोहित्याय
भगवान् वृतः काव्यः किलासुरैः संडामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ॥ १ ॥ तौ राज्ञा प्रापितं बालं प्रह्लादं नयको
विदं पाठयामासतुः पाठ्यान् ॥ अन्यांश्चासुरबालकान् यत्तत्र गुरुणा प्रोक्तं शुश्रुवेनुपपाठ च ॥ न साधु मन
सा मेने स्वपरासद्ग्रहाश्रयं ॥ एकदासुरराट् पुत्रमंकमारोप्य पांडव ॥ पप्रच्छ कथितां वत्स मन्यते साधु यद्भवान् ॥ प्र
ह्लाद उवाच ॥ तत्साधु मन्येसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ॥ हित्वात्मपातं गृहमंधकूपं वनं ग
तो यद्धरिमाश्रयेत ॥ ५ ॥

षंडामर्कौ सुतौ तत्र वसतामिति शेषः पाठ्यान् ... दंडनीत्यादीनि पाठ्यान् असुरबालकान् । इति
वान्वयः अनुश्रवणानंतरं तत्रैव पपाठ च किं तत्साधु न मेने अत्र हेतुः स्वः पर इति सद्ग्रहो मिथ्याभिनिवेश एव आश्रयो य
स्य तत् । हे असुरवर्य । असद्ग्रहात् ममेति मिथ्याभिनिवेशाद्धेतोः समुद्विग्नधियां वनं गतः । हरिमाश्रयेति यत्तत्

वाहं साधु मेने कथंभूतं गृहं हित्वात्मनः पातं अधःपातः नि
मित्तं कुतः अंधकूपान्तमोहावहं ५ ॥

रुदतीरोदितिवैकुंठस्यचिंतयाशवलयाव्याप्तिश्चाहृतिताचेतनायस्यतस्यचिंतयाह्लादोयस्यसउत्कंठमुत्कंठोसन्ननुचकारता
हुसादिकं चरच यंकृतवान् ।४२। संस्पर्शस्तद्भावापतिः तेननिर्वृतः अस्पंदः स्थिरोयप्रणायस्तेनयः ।आनंदस्तेनःपतत्सलिलं ते
नयुक्ते आमिलिते नयुक्ते आमिलितेईक्षणेयस्य ।४४। आत्मनःपरांनिर्वृतितित्वन ।दुःखेनदीनस्यानस्यापिमनःसमसांतविधात्

क्वचिद्रुदतिवैकुंठचिंताशवलचेतन ॥क्वचिद्धसतितच्चिंताह्लादउद्गायतिक्वचित् ॥४०॥ नंदतिक्वचिदुत्कंठोवि
लज्जोनृत्यतिक्वचित ॥क्वचित्तद्भावनायुक्तस्तन्मयोनुचकारह ॥४१॥ क्वचिदुत्पुलकस्तूष्णीमास्तेसंस्पर्शनि
र्वृतः ।अस्पंदप्रणयानंदसलिलामीलितेक्षणः ॥४२॥ सउत्तमश्लोकपदारविंदयोर्निषेवयाकिंचनसंग
लब्धया ॥तन्वन्परांनिर्वृतिमात्मनोमुहुर्दुःसंगदीनस्यमनंसमव्यधात् ॥४३॥ तस्मिन्महाभागवतेमहाभागे
महात्मनि ॥हिरण्यकशपुराजन्नकरोदघमात्मजे ॥४४॥ युधिष्ठिर उवाच ॥ देवर्षिएतदिच्छामोवेदि
तुंतवसुव्रतंयदात्मजायशुद्धायपितादात्साधवेह्यघं ॥४५॥ पुत्रान्विप्रतिकूलांस्वान्पितरःपुत्रवत्सलाः
उपालभंतेसिक्षार्थनैवाघमपरोयथा ॥४६॥

अघंद्रोहमकरोत्प्रथमाध्यायांते एतस्मेवार्थमितिविस्मयेन ।पुनःपृच्छति देवर्षइति तत्वतः ।तववाक्यमितिवासाधवेअघमत् सा
॥धोर्द्रोहंकृतवानिति ।आहिंपतिश्र्व्यंतुनेवकुर्वतीअपरःशत्रुरिव ।४८॥

ना० सं०
२१

नेदसामत्वं दर्शयन्नाह। स एष परमात्मैव स्वः पर इति वा अविवेकिभिर्निरूप्यते युक्तं चैतत्। यतः यस्य वर्त्मनि जिज्ञासायां ब्रह्मादयो
पि मुह्यति। तत्र हेतुः दुरत्ययः दुर्घटः अनुक्रमणं अनुचरितं अनुवर्त्तनं वा यस्य सः। १३। ननु निर्विकारस्य कथं मतिभेदकत्वं त
त्राह यथा अयो लोहं। आकर्षस्यायस्कांतस्य समीपे स्वयमेव भ्रमति एवं मच्चेतिस अच्युतपाणेः सन्निधिरेव केवलं तत्र त्वाह
यदृच्छया तिकस्य तपोदानादेः। फलमेतद्भिन्नं ज्ञायत इत्यर्थः। १४। राजसेवकः उवाचेति शेषः। १५। वेत्रं कसा चतुर्वर्णोपायो

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते॥ मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष
भिनत्ति मे मतिं॥१३॥ यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्षसंनिधौ॥ तथा मे भिद्यते चेत श्चक्रपाणे।
र्यदृच्छया। १४॥ एतावद्ब्राह्मणायोक्त्वा विर[राम] महामतिः॥ तं निर्भर्त्स्याथ कुपितः सदीनो राजसेवकः
॥१५॥ आनीयतामरे वेत्रमस्माकमयसस्करः॥ कुलांगारस्य दुर्बुद्धेः चतुर्थोस्योदितो दमः॥१६॥
दैतेयचंदनवने जातोयं कंटकोद्रुमः॥ यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः॥१७॥

नां साम दाम भेद दंडानां मध्ये चतुर्थो दंड अस्य दुर्बुद्धेरुदितः। उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्यांगारवन्नाशहेतो कृतः स्ता
न्नाह। १६। दैत्येया चंदनवनद्रुमास्तेषां वनेत्र यं कंटकद्रुमास्तेषां वने अयं कंटकद्रुमा तुल्यो जातः वाह यस्य दैत्यवनस्य मूलोन्मू
लपरशुस्थानी यस्य विष्णोः अयं अर्भक एव नालायित। नालमिवाचरत्। यथा परशोः छेदकत्वेव मूलादि द्रुमनिर्मूले दंडः
सहकारी ते बिना छेदनी संभवात तथा अयं विष्णो दैत्यमूलछेदहेतुर्जात इत्यर्थः॥२७॥

म

२१

परपक्षे विपक्षे समाहिता परिनिष्ठिताः। हासमेवाह॥ बुद्धिरिति ६। विष्णुपक्षैर्भगवद्भक्तैर्हेतुः। ननु त्वद्गृहे कुतस्तेषां प्रवेशः। सत्यं तथापि प्रतिछन्नैर्वेषांतरेणाच्छन्नैः। ७। दैत्येगृहमानीतं। ८। बालान् सर्वान् अतिक्रम्य तुभ्यं तव। अहो मायामोहिताः भवंतो मम द्विषंतीत्या शयेन तावदाह पर स्वश्चेति मिथ्याभिनिवेशो यदिययमायैव कृतः। न तु वास्तवः। अत एव तया विमोहितबुद्धीनां भवतामेव दृष्टः न तु मम

श्रीनारद उवाच॥ श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः जहास बुद्धिं बालानां भिद्यते परबुद्धिभिः॥६॥ सम्यग्विधा रितां बालो गुरुगेहे द्विजातिभिः॥ विष्णुपक्षैः प्रतिछन्नैर्न भिद्येतास्य धीर्यथा।७। गृहमानीतमाहूय प्रह्लादं दैत्य याजकाः॥ प्रशस्य श्लक्ष्णया वाचा॥ समपृच्छंति सामभिः।८॥ वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृषा॥ बाला। नति कुतस्तुभ्यं मेष बुद्धिविपर्ययः॥९॥ बुद्धिभेदः परकृत उताहो ते स्वतो भवत्॥ भण्यतां श्रोतुकामानां गुरूणां। कुलनंदन॥१०॥ प्रह्लाद उवाच॥ परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः॥ विमोहितधियां दृष्टः तस्मै भगव ते नमः॥११॥ स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते॥ अन्य एष तथान्योहं माति भेदगतासती।१२॥ श्री॥ ॥

तस्मै अचिंत्यमायैश्वराय नमः।११। अहो किमेतत्प्रलपसि। तव बुद्धिर्भेदो यतो जातः। तत्कथयेत्याद्विषः सन तत्प्रसादादेवेत्युत्तरमाह त्रिभिः सभगवान् यदा अनुव्रत अनुकूलो भवति तदा पशुतुल्यानामिव बुद्धिर्भेदगताऽसती मिथ्या विषयाविभिद्यते अभिन्नात्मनिष्ठा भवति।१२॥

संतिहीति ॥ दुष्टं मैत्रं मित्रत्वं येषां ते षां रोग इति ॥ ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदंतकः स्वर्णहारी तु कुनखी ॥ दुश्चर्मा गुरुतल्पग इत्यादि स्मृत्युक्तः पातकानां यथा रोगो यथोदेत्ति तथा तेषामघं द्वेषादिकमुदेतीत्यर्थः ॥ २७ ॥ मत्प्रणीतं मया पाठितं नोऽस्मभ्यं कृतकुश्चितं दोषमास्म अहाः अज्ञागमः । आर्षः मपि दोषारोपमाकृथाः । इत्यर्थः । इज्याओ इति नहि आस्सरोऽकुतवकोपदु

संति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ॥ तेषामुदेत्यघं काले रोग पातकिनामिव ॥ २७ गुरुपुत्र उवाच ॥ न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ॥ नैसर्गिकीयं मतिरस्य राजन् नियच्छ मन्युं कुददाः स्म मा नः ॥ २८ ॥ नारद उवाच ॥ गुरुणैवं प्रतीप्रोक्तो भूय आह सुरः सुतं ॥ न चेद्गुरुमुखीयं ते कुतोऽभद्रा सती मतिः ॥ २९ ॥ प्रह्लाद उवाच ॥ मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानां ॥ अदांतगोभिर्विशतां तमिस्रं पुनः पुनः श्चर्वितचर्वणानां ॥ ३० ॥

चितइति भावः ॥ २८ ॥ गुरुमुखा गुरुवाक्यजनिता विष्णुस्त्वन्नरूपा सती हे अभद्र ॥ आस्तामियं वार्त्ता भवादृशानां विषयात्मकानामत्रानधिकारादिति आशयेनाह ॥ मतिरिति परतः । गुरोः सतो वा मिथो वा अन्योन्यतः नाभिपद्येत न संपद्येत केषां गृहव्रतानां संकल्प इति कृत्यचिंता येषां अत एव । अदांतैरेव ते गोभिरिंद्रियैर्हेतुभूतैः ॥ तमिस्रं संसारं विशतां चर्वितस्यैव चर्वणं येषां पुनः । जन्ममरणादिकं येषां ॥ ३० ॥ नै

इतिप्रह्लादंभीषयन् ॥ धर्मार्थकामवर्गस्यप्रतिपादकंशास्त्रमध्यापयामास ॥१८॥ ज्ञातंज्ञेयमुपायचतुष्टयंयेनतंज्ञात्वादैत्येंद्रं
प्रतिमात्रामृष्टंउद्धृत्यस्नापितं ॥१९॥ पादसेवनंपरिचर्याअर्चनंपूजादास्यंकर्मार्पणंसख्यंतद्विश्वासादिआत्मनिवेदनंदे
हसमर्पणंयथाविक्रीतस्यगवाश्वादेर्भरणपालनादिचिंतानक्रियते । तथादेहंतस्मैसमर्प्यतच्चिंतावर्जनमित्यर्थः । इति

इतितंविविधोपायैर्भीषयंस्तर्जनादिभिः ॥ प्रह्लादंग्राहयामासत्रिवर्गस्योपपादकं ॥१८॥ ततःएनंगुरुर्ज्ञात्वाज्ञातज्ञेयचतुष्टयं ॥ दैत्येंद्रंदर्शयामासमातृमृष्टमलंकृतं ॥१९॥ पादयोःपतितंबालंप्रतिनंद्याशिषासुरः ॥ परिष्वज्यचिरंदोर्भ्यांपरमामाप निर्वृतिं ॥२०॥ आरोप्यांकमवघ्रायमूर्द्धन्यश्रुकलांबुभिः ॥ आसिंचन्विकसद्वक्त्रमिदमाहयुधिष्ठिरः ॥२१॥ हिरण्यकशिपुरुवाच ॥ प्रह्लादानूच्यतांतातस्वधीतंकिंचिदुत्तमं ॥ कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान् ॥२२॥ प्रह्लादउवाच ॥ श्रवणंकीर्त्तनंविष्णोःस्मरणंपादसेवनं ॥ अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनं ॥२३॥ इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा ॥ क्रियेतभगवत्यद्धातन्मन्येधीतमुत्तमं ॥२४॥ निसम्यैतत्सुतवचोहिरण्यकशिपुस्तदा ॥ गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिताधरः ॥२५॥ ब्रह्मबंधोकिमेतत्तेविपक्षंश्रयतासता ॥ असारंग्राहितोबालोमामनादृत्यदुर्मते ॥२६॥

नवलक्षणानियस्यांसाअव्यवधानेनचेद्भगवतिभक्तिः । क्रियेतसाचअर्पितैवसतीयदिक्रियेतनतुकृतासतीपश्चाद
र्प्यैत । तदुत्तममधीतं ॥ मन्येननुअस्मद्गुरोरधीतंइदंतंवामित्रत्वेनवर्त्तमानस्यापितवविरोधाचरणंनसंभवतिमि

वध्यत्वे हेतुः यतोयंमेत्रात्हाकुतोयेविह्नोः। पादावर्त्तेतितत्पदहृपातीत्यर्थः। अतः सएवायमित्यन्वयः॥ अहो विह्नुरप्यविश्चशनो
यंकिमितिश्चीह्नतवानित्याह॥ विह्नोवेति। ३५। अहोतडहो। ३६॥ ननुतवायमपत्यंकथंवध्यस्तत्राह॥ परोपिषौमधर्मिवहितंकचि
ततदपत्यमेवज्ञेयंसुतःसुदेहडोपिअहितश्चेतत्त्यामपस्वआस्तामतास्यस्पकथंज्ञंजमपियत। करचररागादितदा्यात्मनोहित

अयंमेचात्हासोयंहित्वाखानसुहृदोधमः। पितृव्यहंतुर्यःपादौविह्नोदासवात्त्वेतिः। ३५॥ विह्नोर्वासाध्वसो
किंतुकरिष्यतिसमंडसः॥ सौहृदंदुस्त्यजंपित्रोरहाद्यःपंचहायनः॥ ३६॥ परोप्यपत्यंहितकृद्यथौषधंस्वदेह
डोप्यामयवत्सुतोहितः॥ छिंद्यात्तदंगंयदुतात्मनोहितं शेषंसुखंडीवतियद्विवर्जनात्। ३७। सर्वैरुपायैर्हंतव्यः

शंनोडशायनाशनैः॥ सुहृल्लिंगधरःशत्रुःमुनेर्दुष्टानिवेंद्रियं॥ ३८॥ नैऋतास्तेसमादिष्टाभर्त्रावैश्रूलपाणयः
तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः। ३९। नदंतोभैरवंनादंछिंधिभिंधीतिवादिनः। आसीनंचाहनन्
श्रूलैःप्रह्लादंसर्वमर्मसु। ४०॥

चेत्तछिंद्यादेवेत्पर्थः॥ ३७। अतःसर्वैरुपायैर्हंतव्यःसंभोडोनोडनंभोडनादिकेसुविषादिप्रयोगैरित्यर्थः॥ यथाडुष्टमिंद्रियंमुनेः
शत्रुः। ३८॥ तिग्मास्तीक्ष्णादंष्ट्रायेषांकरालानिआस्यानियेषांतेचतेचताम्राणिसमश्रूणिशिरोरुहाश्चयेषांते। ४०॥

ननु श्रीकृष्णस्य परमात्मानंदरूपत्वात्तेपि न विस्मारा एव किं न स्युः। तदज्ञानादित्याह नत इति ये दुराशया विषयवासितांतःकरणास्ते हि वि
ष्णुं न विदुः। तत्र हेतुः। स्वस्मिन्नेवार्थः। पुरुषार्थो येषां तेषां गतिं गति गमिनं न तु तेपि गुरूपदेशाद्विष्णुं ज्ञास्यंति। तत्राह। वहिर्विषये ष्वर्थो
येषां तेषां ते वहिरर्थास्तानेव गुरुत्वेन मंतुं शीलं येषां ते अतः। अंधैरुपनीयमाना। अंधा यथा पंथानं न विदुः किं तु गर्त्ते पतंति। तथा तेपि
ईशस्य तंत्र्या दीर्घरज्ज्वां वेदलक्षणायां उरुणि दामानि ब्राह्मणादीनां नामानि यस्यां तस्यां काम्यैः कर्मभिर्बद्धा एव भवंति इत्यर्थः। त
दुक्तं विषयाविष्टचितानां विष्ण्वावेशः सुदूरतः। वारुणी दिग्गतं वस्तु व्रजन्नैंद्रीं किमाप्नुयात् इति। ३१॥ ननु च एको देवः सर्वभूतेषु

नते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये वहिरर्थमानिनः॥ अंधा यथांधैरुपनीयमाना वागीशतंत्र्यामुरुदाम्नि बद्धाः
॥३१॥ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः॥ महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत याव
त्॥३२॥ इत्युक्तोपरतं पुत्रं हिरण्यकशिपू रुषा॥ अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले॥३३॥ आहामर्षरुषाविष्टः
कषायीभूतलोचनः॥ वध्यतामाश्वयं वध्यो निःसारयत नैरृताः॥३४॥ श्री श्री श्री श्री श्री श्री श्री

गूढः॥ सर्वव्यापी सर्वभूतांतरात्मेत्यादि श्रुतिप्रतिपादितं विष्णुं कुतो न विदुः कुतो वा तेषां तन्निश्चयप्रवेशस्तत्राह नैषामिति। निष्किं
चनानां निरस्तविषयाभिमानानां महत्तमानां पादरजसा अभिषेकं यावन्न वृणीत तावत् श्रुतिवाक्यतो ज्ञातेपि एषां मतिरुरु
क्रमस्यांघ्रिं न स्पृशति न प्राप्नोति॥ असंभावनादिभिर्विहन्यत इत्यर्थः॥ अनर्थस्य संसारस्यापगमो यदर्थो यस्याः अदीनि स्पर्शिन्याः
मतेरर्थः प्रयोजनं महदनुग्रहाभावात्तत्त्वनिश्चयो नापि तु मोहस्तेषामित्यर्थः। ३२॥ निरस्यत निरस्यत् विक्षेप। ३३॥ अमर्षो सहनं
तेन सहितया रुषा आविष्टो व्याप्तः कषाईभूते अताम्रे लोचने यस्य हे नैरृताः॥३४॥

भा० स०
२०

अप्रमेयः ॥ अपरिमेयोनुभावो यस्य न कुतश्चिद्भयं यस्य न वा भविता ॥ अन्यथा मृत्युर्नैव भवतीत्यर्थः ॥ ४८ ॥ औशनसौ उशनसः पुत्रौ नीतिज्ञौ विविक्ते एकांते ॥ ४९ ॥ भ्रुवोर्विजृंभणेनैव त्रस्तानि धिष्ण्यानि यस्मिन् तस्य चिंत्यं न चक्ष्महे न पश्यामः ॥ पस्मालंबनेनैवास्तु यद्वा शिशूनां क्व तं गुणदोषयोः पदं विषयो न भवतीत्यर्थः ॥ तथापि तु बंधनमस्योचितमित्याहतुः ॥ ५० ॥ इमं त्विति ॥ यावद्गुरुरागमि

अप्रमेयानुभावोयमकुतश्चिद्भयोमरः ॥ नूनमेतद्विरोधेन मृत्युर्मेनुभविता न वा ॥ ४८ ॥ इति तं चिंतया किंचिन्
म्लानश्रियमधोमुखं शंडामर्कावौशनसौ ॥ विविक्त इति होचतुः ४९ जितं त्वयैकेन जगत्त्रयं भ्रुवो वि
जृंभणत्रस्तसमस्तधिष्ण्यं ॥ न तस्य चिंत्यं तव नाथ चक्ष्महे ॥ न वै शिशूनां गुणदोषयोः पदं ॥ ५० ॥ इमं
तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ॥ बुद्धिश्च पुंसो वयसार्यसेवया यावद्गुरुर्भार्गव
आगमिष्यति ॥ ५१ ॥ तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ॥ धर्मो ह्यस्योपदेष्टव्यो राज्ञां ये गृहमेधिनां ५२
धर्ममर्थं च कामं च नितरां चानुपूर्वशः ॥ प्रह्लादायोचतू राजन् प्रश्रयावनताय च ॥ ५३ ॥ यथा त्रिवर्गं गुरु
रुभिरात्मने उपशिक्षितं ॥ न साधु मेने तच्छिक्षां द्वंद्वारापवर्णितां ॥ ५४ ॥
मो

इति तावत्तु बद्ध्वा निधेहि ततः किं अतः । ऊचतुः । बुद्धिश्च समीचीना वयसा भवतीति ॥ ५१ ॥ अनुज्ञाय तथेत्यंगीकृत्य । ५२ । ततश्च प्र
ह्लादाय धर्मादिकमूचतुः । प्रश्रितश्चासाववनतश्च तस्मै ॥ ५३ । यथावत् त्रिवर्गमनुशिष्यतमपि साधु न मेने तेषां शिक्षा च कु
तः । द्वंद्वे रागद्वेषादिभिर्विषयेषु मेरणं ॥ येषां तैरुपवर्णितः ॥ ५४ ॥
व

रू

२०

परेईश्वरे युक्तः समाहित आत्मा मनो यस्य तस्मिन् तेषां अहारा अनंफलाः । जाताः तत्र हेतवः ब्रह्मणि निर्विकारे अनिर्देश्ये । अविषयेन
गवति निरतिशये स्वयं ॥ अखिलात्मनि शश्वत् आदिनामपि नियंतरि एवंभूते परे । अपुन्यस्यानिर्द्दिष्टे वस्तु सत्क्रयामहोद्यमा इति । ४२ ॥
४२ अभिचाराः कृत्यादयः । अवयातनानि गिरिशृंगादयः ॥ यातनानि तैरबुटादिषु सनिरोधैश्च । ४३ । पर्वताक्रमणैः पर्वतानां त
दुपरि पतनैः ॥ वक्ष्यवचैरभिचाराद्याः वृत्तिं दर्शयति । ४४ ॥ ततहननं कर्तुं नाभ्यपद्यत न आयनाशक्नोदित्यर्थः पुरुषं यथा नवति त

परेऽक्षरेऽपनिर्देश्ये भगवत्यखिलात्मनि ॥ युक्तात्मन्यफला आसन्नपुंसीव सत्क्रियाः । ४२ ॥ प्रयासेऽपहते तस्मिन्
दैत्येंद्रः परिशंकितः ॥ चकार तद्वधोपायान्निर्बंधेन युधिष्ठिर ॥ ४३ ॥ दिग्गजैर्दंदशूकेंद्रैरभिचारावपात
नैः ॥ मायाभिः सन्निरोधैश्च गरदानैरभोजनैः । ४४ ॥ हिमवाय्वग्निसलिलैः । पर्वताक्रमणैरपि ॥ न शशाक य
दा हंतुमपापमसुरः सुतं । ४५ ॥ चिंतां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥ एष मे बह्वसाधूक्तो वधोपायाया
श्च निर्मिताः ॥ ४६ ॥ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥ वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयं ॥ ४७ ॥
न विस्मरति मेनार्यं शुनःशेफ इव प्रभुः । ४७ ॥

योक्तः । ४५ । असद्धर्मैरपकारैर्व्यभिचारैर्वा अविदुरे वर्तमानोपि बालोप्ययं अजडधीः । निर्भयचित्तः । ४६ ॥ मे अनार्यं अनार्यं अनार्यत्वं
वान विस्मरति ॥ अजीगार्तस्य मध्यमपुत्रः ॥ शुनःशेपो यो नाम पित्रा स्वहरिश्चंद्राय विक्रीतः शन यथा तयोरपकारमविस्मरंस्तेहि
पत्नं । विश्वामित्रमाश्रित्य गोत्रांतरमाय ... स्तद्वत् यदा स्वभावापरित्यागे हृष्टांतः । शुनःशेफपुत्रमिवेति । ४७ ॥

ननुभोगोद्यमःकथंत्याज्यइतिचेत्तत्राहसुखमिति।सर्वत्रपश्वादावपिदैवात्पूर्वादृष्टादेव।अतस्तदर्थेप्रयासोनकर्त्तव्यः।यतःप्र
यासात्।परंकेवलमायुषोव्ययःएवयतःएवंतथातेनप्रकारेणक्षेमंनप्राप्नोति।४।ततःपुरुषंजडेतभयमाश्रितःपुरुषरूपंशरीरं
यावत्पुष्कलमस्तिनतुविपद्येत।अहंक्षेमंनभवेत।यावत्तन्नदृतिवा।तावच्छीघ्रंक्षेमायप्रयतेत।आयुर्व्ययक्रममाहपुंस।

सुखमैंद्रियकंदैत्यादेहयोगेनदेहिनां॥सर्वत्रलभ्यतेदैवाद्यथादुःखमयत्नतः॥३॥ततप्रयासोनकर्त्तव्योयत
आयुर्व्ययःपरं॥नतथाविंदतेक्षेमंमुकुंदचरणांबुजं॥४॥ततोयतेतकुसलःक्षेमायभयमाश्रितः॥शरीरं
पौरुषंयावन्नविपद्येतपुष्कलं॥५॥पुंसोवर्षशतंह्यायुस्तदर्धंचाजितात्मनः॥निष्फलंयदसौरात्र्यांशेतेधंप्रा
पितस्तमः॥६॥मुग्धस्यबाल्येकैशोरेक्रीडतोयातिविंशति॥जरयाग्रस्तदेहस्ययात्यकल्पस्यविंशति॥७॥दु
रापूरेणकामेनमोहेनचबलीयसा॥शेषंगृहेषुशक्तस्यप्रमत्तस्यापयातिहि॥८॥कोगृहेषुपुमान्शक्तमा
त्मानमजितेंद्रियः॥स्नेहपाशैर्दृढैर्बद्धमुत्सहेद्विमोचितुं॥९॥कोनर्थतृष्णांविसृजेत्प्राणेभ्योपियईप्सितः
यंक्रीणात्यसुभिःप्रेष्ठैःतस्करःसेवकोवणिक॥१०॥

इतित्रिभिःयद्यस्माच्छेते॥६॥विंशतिवर्षाणिचायुर्यातिदुरापूरेणदुःखेनसमंतात्पूर्यमाण।८।ननुयौवनेगृहासक्तोपिप
श्चाद्विरक्तःसन्क्षेमंप्राप्स्यतीत्याशंक्यतत्रसंभवदर्शयन्।कौमारएवाचरेदित्येतदुपपादयति।कोगृहेष्वितिसप्तभिःयं
अर्थान्असुभिःक्रीणातिप्राणहानिमंगीकृत्यापितस्करादिर्यंसाधयतितस्मिन्नर्थेकोन्वत स्माविसृजेत्।१०॥

परावृत्तः॥ अन्यत्र गतः सन्नुपकृतः संधिः पादस्पर्शार्थं क्रीडार्थं कृतलक्षणोः कृतोत्सवैलब्धावसरैरितिवा। ५५। ते बालानिस्पांडन्मम
रणादिलक्षणां विद्वान् ५६ दक्षारामाणामीरितेरोहितेष्वनङ्गूषिताधीर्यांतेयतोबाला। ५७। तस्मिन्नेवुन्यस्तंहृदयसीक्षणां चैये
। ५७ इतिसप्तमे पंचमोध्यायः ५॥ षष्टे गुरुगृहेवत्र प्रह्लादोदैत्यबालकान्। अनुकंपपरंतत्वंनारदोक्तमुपाविशत्। २ निर

यदाचार्यपरावृत्तो गृहमेधीयकर्म्मसु॥ वयस्यैर्बालकैस्तत्रसोपहूतः कृतक्षणैः॥ ५५॥ अथतान् श्लक्ष्णया
वाचाप्रत्याहूय महाबुधः॥ उवाचविद्वांस्तन्निष्ठांकृपयाप्रहसन्निव। ५६॥ तेतुतत्गौरवात्सर्वेत्यक्त
क्रीडापरिच्छदाः॥ बालानदूषितधियोद्वंद्वारामेरितेहितैः॥ ५७ पर्युपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः॥
ताहकरुणोमैत्रो महाभागवतोसुरः॥ ५८॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधे पंचमोध्यायः॥ ५॥
॥ श्रीप्रह्लादउवाच॥ कौमार आचरेत्प्राज्ञो धर्म्मान्भागवतानिह। दुर्ल्लभं मानुषं जन्म तदप्यध्रुवमर्थदं। १
यथाहिपुरुषस्येह विष्णोः पादोपसर्पणं॥ यदेषसर्वभूतानांप्रिय आत्मेश्वरः सुहृत॥ २॥

यैकक्रियालापैरायुर्व्ययमजानतां। प्रह्लादसदयं प्राह धर्म्मं भागवतं कृतं। ३ कौमार इत्यादि इहैव मानुषजन्मनि धर्म्मान्नाचरेत्
। यतोर्थदमेतत्। तत्र चकौमार एव यतस्तदप्यध्रुवं नचैवं ज्ञ्न्मांतरे यतः। पूर्वं धर्म्मा नेवाचरेत्। नसुखार्थं प्रयासात्। तच्च
भागतोते वनकाम्यान् इह भागवतानेव धर्म्मान् नाचरेदित्येतदुपपादयति। यथाहीतिचतुर्भिः इह पुरुषस्य विष्णोः पादोपसर्प
णं मेव यथानुरूपं॥ इहयोगमित्यर्थः॥ यदेषस्मात् एष यइत्यादि॥ २॥

ना० स०
२२

प्रत्युत चौर्यं करोतीत्याह । वित्तेष्विति । नित्यमभिनिविष्टं चेतो यस्य सः । परवित्तहर्तुः प्रेत्य नरकलक्षणं इह च दंडादिरूपं दो
षं यद्यपि विद्यात् । अथाप्यशांताभिलाषः । ततः परवित्तं हरत्येव २५ तदेवं कोऽटहे खुमानित्यादि सप्तभिः श्लोकैः रूपपादितं अ
हादिषु प्रसक्तस्यैव रागाद्यसंभावमुपसंहरति । विद्वानपीति स्वलोकाय आत्मपरामर्शाय न कल्पते । किंतु विमूढो यथा तथा
विद्वानपि तमसि अभिनिवेशमेव प्रपद्येत तत्र हेतुः यदिति स्वीयमिदं पारक्यमिदमिति भिन्नो भावो भावना यस्य सः । तस्मात् । कौमार
एव भागवतान् धर्मान् आचरेत् इति । २६ सहेतुकमुपसंहरति यतः कश्चिदपि क्लेशश्च आत्मानं मोचितुं न समर्थः । ततः श्रीनारायण

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः प्रेत्येह वाथाप्यजितेंद्रियस्तद् । अशांतकामो हरते कुटुंबी
॥२५॥ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन् स्वलोकाय न कल्पते वै ॥ यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत
यथा विमूढः ॥२६॥ यतो न कश्चित् क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः ॥ विमोचितुं कामदृशां विहारक्री
डामृगो यन्निगडो विसर्गः ॥२७॥ ततो विदूरात् परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु । उपेत नारायणमादि
देवं स मुक्तसंगैरिषितोऽपवर्गः ॥२८॥ न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ॥ आत्मत्वात्सर्वभूतानां सिद्ध
त्वादिह सर्वतः ॥२९॥

मुपेत शरणं यातेत्युत्तरेणान्वयः । असामर्थ्ये हेतुः अलं दीनोऽलं पटुः । अतः कामे ईश्यासां तासां विहारे क्री
डायां निमित्ते । क्रीडामृगविहारामिति पृथक् पाठे तासां विहारसाधनमात्मानं यतस्तासां क्रीडामृगः सइत्यन्वयः । किंच यत् यासु
निगडः शृंखलतुल्यो विसर्गः पुत्रादिरूपो भवति । विदूरात् दूरतः संगं परिहृत्य यक्षाः अविदूरात् शीघ्रमुपेत्यन्वयः । यस्मा
त् स एवापवर्ग इष्टः । २८ बालानामस्माकं तद्भजनं मन्त्राशक्यं चेत् तत्राह । नहीति । बह्वायासः अतिप्रयासः । २९ ॥

पु
शो
ते २२

किंच कथमित्यादि प्रियाया या संगादिकं स्मरन्। कथं त्यजेदिति तृतीयेनान्वयः मंत्रान् हि लत्रीभ्यालापान्। सुहृत्सु च संगः स्तेषां स्नेहेन सितो वद्धः कलानि मधुराणी अक्षराणी येषां तेषां च संगतेष्वनुरक्तं चित्तं यस्य ११। ताः स्वसुरः। १२ गृहे स्थिताः हृदय्या हृदयप्रमाः। मनोज्ञाः उरवः परिच्छदा येषु तान्। वृत्तं डीवकाः कुल्याः कुलपरंपरागताः १२। कोशस्कृताः कोशस्कारी कीटः सपथा

कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान्॥ सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः॥ पुत्रान् स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ॥ गृहान् मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान्। १२॥ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः॥ औपस्थ्यजैह्व्यं बहु मन्यमानः॥ कथं विरज्येत दुरंतमोहः॥ १३॥ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहितं प्रमत्तः॥ सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः। १४॥

गृहं कुर्वन् आत्मनो निर्गमाय द्वारमपि नावशेषयति। तथा कर्माणीह॥ मानः नन्वविलप्तकामोपि दोषदर्शनेन विरक्तः स न त्यजेत् तत्राह॥ औपस्थ्यं शिश्नजैह्व्यं च सुखं तदेवाधिकं मन्यमानः। अतो दुरंतो मोहो यस्य सः कथं विरज्येत विरक्तः स्यात्। दुरंतमोहत्वं दर्शयन्नाह कुटुंबपोषणाय वियत् क्षीयमाणं निजमायुः। पुरुषार्थं च विहितं न बुध्यते। अत एव तापत्रयेण दुःखितं तन्निहितोपि न निर्विद्यते दुःखबुद्धिं न करोति यतः स्वकुटुंबे रामो रतिर्यस्य सः १४॥ आराधाकृष्णायनमः।

ततः किमत आह ॥ तुष्टे च तत्र तस्मिन् किमलभ्यं तथापि गुणपरिणामाद्दैवादेव स्वतः सिद्धा अलं ततः सिद्धैर्धर्मादयस्तैः किं
अगुणेन च मोक्षेण कांक्षितेन न किं तमुपगायतां नोऽस्माकमकांक्षितस्यापि तस्य सिद्धेः । यद्वा मास्तु मोक्षः । तस्य चरणयोः
सारं युषां मृग्यं सेवमानानां तेनापि किमित्यर्थः । २५ । ननु च धर्मादेर पुरुषार्थत्वे विवि मित्याचार्यैस्त्वयां छंदोक्तत्वेन सत्या
एवाभिहितः ॥ तत्राह धर्मार्थकाम इति यस्त्रिवर्गः ॥ तदर्थं च ॥ ईक्षाद्या अभिहिता ईक्षा आत्मविद्या त्रयी कर्मविधान

तुष्टे च तत्र किमलभ्यमनंत आद्ये ॥ किं तैर्गुणव्यतिकरादिह ये स्वसिद्धा ॥ धर्माद
यः किमगुणेन च कांक्षितेन ॥ सारं युषां चरणयोरुपगायतां च ॥ २५ । धर्मार्थकाम इति
योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता ॥ मन्ये तदेतदखिलं निगमस्य स
त्यं ॥ स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः । २६ ॥

पादमौ तर्कौ दंड नीति अवि विविधा च वार्ता जीविका । तदेतत्सर्वं निगमस्य अर्थजातं स्वसुहृदः ॥ स्वांतर्यामिणः परस्य पुं
सः स्वात्मार्पणसाधनं चेत् तर्हि सत्यं मन्ये सत्यपरत्वात् ॥ अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यवि
षयस्य प्रतिपाद्यं मा(न्)ये सत्यं पुनः । निस्त्रैगुण्यतल्लक्षणं परमस्य पुंसः । स्वात्मार्पणमेवेत्यर्थः । तदुक्तं भगवता त्रैगुण्य
विषया वेदा निस्त्रैगुण्यो भवार्जुनेति । २६ ॥

आत्मत्वात्सर्वत्रसिद्धित्वादितिचहेतु॥द्वयमुपपादितिपरावरेष्विति चतुर्भिः॥ब्रह्माअंतोयेषांते।स्थावरआदिर्येषांतेषुउच्चावचेषुघ
टादिषु महत्सुचभूतेष्वाकाशादिषु।१९।गुणसाम्येप्रधानेगुणव्यतिकरे॥महतत्वादौचपरःब्रह्मस्वरूपः।२१।ननुकथंत
र्हिदेहेषुदेहरूपभोक्तृभोग्यादिभेदभानमायत्याह।प्रत्यगात्माद्रष्टाभोक्तातत्स्वरूपेणव्यापकः।तयानिर्देश्यःदृश्यरूपेणभोग्यंदेहा

परावरेषुभूतेषुब्रह्मांतस्थावरादिषु॥भौतिकेषुविकारेषुभूतेष्वपिमहत्सुच॥२०॥गुणेषु
गुणसाम्येगुणव्यतिकरेतथा॥एकएवपरोह्यात्माभगवानीश्वरोव्ययः॥२१॥प्रत्यगात्म-
स्वरूपेणचस्वयंव्याप्यव्यापकनिर्देश्यो॥ह्यनिर्देश्योविकल्पितः॥२२॥केवलानुभ-
वानंदस्वरूपपरमेश्वरः॥माययांतर्हितैश्वर्यईयतेगुणसर्गया॥२३॥तस्मात्सर्वेषुभू-
तेषुदयांकुरुतसौहृदं॥भावमासुरमुन्मुच्ययययातुष्यतिधोक्षजः॥२४॥

दृश्यरूपेण

णा
दितद्रूपेणचव्याप्यतयानिर्देश्योमाययाईयतइत्युत्तरेणान्वयः॥वस्तुतस्तुस्वयंअविकल्पितः।अनिर्देश्योपिसन्॥य
द्वाव्यापकनिर्देश्योप्येवंनिर्देश्यःसेनविकल्पितः।इयतइत्यन्वयः।२२।यतःकेवलोअनुभवात्मकः।आनंदएवस्वरूपंयस्यतेनतु
सर्वचेत्॥सर्वत्रतर्हिसर्वज्ञत्वाद्युपलभ्येततत्राह।गुणात्मकःसर्गोयस्यासागुणसर्गा।तयामाययाअंतर्हितमैश्व
र्यंयेनसः।२३।यस्मादेवंतस्मात्सर्वेषुयथोचितांदयांसौहृदंचकुरुत।ययाअधोक्षजःतुष्यति।२४॥

सप्तमे मातृगर्भस्थेस्वस्मिन्नारदभाषितं ॥ प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये १ ॥ अथ आविनारदादेतत्तन्मया गर्भे श्रुतीरितां त तत्प्रस्तावकथामाहः यद्यैः पौत्रसभिः सुधीः २ ॥ अस्माकं पितरि हिरण्यकशिपौ स्वक्षेत्रे नैव पापोसौ अनद्रि मन्दरत शति इत्येषेण ६

श्रीनारद उवाच ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोसुरः ॥ उवाच स्मयमानस्तान्स्मरन्मदनुभाषितं ॥ १ ॥ नारद उवाच ॥ पितरि प्रस्थितेस्माकं तपसे मंदराचलं ॥ युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥ २ ॥ पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः ॥ पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥ तेषामपि वल्गोद्योगं निशम्यासुरयूथपाः ॥ वध्यमानासुरैर्भीता दुद्रुवुः सर्वतो दिशं ॥ ४ ॥ कलत्रपुत्रवित्ताप्तान् गृहान्पशुपरिच्छदान् ॥ नावेक्ष्यमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥ व्यलुंपन्राजशिबिरममरा जयकांक्षिणः ॥ इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६ ॥ नीयमानां भयोद्विग्नां रुदंतीं कुररीमिव ॥ यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥ प्राह नैनां सुरपते नेतुमर्हस्यनागसं ॥ मुंच मुंच महाभाग सतीं परपरिग्रहां ॥ ८ ॥ इंद्र उवाच ॥ आस्तेस्या जठरे वीर्यमविषह्यं सुरद्विषः ॥ आस्यतां यावत्प्रसवं मोक्ष्येर्थपदवीं गतः ॥ ९ ॥ श्रीनारद उवाच ॥ अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ॥ त्वया न प्राप्स्यते संस्थामनंतानुचरो बली ॥ १० ॥

वद्दंतो युद्धोद्यमं चक्रुः ३ ॥ राज्ञः शिबिरं आवासं व्यलुंपत सर्वस्वाहारेण नासि मार्हसीति प्राह ॥ अविषह्यं दुःसहं अतः अनया प्रसवपर्यंतं मत्स्यतां ततश्च अर्थस्य पदवीं मार्गं गतः प्राप्तः सन् जातं पुत्रं हत्वा मोक्ष्यामीति इत्यर्थः साक्षात् सगुणैरेव महान् ॥ ननु पित्रादिसंबंधात् त्वया हेतुं नूतेन संस्थां मृत्युं न यास्यति तत्र हेतुः निष्किल्बिष इत्यादि यः ॥ १० ॥

तेषां विश्वासार्थं गुरुसंप्रदायमाह ॥ ज्ञानमिति ॥ ननु यत्र नारदः श्रोता तत्र कुतो मादृशानामधिकार इति मा माशंकेत्याह । भगव
त एव एकांतिनां भगवतानां यत्पादरजः । तेन आप्लुतानां देहिनां सर्वेषामपि तज्ज्ञानं स्यात् न तत्तुल्यमानानामेवेति नियमः । अत एव म
यापि नारदात् श्रुतं विज्ञानसंयुतं अनुभवसंयुतं धर्मं च श्रुतं २८ तत्राति विस्मिताः पृच्छंति प्रह्लादेति एताभ्यामृते अ

६

ज्ञानं तदेतममलं दुरवापमाह ॥ नारायणो नरसखः किल नारदाय ॥ एकांतिनां भगवतस्तदकिंचनानां पा
दारविंदरजसाप्लुतदेहिनां स्यात् ॥ २७ ॥ श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतं ॥ धर्मं भागवतं शुद्धं नारदाद्दे
वदर्शनात् ॥ २८ ॥ दैत्यपुत्रा ऊचुः प्रह्लाद त्वं वयं चापि न चान्यं विद्महे गुरुं ॥ एताभ्यां गुरुपुत्राभ्यां बाला
नामपि हीश्वरौ ॥ २९ ॥ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः ॥ छिंधि नः संशयं सौम्य स्याच्चेद्वि
श्रंभकारणं ॥ ३० ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते नाम षष्ठोऽध्यायः ॥ ६ ॥

कार

स

गुरुं न विद्मः ॥ एतदागमात् पूर्वमेवाहं नारदपार्श्वं गत इति चेत् तत्राहुः ॥ बालानामपि अतिशिशूनामप्यस्माकमेतावीश्वरौ नि
यंतारौ अतस्तवान्यत्र गमनं न संभवति ॥ २९ ॥ स एवागत इत्यपि न संभवतीत्याहुः बालस्येति दुरन्वयः दुर्घटः विश्रंभका
रणं विश्वासहेतुः ॥ ३० ॥

तदेवं देहधर्म्मैस्तद्वैलक्षण्येन ॥ आत्मनो देहाद्भेदो दर्शितः ॥ इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदाह । करादिकं त्वापादयति आत्मा नित्यः अविनाशी वा अरेऽयमात्मेति श्रुतेः । अव्यक्तः अप्स्वयुस्त्यः स्ते चोऽमृते परमे व्योमन्निति श्रुते । शुद्धः निरवद्यं निरंजनं इति श्रुते । एकमेवाद्वितीयमिति श्रुतेः ॥ क्षेत्रज्ञः । विज्ञातारमरे केन विजानीयादिति श्रुतेः ॥ आश्रयः । अस्मिन् द्यौः पृथ्वी चांतरिक्षमिति श्रुते । अविक्रियः निष्कलं निष्क्रियं शांतमिति श्रुतेः । स्वदृक् आत्मज्योतिः सम्राड् इति होवाचेति श्रुते हेतुः स इमान् लोकान् सृ-

आत्मनित्योव्ययः सुद्धः एकः क्षेत्रज्ञ आश्रयः ॥ अविक्रियः स्वदृग्हेतुर्व्यापकोसंगिनावृतः ॥ १९ ॥
एतैर्द्वादशभिर्विद्वान् आत्मानो लक्षणैः परैः ॥ अहं ममेति सद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥
स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ॥ क्षेत्रेषु देहेषु तथात्मयोगैर
ध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥

ज्ञातेति श्रुतेः । व्यापकः सत्यं ज्ञानमनंतमिति श्रुतेः ॥ असंगी असंगो ह्ययं पुरुष इति श्रुतेः । अनावृतः पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति । १९ । परैः श्रेष्ठैर्विवेकसमर्थैः ॥ देहाद्भेदं विद्वान् असद्भावं मिथ्याबुद्धिं ॥ नन्वेवं विविक्तात्मज्ञानिनोप्यपरोक्षानुभवेन ब्रह्मता प्राप्तिः ॥ कथं स्यात् यतो अहंकारादिकं त्यक्तुं दित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टांतमाह । २० ॥ स्वर्णकार क्षेत्रेषु स्वर्णाकरेषु ग्रावसुः योगैः धमनाद्युपायैस्तदुपायाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् आत्मयोगैः । आत्मप्राप्त्युपायैः । ब्रह्मगतिं ब्रह्मतां अध्यात्मवित् आत्माधिकृतकार्यकारणसंघातज्ञाता । २१ ॥

अनंतस्य प्रियो यो हं स च प्रियो यस्य तस्य मम भक्त्या रागतां प्रद्देशेनांगीकृत्य ॥२२॥ इहोष्यतामित्याहेति शेषः ॥२३॥ अंति समीपे अंतर्वर्त्ती गर्भिणी इच्छया भर्तुरागमनानंतरं प्रसूतये ॥ स्वगर्भस्य क्षेमाय ॥२४॥ तस्य ऋषेः ते धर्मस्य तत्त्वं भक्तिलक्षणं ज्ञानमात्मनात्मविवेकः ईश्वरः समर्थः भूयात् भवेत् वैशारदीश्वाधीतद्धितः । देहाद्यहंकारछेदनिपुणेत्यर्थः । कासौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव

इत्युक्तस्तां विहायेंद्रो देवर्षेर्मानयन्वचः ॥ अनंतप्रियभक्त्यैतां परिक्रम्य दिवं ययौ ॥२२॥ ततो नो मातरमृषिः समानीय निजाश्रमं ॥ आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः ॥२३॥ तथेत्यवात्सीद्देवर्षेरंति साप्यकुतोभया ॥ यावद्दैत्यपतिर्घोरात्तपसो नन्यवर्त्तत ॥२४॥ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती । अंतर्वत्नी स्वगर्भस्या क्षेमायेच्छाप्रसूतये ॥२५॥ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः ॥ धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मं ॥२६॥ तत्तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे ॥ ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः ॥२७॥ नवतामपि भूयान्मे यदि श्रद्दधते वचः ॥ वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥२८॥ जन्माद्याः षडिमे नावा दृष्टा देहस्य नात्मनः ॥ फलानामिव वृक्षस्य कालेनेश्वरमूर्त्तिना ॥२९॥

देहात्मविवेकप्रकारमाह ॥ इत्यमिः जन्माद्या जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवं भूता षड्भावविकाराः वृक्षे सत्येव यथा फलानां दृश्यंते तद्वदात्मनि । तथैव स्थिते देहस्य दृष्टा इत्यर्थः । ईश्वरो विकारसमर्थो मूर्त्तिर्यस्य तेन ॥२९॥

भा० स्क०
२६

विमर्शप्रकारमाह ॥ बुद्धेरितिद्वाभ्यां अध्यक्षः साक्षी ॥ २५ । अतएभिर्बुधैर्बुद्धैः परिणामैः पर्यस्तैः परितः क्षिप्तैः आत्मधर्मत्वे
ननिरस्तैः बुद्धिधर्मत्वहेतुः त्रिवर्णैस्त्रिगुणात्मकैः क्रियोद्भवैः कर्मोद्भवैः बुद्धेरेवत्रिगुणात्मकत्वात्कर्मकर्तृत्वाच्चतस्याएवैता
अवस्थाआत्मानुवृत्त्यन्वयात् । तदवस्थावानित्यमातिनतत्वत इत्यात्मनः स्वरूपं बुध्येत ज्ञानीयादित्यर्थः । अर्हक्षातः कुसु
मधर्मैर्जंधैस्तदा अयं वायुमिव ननु तर्हि यथा कुसुमोपाधिकोपि वायोर्गंधस्त्वविवेकज्ञानेन निवर्तते । एवमात्मनः संसारोनि

३

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ॥ ता येनैवानुभूयंते सोध्यक्षः पुरुषः परः ॥ २५ ॥ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धि
लैर्द्वैः क्रियोद्भवैः स्वरूपमात्मनो बुध्येत् गंधैर्वायुमिवान्वयात् ॥ २६ । एतद्द्वारो हि संसारो गुणकर्मनिबंधनः ॥ अ
ज्ञानमूलोपार्थोपि पुंसः स्वप्न इवार्प्यते ॥ २७ । तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनां ॥ बीजनिर्हरणं योगः
प्रवाहोपरमो धियः ॥ २८ ॥

वर्त्ततेत्याशंक्याह ॥ २६ ॥ एतद्द्वार बुद्धिद्वार क~~सतदवस्थाद्वारक~~स्तदवस्थाद्वारकोवानस्वतः । हिय
स्मात् बुद्धेर्ये गुणाः । कर्माणि च तैर्निबध्यते ॥ तथा सचाज्ञानमूलः अतः । अपार्थो मिथ्याभूतोपि स्वप्नवदर्प्यते वायुक्रांगं
धवत् द्रव्यसंबंधस्याभावात्तुल्यत्वादिति मोहस्यातः ॥ २७ । यस्मादेवं निवृत्ति घटते तस्मात् । बीजमज्ञानं तस्य निर्हरणं दहनं कृता
तद्योगः ॥ कथंभूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा । २८ ॥

२६

अध्यात्मविवेकमात्माप्राप्त्युपायमाह । अष्टाविति त्रिभिः । मूलप्रकृतिः । महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ प्रकृतयः सत्वादयः
ते च प्रकृतिगुणाः एव न तु भिन्नाः एकादशेंद्रियाणि पंच महाभूतानि चेति षोडश । पुमानात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः
एकत्वे हेतुः एषु साक्षित्वेनान्वयात् । तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृ
तिर्न विकृतिः पुरुष इति ॥२२॥ जगत् जंगमं तस्थुः स्थावरं ॥ अत्रैव सर्वसंघातात्मके देहे मृग्यः अन्वेष्यः सुशकं चैतदित्याह । नेति

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ॥ विकाराः षोडशाचार्यैः पुमानेकः समन्वयात्
॥२२॥ देहंतु सर्वसंघातं जगतस्थुरिति द्विधाः ॥ अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन्
॥२३॥ अन्वयव्यतिरेकेण विवेकेनोशतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भि
रसत्वरैः ॥२४॥

नेतीतीत्यनात्मा यो देहः क्रियमाणोऽस्वयमेव अतत्यजन् । अनात्मवर्गात् । पृथगुपलभ्यमान इत्यर्थः ॥२३॥ मणिषु सूत्रमिव सर्वत्रानुस्यू
तत्वेनान्वयः । अत एव मणिभ्यः सूत्रस्येव केवलव्यतिरेकश्च तयोर्द्वैक्यं तेनयोर्विवेकः । एवं विवेको वा तेन उशता शुद्धेन आत्मना मनसा सर्गस्थानसमाम्नायैः । सृष्टिस्थितिसंहारैः ॥ यतो वा इमानि भूतानि जायंत इत्यादि श्रुत्युक्तसर्गाद्यनुसंधानेन तत्पर्यः वि
मृशद्भिरसत्वरैरव्यग्रैः ॥ मृग्यत इति सर्वेणान्वयः ॥२४॥

भा० स्०
२७

तस्यभावस्वेच्छादिः तस्यसावोभावनातेनानुकृते आश्रयाकृतीमनः शरीरेयस्यनिर्दग्धंबीजम ज्ञानमनुशयोवासनाचयस्यसः सम्यगो॥
तिप्राप्नोति ३६ तत्किमितिआह ॥ अधोक्षजस्यालंभ नस्पर्शो पाद्यांतरे तस्यआश्रयणं । असुरागादियुक्तं । आत्मामनोयस्य
संसृतिचक्रशातनं विवर्त्तकं बुधाः ॥ विदुः तदेवब्रह्माणि निर्वाणलयोमोक्षः । तदात्मकं सुखं विदुः हृदीश्वरमतंयोगिनः ३७ ॥ न
क्रिराकेचलिचनमंतव्यमित्याह ॥ कश्चितिष्ठिद्रवत्ते । अकारवत विषयाणामुपपादनेरर्डनैः । किंतत्रहेतुः सर्वदेहीनांसामान्या

तदापुमानमुक्तसमस्तवंधनस्तद्भावनावानुकृताशयाकृतिः ॥ विदग्धवीजानुशयोमहीयसाभक्तिप्रयोगेणसमे
त्यधोक्षजं ॥ ३६ ॥ अधोक्षजालंभमिहांत्मनःसीरीरिणः ॥ संसृतिचक्रशातनंतद्ब्रह्मनिर्वाणसुखंविदुर्बुधास्ततो
भजध्वंहृदयेहृदीश्वरं ॥ ३७ ॥ कोतिप्रयासोसुरवालकाहरेरूपासनेस्वेहृदिछिद्रवत्सतः स्वस्यात्मनः । सख्युर
शेषदेहिनांसामान्यतः ॥ किंविषयोपपादनैः ॥ ३८ ॥ रायःकलत्रंपशवःसुतादयोगृहामहीकुंडरकोशभूत
यः सर्वेर्थकामाःक्षणभंगुरायुषः ॥ कुर्वंतिमर्त्यस्यकियत्प्रियंचलाः ॥ ३९ ॥

श्रुना

तः विमृश्यति स्वलेशस्यकरादिसाधारणायापलेरित्यर्थः । नचैवमादौयौनरूत्यांदोषः ॥ नारदोक्तानुवादरूपत्वात्स्यप्रकरणस्य ॥
॥ अनर्थकंचविषयार्जनमित्याह ३८ रायश्च अर्थाः क्षणभंगुरायुषस्य । तेउक्तमितिहासेषु धनंहिपुरुषोलोकेपुरुषंधनमेवच
अवस्यमेकंत्यजतितस्मातकिंधनतृष्णयेति ॥ ३९ ॥

तदेवंज्ञानप्रकारमुक्त्वातत्साधनधर्मस्यतत्वंनारदोक्तमेवाह ॥ तत्रेतिपंचभिः येधर्मैः ॥ यथानुष्ठितैर्विरतिः यत्रऋयनुपायो
भागवतोक्तः ॥ तथाहिगीतासु ॥ यत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणम् ॥ मितिभ
गवतामनिडानातितावानपश्याभितत्व इत्यादि ॥ २९ ॥ तत्रैवांतरंगानधर्मानाह गुरोः ॥ शुश्रूषयाभक्त्याऽर्पणासर्वलब्धानां ॥

तत्रोपायसहस्राणामयंभगवतोदितं ॥ यदीश्वरेभगवतियथायैरंजसारतिः ॥ २९ ॥ गुरुशुश्रूषयाभक्त्यासर्वल
ब्धार्पणेनच ॥ संगेनसाधुभक्तानामीश्वराराधनेनच ॥ ३० ॥ श्रद्धयातत्कथायांचकीर्तनैर्गुणकर्मणां ॥ तत्पादांबु
रुहध्यानात्तल्लिंगेक्षार्हणादिभिः ॥ ३१ ॥ हरिःसर्वेषुभूतेषुभगवानास्तईश्वरः ॥ इतिभूतानिमनसाकामैस्तैःसा
धुमानयेत् ॥ ३२ ॥ एवंनिर्जितषड्वर्गैःक्रियतेभक्तिरीश्वरे ॥ वासुदेवेभगवतियथासंलभतेरतिं ॥ ३३ ॥ निशम्यका
र्माणिगुणानतुल्यान्वीर्याणिलीलातनुभिःकृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदंप्रोत्कंठउद्गायतिरौति
नृत्यति ॥ ३४ ॥ यदाग्रहग्रस्तइवक्वचिद्धसंत्याक्रंदतेध्यायतिवंदतेजनं ॥ मुहुःश्वसन्वक्तिहरेजगत्पतेनारायणेत्यात्म-
गतिर्गतत्रयः ॥ ३५ ॥

मर्पणेनचतस्यलिंगानांमूर्तीनांईक्षणंमहर्णंचादियेषांवस्तु हीनांतैश्च ॥ ३० ॥ निर्जितषड्वर्गैःकामक्रो
धलोभमोहमदमत्सराणामिंद्रियाणांचवर्गोयैः ॥ ३३ ॥ भगवद्भक्तलिंगान्याह ॥ निशम्येतित्रिभिः ॥ ३६ ॥ गुणान्भक्तवात्सल्यादीन्
अतिहर्षेणउद्गताःपुलकाः ॥ अश्रूणिचतैर्गद्गदंयथाभवत्येवंप्रोत्कंठउद्गायति ॥ ३५ ॥

भोगावसरानावाच्छैतैः । कत्र योगमाह । निरूप्यतामिति ॥ आचीर्नैः कर्मभिः क्लिश्यमानस्य कर्मभिः क्रियानर्थे इति चान्वयः ४६ ॥ ननु कर्मसु समाप्तेषु भोगावसरः स्यात्तत्राह कर्माणीति । न चेदं कर्मतत्फलं देहादिकं परमार्थ इत्याह । उभयं कर्म च देहं च अविवेकतः ॥ अज्ञानेनैव तनुते ४७ । यदपाश्रयाः त्वदधीनाः ४८ ॥ भूतानि प्राणीनां जीवसंज्ञकः । अंतर्यामी ४९ ॥

निरूपितामिह स्वार्थः कियान्देहभृतोऽसुराः ॥ निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ४६ ॥ कर्माण्यारभते देही देहेनात्मानुवर्तिना ॥ कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४७ ॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ॥ भजतानीहयात्मानमनीहं हरिमीश्वरं ४८ । सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः । भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञकः ॥ ४९ । देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव च । भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं । ५० । नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः । प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता । ५१ । न दानं न तपो नेज्या न सौचं न व्रतानि च । प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनं । ५२ ततो हरौ भगवति भक्तिं कुरुत दानवाः ॥ आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे । दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ॥ खगाः मृगाः पापजीवाः संति ह्यच्युततां गताः ५४ ॥ एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः । एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ५५ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे

असुराणामस्माकं अत्र नाधिकार इत्यपि न वाच्यमित्याह देव इति पंचभिः । ५० । ५१ ॥ अमलया निष्कामया विडंबनं नटनमात्रं । ५२ । ५३ अच्युतानां अमृतत्वं । ५४ । अध्याय द्वयोक्तं पुमर्थं संहरति एतावानिति । तदीक्षणं गोविंदस्य सर्वत्र सन्मानितं । ५५ ॥ इति सप्तमः ॥ ७ ॥

सप्तमाध्यायः ॥ ७ ॥

यन्नः दुःखेन संभिन्नं नच ग्रस्तमनंतरं ॥ अभिलाषोपपन्नंच सुखं स्वर्गे सुखास्पदमित्येव श्रुतेः ॥ स्वर्गादिनो गाअपि न सेव्या हो इत्याह ३
९ ॥ एवं हीति क्षयिष्णवः हेतुः क्रतुभिः कृता इति ॥ यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते इति श्रुते
अश्रुतः एवं पुण्यतारतम्येन शातिशयाः ॥ नच निर्मलाः स्पर्धादिमत्वात् ॥ न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन् ४० ॥ किंच यदर्थं यत्सं

एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः शातिशया न निर्मलाः ॥ तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्म
लब्धये ४० ॥ यदर्थ इह कर्माणि विद्वन्मान्यसकृन्नरः ॥ करोत्यतो विपर्यासममोघं विंदते फलं ४१ सुखाय दुः
खमोक्षाय संकल्प इह कर्मिणः ॥ सदाप्नोतीहया दुःखमनीहायाः सुखावृतः कामान्कामयते काम्यैः ॥ यदर्थमि
ह पूरुषः स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ॥ ४३ ॥ किमु व्यवहितापत्यदारागारधनादयः राज्यकोशग
जामात्यभृत्याप्ता ममतास्पदाः ४४ ॥ किमेतैरात्मनः तुच्छैः सह देहेन नश्वरैः ॥ अनर्थैरर्थसंकाशैर्नित्यानं
दमहोदधेः ॥ ४५ ॥

कल्पः अतः संकल्पितात् ॥ विपर्ययासं विपरीतं फलं अमोघं अवश्यं प्राप्नोति ४१ ॥ तदेव दर्शयति सुखायेति ईहया इच्छया
पयावा यः ॥ एवमनीहायाः हेतुः सुखेनावृतो व्याप्तः आसीत् स ईहया दुःखमाप्नोत्येव ४२ ॥ ४२ किंच कामान्भोगान् काम्यैर्वि
षयैः कर्मभिर्यदर्थं स्वादिनो गः नत्वात्मीयः भंगुरश्च ४३ किमु देहाद्व्यवहिता अपत्यादयो ममताविषया पारक्या इति व
क्तव्यं ४४ किंच स्वयं पुरुषार्थस्वरूपस्य किमेतैरित्याह किमेतैरिति ॥ ४५ ॥

ना० स० त०
२९

मच्छ्रुत्सौ कथं ममापि स एव बलं स्यात् तत्राह नहि इति ॥ आत्मनः स्वस्य स्वभावं त्यज इयत ॥ अजिता ॥ दात्मनो मनस ऋते विना अन्ये विद्वि-
षो न संति किं तद्द्वितदेव हि सात्म्येन मनसा धारणमेव समर्हणं समाराधनं मया दिग्विजये सर्वे जिताः अतः सांप्रतं न संती ति सत्यम् इति चेत्
तत्राह दस्यूनिति एके मूर्खाः पुराः आदौ लुंपतः सर्वस्वं हरतः ॥ षडिंद्रियलक्षणान् सत्रून् अविजित्य अजिता दिशो दिशः ॥ स्वयं जिता

जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः ॥ ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनंतस्य महत्समर्हणं ॥१०॥
दस्यून्पुरा षण्न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश ॥ जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥११॥
हिरण्यकशिपुरुवाच ॥ व्यक्तं त्वं मर्तुकामोसि योतिमात्रं विकत्थसे ॥ मुमूर्षूणां हि मंदात्मन्ननु स्युर्विक्लवा गिरः ॥१२॥ यस्त्वया
मंदभाग्योक्तो मदन्यो जगदीश्वरः ॥ क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते ॥१३॥ सोहं विकत्थमानस्य शिरः कायाद्धरामि
ते ॥ गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं ॥१४॥ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः ॥ खड्गं प्रगृह्यो
त्पतितो वरासनात्स्तंभं तताडातिबलः स्वमुष्टिना ॥१५॥ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुटत् ॥ यं वै
स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमंग मेनिरे ॥१६॥ स विक्रमन्पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतं ॥१७॥

समं तत्साधोर्न कुत्रजितः । जितस्य देहिनां समस्य ज्ञस्य विदुषः स्वाविकल्पिताः परे सविजवः कुतस्युः । व्यक्तं निश्चितं विक्लवाः अन-
न्विताः अस्यार्थः हे मंदभाग्य यद्यसौ वस्तुतः तर्हि क्वास्ते प्रह्लादस्त्वाह स सर्वत्र इति हिरण्यकशिपुः । पुनरपि आह तर्हि कस्मात्स्तंभे नास्ति प्रह्ला-
दस्तु तं स्तंभं निरीक्षमाणो मनस्यपि आह दृश्यते इति हिरण्यकशिपुस्तमपश्यन्नाह सोहमित्यादि प्रह्लादमनेन मङ्क्षु वधाय इति नानिरीक्ष्य

मारणस्तंभं ताडितवान् हतस्य ध्वनेराश्रयं ।१७॥

२९

अस्त्रमेतुरुषासुतं ॥ निघ्नद्वैत्योहतः स्वयं आविर्भूय नृसिंहेन ॥ सच ब्रह्मादिभिस्तुतः । अंतः कृपासुधापूर्णो बहिःकोपेन कोरा
रीरितोइ मस्तिनवनेन ॥ नजंतस्तवमभावयेत ॥ २ ॥ एकांतसंस्थितापुत्यडि स्यायथा ययाक्तसवहंतु मनोरथं कथंभूतः । कोपनश्चा
वेशोइ कोण वलज्ञांजवपुर्यस्य सः । स्त्रियातिरस्कृत्यपायेन सरोषेणातिरश्चीनेन वक्रेणामन्दासेन अल्पबुद्धिमहाज्ञातिलंघिन

श्री ॥ र ॥ उ ॥ वा ॥ अथदैत्यसुतं सर्वे स्वकत्वात हनुरोपितं ॥ डिग्रहकुर्निरवधत्वात्तेनैव गर्वं नुशिक्षितः ॥ २ ॥ अथा
चार्यसुतस्तेषां ॥ बुद्धिमेकांतसंस्थितां आलक्ष्यभीतस्त्वरितो राज्ञआवेदयद्यथा ॥ २ ॥ श्रुत्वा तदप्रियं दैत्यो दुःसहं त
नयानयं ॥ कोपावेशचलद्गात्र पुत्रं हंतुं मनोदधे ॥ ३ ॥ क्षिप्त्वा परुषया वाचा प्रह्रादमतदर्हणं ॥ आहेक्षमाणः पापेन तिरश्ची
नेनचक्षुषा ॥ ४ ॥ प्रश्रयावनतं दांतं बद्धांजलिमवस्थितं सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः ॥ ५ ॥ हे दुर्विनीत मं
दात्मन्कुलभेदकराधम ॥ स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य यमक्षयं ॥ ६ ॥ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः ॥ तस्य
मेभीतवन्मूढ शासनं किंबलोत्यगाः ॥ ७ ॥ श्री ॥ प्र ॥ ह्ला ॥ उ ॥ वा ॥ न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषां ॥ परेव
रेमीस्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥ स ईश्वरः काल उरुक्रमोसावोजः सहः ॥ सत्वबलेंद्रियात्मा स ए
व विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९ ॥

त्वामद्युपमालयं नेष्यामि अनीतवत ॥ किंबलं यस्य सः किंबलः ॥ वासंप्रणीताः ॥ इत्यत्र हेतुः स ईश्वर इति त्रिभिः कालः पादविशेयाः यस्य

वक्तुमाक्रमइतिवाउडम्यादिरूपः । सत्वंधार्येविधि
वे: ॥ २९ ॥

सदैत्यएवंध्यमिंकृत्वातदाश्रयंशत्वंप्राणिविशेषंसर्वतोविलोकयन्॥स्तंभस्यमध्यान्निर्गच्छन्नमृगेंद्रयोमिश्रंरूपमहोकिमेतदिति मीमांसितवानितिशेषः॥तस्यैवतद्दर्लंभयानिकंतंनृसिंहरूपंमीमांसमानस्याग्रतः॥सनृसिंहरूपोहरिःसमुच्छ्रितनयानकत्वमेवदर्शयत्तद्रूपमनुवर्णयतित्रिभिः॥प्रतप्तंचामीकरस्वर्णमिवपिंगानिचंडानिलोचनानियस्मिन्नेसटाःकेसराःकंठरोमाणितेस्फुरद्‌भिः॥सटाकेसरैर्जृंभितंसटोपमाननंयस्मिन्करालास्तुंगादंष्ट्रायस्मिन्॥करवालःखड्गस्तद्वच्चंचलाच्छुरान्तावृत्तीतृणाचजिह्वायस्मिन्भृकुटीयुक्तेनस्तब्धोमन्नतोसंकुवत्॥ऊर्ध्वौकर्णौयस्मिन्॥गिरिकंदरवदद्भुतंव्यात्तंप्रसृतमास्यंनासौचयस्मिन्हनु

[illegible] ॥२८॥

ससत्वमेवंपरितोविपश्यन्स्तंभस्यमध्यादनुनिर्जिहानं॥नायंमृगोनापिनरोविचित्रमहोकिमेतन्नृमृगेंद्ररूपं॥२७॥मीमांसमानस्यसमुत्थितोग्रो॥नृसिंहरूपस्तदलंनयानकं॥प्रतप्तचामीकरचंडलोचनंस्फुरत्सटाकेसरजृंभिताननं॥२८॥करालदंष्ट्रंकरवालचंचलंक्षुरांतजिह्वंभृकुटीमुखोल्वणं॥स्तब्धोर्ध्वकर्णंगिरिकंदराद्भुतंव्यात्तास्यनासंहनुभेदभीषणं॥२९॥दिविस्पृशात्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं॥चंद्रांशुगौरैः छुरितंतनूरुहैः॥विष्वग्भुजानीकशतंनखायुधं॥३०॥

कपोलप्रांतौतयोर्भेदेनविदारेणभीष— णांदिविस्पृशात्कंकायो यस्मिन्॥अल्पकसमासःअदीर्घाह्रस्वापीवरावस्थूलाग्रीवायस्मिन्नुरुविसालंवक्षस्थलंयस्मिन्तच्चतच्चअल्पंमध्यमुदरंयस्मिन्॥चंद्रांशुवद्गौरैस्तनूरुहैःलोमभिः॥छुरितंव्याप्तंविष्वक्विष्वचसर्वतःप्रसृतान्भुजानांतेषामनीकानिसैन्यानिमाः॥तेषांशत

नृ

भगवांस्तदा अदृश्यो ॥ दृश्यो बभूव ॥ किमर्थमिति निजभृत्येन प्रह्लादेन यद्भाषितं हरिः सर्वत इति तत्सत्यं विधातुं कर्तुं तथा अखिलेषु भूतेषु आत्मनो व्या-
प्तिं च सत्यं कर्तुं स्तंभे अदृश्यत । किमर्थं भौतिकेषु च भावेषु तेष्वयमहं तेषु च भगवानास्त इति तेनैव भृत्येन भाषितं सत्यं कर्तुं तथा अत्यद्भुतं
दैत्यघातकमिति घोरं रूपमुद्वहन् दधत ॥ तत्किमर्थं निजभृत्यैः सनकादिभिः शापानंतरमनुतप्तैः विबुधैः ॥ जन्मत्रिः शापमोक्षो भवितेति ।
सत्यं कर्तुं तथा अद्भुतं असुरस्यावध्यत्वं स्मृतं च रूपमुद्वहन् ॥ तच्च न मृगाकारं न मनुष्याकारं उद्वहन् सभायां मध्ये अदृश्यत ॥ ततः
किमर्थं ॥ निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितं नन्तेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो इति तथा नांतर्न बहिः इति न

अंतःसभायां न ददर्श तत्पदं ॥ वितत्रसुर्येन सुरारियूथपाः ॥ सत्यं विधातुं निजभृत्यभाषितं ॥ व्याप्तिं च भूतेषु-
खिलेषु चात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन् ॥ स्तंभे सभायां न मृगं न मानुषं ॥ श्री ॥

रैर्न मृगैरिति च ॥ ब्रह्मणा च निजभृत्ये नंतु यथास्त्विति यत् भाषितं तत्सत्यं कर्तुं न हि तद्ब्रह्मसृष्टं भूतं न च नरो वा मृगो वा न च सभागृहा-
स्यातः । न च प्रांगणे वा बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना भाषितं । नूनं मे तद्विरोधेन मृत्युर्भविता इति तथा अस्य य-
म कृतस्त्रिलोकीईश्वरो ऽमर इति ॥ यच्च नारदेन निजभृत्येन इंद्रं भाषितं । अयं हि महान् । संस्थानं प्राप्स्यते । अनंतानुचर इत्यनेन च भक्तो परिपालितव्यः च ॥
वद्धि भाषितं ॥ तच्च सत्यं कर्तुं दृश्यते च कारान्निजज्ञापितं च यत् ॥ कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यतीति तथा । तेषामहं समुद्धर्ता मृ-
त्युसंसारसागरात् । इत्यादि इति च सत्यं कर्तुं न दृश्यते इति दृश्यं व्याप्तमिति विस्तरेण ॥ श्री ॥

न

भा० स०
३२

यस्यहस्तात्स्वयंमुक्तः तंनृहरिं स्ववीर्यसंकितं। मन्यमानः षड्गचर्मणी प्रगृह्य पुनस्तं आसज्जात अन्यपद्यतेतेनेन्वयः श्ये
नस्येव वेगो यस्य तं शतचंद्रवर्त्मभिः खड्गचर्ममार्गैः। अच्छिद्रं यथा भवत्येवं उपर्यधश्चरंतं। अट्टहासस्वनेनोल्बणं महाशब्दे
नोल्बणं भयंकरं॥ अट्टहासेनेहरेस्तेजसा च निमीलिते अक्षिणी यस्य। ग्रहणेन त्रस्तं ततः॥ व्यालो यथा आखुं मूषकं विहरणो
त्सुकं ततः। अहिं गरुड एवेति विषक् सर्वतः स्फुरंतं ग्रहणेनातुरं विवशं। इंद्रेण सह युधे तत्र प्रयुक्तेन कुलिशेन न क्षिता त्वग्॥ पिप

तं मन्यमानो निजवीर्यसंकितं यद्धस्तमुक्तो नृहरिं महासुरः॥ पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जि
ताश्रमो मृधे॥ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः॥ कृत्वाट्टहासं खरमुत्स्वनोल्बणं
निमीलिताक्षं जगृहे महाजवः॥ विषक्स्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिसाक्षतत्वचं। द्वार्यू
रुमापत्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषं॥ संरंभदुःप्रेक्ष्यकराललोचनो व्यात्ताननांतं विलिहन् स्वजि
ह्वया॥ असृक्लवाक्तारुणकेसराननो॥ यथांत्रमाली द्विपहत्यया हरिः॥ नखांकुरोत्पाटितहृत्सरोरुहं वि
सृज्य तस्यानुचरानुदायुधान्॥ अहन्समस्तान्नखशस्त्रपाणि॥ भिर्दोर्दंडयूथोनुपथान्सहस्रशः॥ ३०

स्या द्वारि शालायां अंतर्बहिः ऊरुं करौ निपात्य न भूमौ न चांबरे नखैर्न तु वसु शिरसु शुष्कैर्वा द्रवैर्वा एवं दिवा न नक्तं परिहार्य संध्यायामिति द्र
ष्टव्यं दैत्यवक्षः। मुक्तात् इत्यवधमाह द्वाभ्यां संरंभेण दुःप्रेक्ष्याणि करालानि लोचनानि यस्य। असृग्लवैः रक्तस्य लवैः बिंदुभिः आक्तानि
ता व्याप्त। एवं अरुणाः केसराः आननं च यस्य सः क इव द्विपहत्यया गजवधेन हरिः। सिंहो यथा। एवंभूतस्तस्यानुचरानह
न्। पुनस्तेरणान्वयः नखांकुरैरुत्पाटितं हृतसरोरुहं। यस्य तं। दोर्दंडानां यूथानि यस्य सः। तमनु पथा ये यांतान् अनपायिनः

श्रीभागवतटीकायां सप्तमे
३२

दुरासदं प्राप्तुमशक्यं सर्वाणि च निजानि चक्रादीनि निजेतराणि वज्रादीनि तत एव । आयुधप्रवेकाः सस्त्रोत्तमाः तैरविद्राविता दैत्यदानवा येन
तद्रूपं मीमांशमनस्या अतः समुच्छ्रितः ॥ इति पूर्वश्लोकान्वयः । तदा विनो विश्वयोऽनंतविमर्शो पूर्वकं तेन सह दैत्यस्य युद्धमाह सप्तभिः । आ
येयो महामायं विनाहरिणा मे ॥ अयमेवं नृतो वधः मृत्युहेतुः स्मृतः च्छिन्तितः ॥ ते पाप्मनेन समुद्यतेन किंचित स्यादेवं ब्रुवन्नस्य

दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवं । आयेरामेवं हरिणोरुमायिना ॥ वधः स्मृतोनेन समुद्यतेन किं
एवं ब्रुवंस्त्वभ्यपतद्गदायुधो ॥ नदन्नृसिंहं प्रतिदैत्यकुंजरः । अलक्षितोऽग्नौ पतितः पतंगमो ॥ यथा नृसिंहौजसि सो
सुरस्तथा ॥ न तद्विचित्रं खलु सत्वधामनि स्वतेजसा यो नु पुरापिबत्तमः ॥ ततोऽभिपद्याभ्यहनन्महासुरो रुषा ॥ नृसिंहं
गदयोरुवेगया ॥ तं विक्रमंतं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहेत ॥ स तस्य हस्तोत्कलितस्तदासुरो वि
क्रीडितो यद्वदहिर्गरुत्मतः ॥ असाध्वमन्यंत हृतौकसोमराः घनच्छदा भारत सर्वधिष्ण्यपाः ॥ श्री ॥ श्री ॥

पतद्वित्यन्वयः । तदासोऽसुरो नृसिंहस्यौजसि दीप्तौ पतितः सन् ॥ अलक्षितः । अदृश्योऽभूत् सत्वधामनि शुद्धसत्वप्रकाशे हरौ पततस्त
तमोमयस्यादर्शनं तद्विचित्रं न भवतीत्यत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमनु अहो अपिबत् । तस्मिन् विक्रमंतं तम
स्ततः अहरं । तं हस्तादुत्कलितः निःसृतः तदाऽमरादेवाः सर्वधिष्ण्यपाः । असाध्वमन्यंत हृ । ता ओकांसि स्थानानि येषां ते तद्
नियाघनच्छदा मेघांतरिताः संतः ॥

नरसाहिलं पुरुषोत्तमं ॥ ब्रह्मादयो नृसिंहस्य शंकयाकुलचेतसः ॥ आराद्वे वा स्तुवन समदृस्यङ्लोकैः ॥ पृथक् पृथक् अनंताय
अनंतं प्रसादयितुं नतोस्मि ॥ अनंतत्वे हेतुः दुरंतशक्तियोयस्यातत्कुतः ॥ विचित्राणि वीर्याणि अनावायसंप्रोतत्किमर्थं पवित्रा
णि साधकानि कर्माणि यस्य ॥ विचित्रवीर्यत्वमेवाह ॥ विश्वस्येति संदधते सम्यक् कुर्वते एवमपि अव्ययात्मने अच्युतस्वरू

म्राः दूर्वबद्धांजलिपुटाः आसीनं तीव्रतेजसं ॥ ईडिरे नरसाहिलं नातिदूरचराः पृथक् ॥
॥ ब्रह्मोवाच ॥ ॥ नतोस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे ॥ वि
श्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदधतेव्ययात्मने ॥ श्रीरुद्र उवाच ॥ को
पकालो युगांतस्ते हतो यमसुरोल्पकः ॥ तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ॥ श्री ॥

पं यं सद्ग स्तुल्लोयं कोपावसरः इति तं धैर्यं यते समुहस्तं युगांतस्तु वकोयस्य कालः कोपायोग्यस्त्वमित्याह । अकल्पः अतः कोपनिवृ
त्या प्रह्लादं माहिंसारित्याह ॥ तत्सुतमिति ॥ यदा अकालेपि ॥ अयं कोपो अस्य भक्तस्य रक्षणार्थं इति चेत् तर्हि इदानीं कोपं त्यक्ते
नयाहात्यर्थः ॥

दैत्यवधमप्रस्यनृहरेराटोपमाह। द्वाभ्यां सटाभिरवधूताः प्रकंपिताः परापतन्व्यसीर्यंतस्यदंष्ट्रनाविमृष्टरोचिषियेषांतेतिरस्कृतःप्रभाः
भवंतिशेषः। दिग्गिनागाग्दिग्गजाः तस्यजटाभिरुद्धिसानिविमानानितैः। संकुलाव्याप्तासतीप्रोत्सर्प्यंतस्वस्थानात्सकर्षेणाद्दरायतः॥ स्त

त
सटावधूताः जलदाः परापतन्ग्रहाश्चतद्दृष्टिविमुष्टरोचिषः। अंभोधयःश्वासहताविचुक्षुभुः निर्ह्रादभीताःदिगि
भाविचुक्रुशुः द्यौस्तत्सटोत्क्षिप्तविमानसंकुला। प्रोत्सर्प्पतक्ष्माचपदातिपीडिता। शैलाःसमुत्पेतुरमुष्यरंहसा
तत्तेजसाखंककुभोनरेजिरे। ततःसभायामुपविष्टमुत्तमे॥ नृपासनेसंभृततेजसंविभुं अलक्षितद्वैरथमत्यमर्षणं
प्रचंडवक्त्रंनबभाजकश्चन। निशम्यलोकत्रयमस्तकज्वरं॥ तमादिदैत्यंहरिणाहतंमृधे प्रहर्षवेगोत्कलि
ताननामुहुः प्रसूनवर्षैर्ववृषुःसुरस्त्रियः॥ तदाविमानावलिभिर्नभस्थलं॥ दिदृक्षतांसंकुलमासनाकिनां॥
सुरानकादुंदुभयोथजघ्निरे गंधर्वमुख्याननृतुर्जगुःस्त्रियः॥ ततोपव्रज्यविबुधाब्रह्मेंद्रगिरिशादयः ऋषयःपि
तरःसिद्धाःविद्याधरमहोरगामनवः। प्रजानांपतयोः गंधर्वाप्सरसांगणाः॥ यक्षाःकिंपुरुषास्तातःवेतालासिद्ध
किंनराः॥ तेविष्णुपार्षदाःसर्वेसुनंदकुमुदादयः॥ श्री॥

दन्तैस्तैत्वर्यमाश्चर्यमिवमुर्त्कोतुलेनतस्यासनेअप
विसंभयाक्रोपितुवमाजना
सेवतनालक्षितोद्वैरथः। प्रतियोद्धायेनलोकत्रयस्यमस्तगाडिरस्करोप्पथेवपुंसहः। प्रहर्षस्यवेगेनउत्कुल्ल सितानिविकसिता दर
न्यानानियासांताः। नहरिवद्वपुनाकिनांविमानावलिभिः। सुराणामानकांपटहातेजाघ्निरेवादिताः। त्रयोप्सरसोननृतुः गंध
र्वाप्सरसः श्चारणाश्चेत्यर्थः॥

क

पितरस्तुश्राद्धे धिरणोनु परमोपकारिणां प्रणामं तिश्राद्धानि श्रद्धायुक्तानि पिंडादीनि नोस्मभ्यं पुत्रैर्दत्तानि प्रसभं वलात्स्वयमधिकृत्य भु
नुङ्के किंच तीर्थस्नानसमये दत्तं तिलोदकमप्यपिवत् ॥ तानि तु स्योदराद्धस्माच्छेत श्राद्धेतवान् कथं भ तातनखैर्विदीर्णाविदायस्य तस्मात्
वया विदारणस्य नऊत पिंडोद्धरणमेव फलमिति भावः ॥ योगसिद्धां गतिं अणिमादि सिद्धिं नानाअनेकाद्पर्यायस्य तं तस्मै तु भ्यं तल

पितर ऊ वाचा ॥ श्राद्धानि नो धिवुभुङ्के प्रसह्यं तनूभवैर्दत्तानि तीर्थसमये प्यिवत् तिलांवु ॥ तस्योदरान्नखविदीर्णवपा
द्यन्वाच्छेत ॥ तस्मै नमो नृहरे ऽखिलधर्मगोप्त्रे ॥ श्री सिद्धा ऊचुः ॥ योनो गतिं योगसिद्धामसाधुरहार्षीद्योगत
पोवलेन ॥ नाना दर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ ४७ ॥ श्री विद्याधरा ऊचुः ॥ विद्यां पृथग्धा
रणया नुराधां न्यषेधदज्ञो वलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्मनित्यं ॥ ४८ ॥ श्री ना
गा ऊचुः ॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षः पाटनेनासां दत्तानंद नमोस्तु ते ॥ ४९ ॥ श्री मनव ऊ
चुः ॥ मनवो वयं तव निदेसकारिणो ॥ दितिजेन देव परिभूतसेतवः ॥ भवता खलः समुपसंहृतः प्रभो करवाम ते किमनु
साधि किंकरान् ॥ ५० ॥

मुद्धस्य विद्यां अंतर्धानादिलक्षणां अनुराधां संप्राप्तां सं
रत्नानि च उत्तमास्त्रिय श्रासां स्त्रीणां दत्तश्यानंदो येन तत्संवोधनं नृसिंहेन ऽवलोकितः संतो मा ऋद्धिं वद्धांऽजलयो मनवः मोचुः म
नवो वयं धर्मपालकाः ॥ सेतवो वर्णाश्रमधर्ममर्यादा ये ॥ अंतर्धानादिलक्षणां अनुराधां संप्राप्तां ते ऽनुष्ठिष्वायः ॥ ५० ॥ खे युद्धे ॥ ४९ ॥ रत्नानि फणास्थितानि स्त्री

इदन्तु नोऽस्माकं हविर्भागादिलाभः पुरुषार्थः किं तु त्वद्दर्शनं त्वत्परिचर्यैव भवता पुनरनेन संरम्भेण त्वत्कार्यमेव साधितं तस्य च सिद्धत्वादुप
संहर कोपमित्याशयेनाह । हे परम नोऽस्मान् त्रायता त्रायता ताः स्तुता भवता स्वीया एव भागाः । दैत्याक्रान्तं हृताः । अतः तयोर्मिथः स्तवैवं यद्दिवि भुभो
क्तुं त्वात् । अस्मदीयं हृदयकमलं त्वद्गृहं मे वै तावत्पर्यन्तं भयहेतुत्वेनास्मान् स्मृतिपथे नित्यं स्थितेन दैत्येनाक्रान्तं व्याप्तं सत् प्रत्यबो
धितं योऽपहरणेन विकाशं नीतम् । ननु तव त्रैलोक्ये ऽश्वसाधनार्थमयं मुख्यम् इति चेत् तत्राह कालग्रस्तमिति तित्वाह नारसिंहस्य च कारान्नामर
पर्य

इन्द्र उवाच ॥ प्रतीनीताः परम भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि
कालग्रस्तं कियदिदमहो ॥ नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किम् ॥ ४२ ॥
ऋषय ऊचुः ॥ त्वं नः तपः परममात्थ यदात्मतेजो ॥ येनेदमादिपुरुषात्मगतं ससर्क्थ ॥ तद्वि
प्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुः पुनरन्वमंस्थाः ॥ ४३ ॥
बापु

विभूत । ऋषय स्तुवन्ति तपः प्रवर्तितेन नोऽस्माकं महाननुग्रहः कृतः । इत्याहुः । ४२ ॥ त्वं नो यदात्थ परमध्यानलक्षणं तपः परमत्वे हेतुः आत्म
नस्तव तेजः प्रभावरूपं तदेवाह येन तपसा आत्मनि लीनमिदं विश्वं ससर्जिथ सृष्टवानसि तत् अमुना दैत्येन विप्रलुप्तं कुण्ठितं सत् हे शर
ण्यपालः रक्षार्थं ॥ गृहीतेन वपुषा पुनरपि तपः । कुरु इत्यनुज्ञातवानसि ॥ तस्मै ते नमः इत्यनु[ता]र्थ श्लोकचतुर्थपादस्यानुष
ङ्गः । ४३ ॥ ता

भा

ना० स०
३४

किंपुरुषास्तुत्वांस्तोतुंकेवयंवराकाइत्याहुः।वयंकिंपुरुषास्तुतुछप्राणिनः॥त्वंतुमहानद्भुतप्रभावःपुरुषनन्चयंमहान्तंदैत्यो॥
हतइतिकिंनवर्णयंतेइतिआसंक्यकियदेतदित्याहुः।अयमिति।सत्रेषुयज्ञेषुतेत्वयाहतः।एतेद्दृष्ट्वाआनंदंकृतं।अमुनाहितिडो
त॥विष्टिनिर्मूल्यंकर्मअनुनिरंतरं॥कारिताःअतःपरंनविभवःप्रसमृध्यैभवः।५७।नोस्माकंयेनिविष्टिनिर्मूल्यकर्मअनुनिरं

किंपुरुषाऊचुः।वयंकिंपुरुषास्त्वंतुमहापुरुषऽमीश्वरः।अयंकुपुरुषोनष्टोधिक्कृतःसाधुभिर्यदा॥५५॥वै
तालिकाऊचुः॥सभासुसत्रेषुतवामलंयशोगीत्वासपर्यांमहतींलभामहे॥यस्त्वांव्यनीषीद्वसमेषदुर्जनोदि
ष्ट्याहतस्तेभगवन्यथामयः॥५६॥किंनराऊचुः॥वयमीशकिंनरगणास्तवानुगादितिजेनविष्टिममु
नानुकारिताः॥भवताहरेसवृजिनोवसादितो॥नरसिंहनाथविभवायनोभव।५७॥श्रीविष्णुपार्षदाऊचुः॥अ
द्यैतद्धरिनररूपमद्भुतंतेदृष्टंनः॥शरणदसर्वलोकसर्मःसोयंतेविधिकरईसविप्रसप्तस्तस्येदंनिधनमनुग्रहा
यविद्मः॥५८॥इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्लादानुचरितेदैत्यराजवधोऽष्टमोध्यायः॥८

तरंकारिताःअतःपरंतःविभवःप्रसमृध्यैभव।५७॥नोस्माकंभक्तानांसरणद्ःआश्रयप्रदसर्वेषांलोकानांसर्वमंगलमेता॥
दद्भुतेरूपंमयैवदृष्टंनतुपूर्वंविधिकरः॥५८॥इतिसप्तमेऽष्टमः॥८॥

प्रजापतयोपि तद्वदवलोकिताः प्रोचुः हे परेस त्वेत्वया अभिसृष्टाः प्रजेसाः वयं येन निषिधाः संतः प्रजान स्रजामः स एष भिन्नं वक्षो यस्य सः नुनिश्चितं मृतः सेतेः अतः परं प्रजाः स्रक्ष्यामः इति हृष्यंतस्याह हे सत्वमूर्त्ते तवायमवतारो जगतो मंगलं गंधर्वोऽपि तद्वदवलोकिताः प्रोचुः हे विभो वयं ते त्वदीया नटा नर्तका नाट्येन नृत्ये गायकाश्च येन स्वाधीनाः शौर्यकृताः कथंभूतेन वीर्यवलंशक्तिः ताभ्यामोजः

प्रजापतय ऊचुः प्रजेसा वयं ते परेसाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः स एष त्वया भिन्नवक्षो नु शेते जगन्मंगलं सत्वमूर्तेवतारः ५१ गंधर्वा ऊचुः वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः स एष नीतो भवता दशामिमां किमुत्पथस्थः कुसलाय कल्पते ५२ श्रीचारणा ऊचुः हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः यदेष साधुहृच्छयस्त्वयासुरः समापितः ५३ श्रीयक्षा ऊचुः वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पंचविंशः ५४

हरि

प्रभावो यस्य स तेन इमां दशां मृति उचितमेतत् इत्याहुः किमिति ५२ न वा अपवर्गसंसारनिवर्तकं आश्रयणे हेतुः यद्यस्मात् साधुनां हृदि भयजनकत्वेन शेते तिष्ठतीति ५३ असुरान्तं नीतः ५३ मनोज्ञैः कर्मभिरनुचरेषु मुख्याः पंचतां मृत्युं हे पंचपंचे । विंशचतुर्विंशतत्वनियामकः ५४

ना० स०
३५ न

स्वस्मिन्निवसमस्तेषु ततकयां मतदृस्येप्रह्लादः स्तौतिसतपंचेद्भिचत्वारिंशताहरिंतत्र। तावदात्मनोभगवत्स्तुतावनधि
[illegible]कारं। संभावयन्नाह॥ ब्रह्मादय इति पंचभिः। मुनयोमननशीलाः सिद्धा ज्ञानिनोपि कथंभूतास त्वएवैकस्मिन्नस्तानोम
नोविस्तारो यस्य सामतिर्येषां तथाविधा अपिवचसां प्रवाहैरपितथावहुभिर्वहुमारौगौगुणैरपिसमाराधयितुंनपिपुनःपूर्णोः

प्रह्लाद उवाच॥ ब्रह्मादयः सुरगणा मुनयोथसिद्धा॥ सत्वैकतानमतयोवचसांप्रवाहैः॥ नाराधितुंपुरुगु
गुणैरधुनापिपिप्रुः किंतोषमर्हतिसमेहरिरुग्रजातेः। ८॥ मन्येधनाभिजनरूपतपःश्रुतौजस्तेजःप्रभाव
वलपौरुषवुद्धियोगाः॥ नाराधनायहिभवंतिपरस्यपुंसोभक्त्यातुतोषभगवानगजयूथपायः। ९॥ ॥श्री॥

नउग्रात्कहात्यर्थः सहरिर्मेकिथंतोषंप्राप्तुमर्हेतितत्रहेतुः उग्राघोरा आसुरीजातिर्यस्य॥ ८॥ एवंहरितां संभावयति। ९। मन्यइति धनम्
अभिजनः सतकुलेजन्मरूपंसौदर्यंततत। श्रुतंपांडित्यमोजइंद्रियनैपुणंतेजः। कोतिप्रभावः प्रतापयौरुषमुद्यमः वुद्धिः प्रज्ञा।
योगोष्टांगः। एतेधनादयोपिद्वादसापिगुणाः। परमस्यपुंसः। आराधनायनभवंतिहियतः। केवलयाभक्त्यैवननुगजेंद्रायतु
ष्टोभवत। एवंभक्त्यैवकेवलयाहरेस्तोषः संभवतीत्युक्तं। १०॥

नवमेब्रह्मणाभीत्याचोदितोसुरवालकः कोपंप्रसमयन्नस्तौन्नृसिंहमतिभीषणं ॥१॥ उग्रोप्यनुग्रएवायंस्वभक्तानांनृकेसरीव केशरी
स्वपोतानामन्येषामुग्रविग्रहः इत्याशयंप्रकटयन् भक्तानुकंपितामाह एवमितिसप्तभिः । एवंदूरतएवस्थित्वास्तवंतः मन्युना
संरंभआवेशोयस्यतंउपगंतुंनाशक्नुवन् ॥१॥२॥ महदद्भुतंरूपंदृष्ट्वासंकितासतीतंनोपजगामनुपगच्छेन ॥३॥४॥ कालएवाहिस्तस्मा

श्रीनारदउवाच ॥ एवंसुराद्यः सर्वेब्रह्मरुद्रपुरःसराः ॥ नोपेतुंमशकन्मन्युसंरंभंसुदुरासदं ॥१॥ साक्षाछ्रीः प्रे
षिताद्देवैर्दृष्ट्वातन्महदद्भुतं अदृष्टाश्रुतपूर्वत्वात्सानोपेयायशंकिता ॥२॥ प्रह्लादंप्रेषयामासब्रह्मावस्थि
तंमंतिके । तातप्रसमयोपेहिस्वपित्रेकुपितंप्रभुं ॥३॥ तथेतिशनकेराजन्महाभागवतोर्भकः ॥ उपेत्यभुविकायेन
ननामविधृतांजलिः ॥४॥ स्वपादमूलेपतितंतमर्भकंविलोक्यदेवः कृपयापरिप्लुतः ॥ उत्थाप्यतच्छीर्ष्ण्यदधात
करांबुजंकालाहिवित्रस्तधियांकृताभयं ॥५॥ सतत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ॥ तत्पा
दपद्मंहृदिनिर्वृतोदधौहृष्यत्तनुःक्लिन्नहृदश्रुलोचनः ॥६॥ अस्तौषीद्धरिमेकाग्रमनसासुसमाहितः ॥ प्रेम
ग
गद्गदयावाचातन्न्यस्तहृदयेक्षणः ॥७॥

हित्रस्ताधीर्येषांतेषांकृतमभयंयेनतत ॥५॥ तस्यकरस्पर्शेनधुतंनिरस्तमखिलंमसुभंयस्यसः । यद्वातत क्षणमेवअभिव्यक्तंअपरो
क्षीभूतंपरमात्मदर्शनंब्रह्मज्ञानंयस्यनिर्वृतः सन्हृदिदधौ हृष्यंती रोमांचितातनुर्यस्य । क्लिन्नंप्रेमार्द्रंहृत्यस्यअश्रूणिलोच
नयोर्यस्यपरमपुरुषार्थं । तत्पादध्यानसाधनत्वेनेत्यर्थः । सुसमाधिमवाहतस्मिन्नेवन्नेवन्यस्तेहृदयमीक्षणेचयेनेति ॥७॥

ना० स०
३६

यस्मादेवंभगवन्भक्त्यैव॥तुष्यतितस्मादहंनीचोपिविगत॥विक्लवःगतसंकःसन्नीश्वरस्यमहिमानंसर्वप्रपत्तेनस्वमनीषानु
सारेणानुवर्णयामि॥अजानतोपिस्तुतिकरणेहेतुमाह।येनैवमहिम्नाअनुवर्णितेनअविद्ययासंसारमनुप्रविष्टःपुमान्शुद्ध्येत्
तन्महि।अन्यस्यतथाशोधकस्याभावादित्यर्थः॥तदेवमात्मनस्तु।तावदनधिकारंपरिहृत्येदानींतंस्तुवत्कोपोपसंहारंप्रार्थये

तस्मादहंविगतविक्लवईश्वरस्यसर्वात्मनामहिगृणामियथामनीषं॥नीचोऽजयागुणविसर्गमनुप्रवि
ष्टःपूयेतयेनहिपुमाननुवर्णितेन॥१२॥सर्वेह्यमीविधिकरास्तवसत्वधाम्नो॥ब्रह्मादयोवयमिवेशान
चोद्विजंतः॥क्षेमायभूतयउतात्मसुखायचास्य॥विक्रीडितंभगवतोरुचिरावतारैः॥१३॥ ॥ ॥

ते॥सर्वेह्यमीतिधाम्नोमूर्त्तेः ईशः॥अमीउद्विजंतोबिभ्यंतः।सर्वेब्रह्मादयःसत्वमूर्त्ते॥स्तवविधिकरानियोगकर्त्तारोभक्ताएवनान्ये
नचवयमसुराइववैरभा-वेनवतेभक्ताः।किंतुअद्ययेवतुव।रुचिरैरवतारैर्विविधक्रीडनंअस्यविश्वस्यक्षेमादिप्रयोजना
यनतुभयोत्पादनाय॥१३॥

इदानीं भक्तिं विनान्यत् न किंचित्तोषहेतुरित्याह विप्रादिति पूर्वोक्ता धनादयो ये द्विषट् द्वादश गुणास्तैर्युक्ताद्विप्रादपि श्वपचं वरि-
ष्ठं मन्ये यद्वा समनतु सुजतो [illegible] क्रोध द्वादश शमादयो गुणाः इष्टव्याः॥ तदुक्तं धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षान-
सूया यज्ञश्च दानं च धृतिश्च [illegible] तं च व्रतानि वै द्वादश ब्राह्मणस्येति कथंभूताद्विप्रात् अरविंदनाभस्य पदारविंदविमुखात्॥ कथंभूतं श्व-
पचं तस्मिन्नरविंदनाभेऽर्पिता मन आदयो येन तं॥ ईहितं कर्म वरिष्ठत्वे हेतुः स एवंभूतः श्वपचः सर्वं पुनाति॥ भूरिमानो गर्वो यस्य

विप्राद्द्विषट्गुणयुतादरविंदनाभ॥ पादारविंदविमुखात्श्वपचं वरिष्ठं मन्ये तदर्पितमनोवचनेहितार्थ-
प्राणं पुनाति स कुलं न तु भूरिमानः॥१०॥ नैवात्मनः प्रभुरयं निजलाभपूर्णो॥ मानं जनादविदुषः करु-
णो वृणीते यद्यज्जनो भगवते विदधीत मानं॥ तच्चात्मने प्रति मुखस्य यथा मुखश्रीः॥११॥ ॥ ॥

स तु विप्रः। आत्मानमपि न पुनाति कुतः कुलं यतो भक्तिहीनस्यैते गुणा गर्वायैव भवंति न तु शुद्धय अतो हीन इति भावः॥१०॥ तर्हि किं धना-
द्यर्पणेन सन्मानं प्राकृत इव भगवान् अपेक्षते नेत्याह नैवेति। अयं प्रभुरीश्वरः अविदुषोऽल्पकाज्जनात् मानं पूजामात्मनोऽर्थे न। वृणीते नेच्छ-
ती यतो निजलाभेनैव पूर्णः। तर्हि किं पूजां नेच्छते तत्राह करुणः कृपालुः अतो वृणीते। एवं तत्र हेतुः यद्यदिति। यं यं मानं यद्वा यद्यस्मा-
त्। यद्येन धनादिना भगवते मानं विदधीत तद्देवात्मने भवति नान्यत्॥ यथा मुखे कृते व तिलकादिश्रीः शोभा प्रतिबिंबस्य भवति न तु साक्षा-
त्तस्यैव कर्त्तुमशक्यतेत ह्वतः॥११॥

१

ना० स०
३७

महद्भयं त्वन्यद्रस्तीत्याह त्रस्तोस्मीति दुःसहं यद्दुःखं संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोस्मि तत्र च असतां मध्ये हि स्वाराणां मध्ये सुकर्मनिबद्धः सन् प्रणीतः न त्रस्तोस्मि हे करुणावत्सल हे नु सततं मम मकदात्तु त्वं प्रीतः सन् अपवर्गं नन्तं शरणं तत्वांछितं कमलं अ ति आध्याय सिद्दास्ये सतिसत प्रीतिरतिचेत् तर्हि नना योनिषु क्लेशरूपमानस्य मम मदास्य हीनाभावात् त्वमेव तदुपदिशेति प्रार्थयेय

स्वकर्म

त्रस्तोस्म्यलं करुणावत्सल दुःसहोग्र ॥ संसारचक्रकदनाद्भ्र सतां प्रणीतः बद्धं स्वकर्मभिरुसततमं तेंऽघ्रिमूलं प्रीतोपवर्गशरणं कृपया शोकदाऽनु ॥२६॥ यस्मात्प्रियाप्रियवियोगसंयोगजन्मा शोकाग्निना सकलयोनिषु दह्यमानः दुःखौषधं तदपि दुःखमतद्धियाहं ॥ भूमन्भ्रमामि वद मे तव दास्ययोगं ॥२७॥ ॥ ॥ श्री ॥ ॥ श्री ॥

जन्मा

ते ॥२६॥ यस्मात् प्रियेष्वप्रियेषु यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना शकलयोनिषु दह्यमानोऽस्मि दुःखस्य प्रतिकारकार्यः इतिचेत्तत्राह ॥ दुःखस्यौषधं प्रतिकारः तदपि दुःखमेव एवमपि अतद्धिया देहाद्यभिमानेन मुह्यामि अत ॥ अहो भूमन् विभो मतवदास्यरूपं योगं ... वद ॥२७॥

३७

ततस्मात्ते बांभयपरिहारायमन्युंयछउपसंहरः ॥ यदर्थेश्चायंमन्युःसचासुरः साधूनांसंतोषार्थमया हतः अतःपरंक्रोधेनकार्याभावात तन्नियछनन्वेषांवधेनसाधुः किंमोदेततत्राह वृश्चिकादेः ॥ परोपद्रवकारिणोन्यत एवयातेमोहत्यावधेनतस्यचतत्र इज्ञातमि तिसाधुरपिमोदेतैवतर्हिवह्वनां सुखावहत्वादमुंक्रोधंनत्यजामितिचेत्तत्राह लोकश्च निर्वृतिंइताः ॥ प्राप्ताः संतः प्र तियंतिक्रोधोपसंहारं प्रतीक्षंतेततर्हिजनानांपुनर्भयाभावायमन्युंधारयामितिचेतत्राहरूपमिति विभवायभयनिर्वृत्यैएतद्रूपंस्म

तद्यछमन्युमसुरश्चहतस्त्वयाद्यमोदेतसाधुरपिवृश्चिकसर्प्पहत्यालोकाश्चनिर्वृत्तिमिताः ॥ प्रतियंतिसर्वे रूपंनृसिंहविभवायजनास्मरंति ॥ १४ ॥ नाहंविभेम्यजिततेतिभयानकास्य ॥ जिह्वार्क्कनेत्रभृकुटीरभसोग्र दंष्ट्रात् ॥ आंत्रस्त्रजक्षतजकेसरसं ॥ कुकर्णात ॥ निर्ह्लादभीतदिगिभादरिभिन्नखाग्रात् ॥ १५ ॥ ॥

रणादेवभयनिवृत्तेः ॥ नमन्युधारणेनकृत्यमस्तीत्यर्थः ॥ त्वंचेद्[illegible]द्विजेषितर्हित्यजामीसि चेतत्राहनाहमितिभो अजितेश्च स्मात्तस्मात् ॥ अहंनविभेमिकथंभूतात् अस्यंचजिह्वाच ॥ अर्कसदृशनेत्राणिचभृकुटीनांरभसआटोपश्चउग्रादंष्ट्रा एवभयानकानि यस्मिन् ॥ तस्मात्आंत्रमध्यः स्त्रतायस्मिंततआंत्रस्त्र ॥ क्तस्मात्क्षतजाक्तकेशरंयस्मिनतस्मात्शंकुवदुन्नतौस्तब्धौकर्णौ ॥ यस्मिन् यस्तस्मात् निर्ह्लादेननादेनभीतादिगाभायस्मात् अरीन्निर्दंतीत्यरिभिदितानिनखाग्राणियस्मात्तए वंभूतंदृश्चितेरूपादहंनविभेति ॥ १५ ॥
ता

५

ननुक्वचित्कश्चित्कुतश्चेत्केनचित्कदाचित्कश्चितरस्तकोपिद्रूपतएवेत्याशंक्याततआपितद्रूपेणत्वमेवरस्तकृइत्युररीकृत्यतः। सैवंसर्वात्मतामाहयस्मिन्निति। अपरोर्वाचीनपित्रादि॥ परोब्रह्मादिर्वाभाव: कर्त्तातत्तकारकैर्यद्यत्करोतिततसर्वंभवतएवस्वभा रूपंनतुपृथकुयस्मिन्नधिकारणेयतोनिमितात्तर्हियस्मिन्कालेयेनकरणेनहेतुकर्त्रासंचोदितश्चयस्यसंबंधियस्माद्उपा। दानत॥ यस्मैसंप्रदानायययदीप्सिततमंय:। कर्तैत्वेवंससविभक्त्यर्थः॥ यथायेनप्रकारेणेतिक्रियाविशेषेणभूतानामर्थ: पृथ

यस्मिन्यतोयर्हियेनचयस्ययस्माद्यस्मैयथायदुतयस्त्वपर: परोवा॥ नाव:करोतिविकरोतिपृथक् स्वभाव: संचोदितस्तदखिलंभवत:स्वरूपं॥ २०॥ मायामन: सृजतिकर्ममयंवलीय:॥ कालेनचो दितगुणानुमतेनपुंस:॥ छंदोमयंयदजयार्पितषोडसारंसंसारचक्रमजकोतितरेत्वदन्य:।२१॥

कृस्वभाव: सेत्वादिकप्रकृतिकरोतिउत्पादयति।। विकरोतिरूपांतरंनयतीति॥ २०॥ अतोन्यस्यरक्षकस्याभावात्संसारित्वाच्च नित्यमुक्त: त्वमेवमांसरणंगतंरक्षेतिप्रार्थयतेमायेतिद्वाभ्यां त्वदंसस्यपुंसो:। अनुमतेनईक्षणरूपेणानुग्रहेण मन: प्रधानंलिंगंमायासृजति: कथंभूताकालेनचोदिता:। क्षोभितागुणायस्या: कथंभूतमन: कर्ममयंकुर्वंनरूपंवलीय दुर्जयं छंदोमयंवेदोक्तकर्मप्रधानंच अजयाजीवस्याविद्ययातज्ञोगार्थेअर्पिता: षोडश विकारायस्मिन्नजदेवंभूतं संसारचक्रात्मकंमन: तत्कोतितरेतभो॥ अजत्वदन्य: त्वत: पृथक्स्थित: त्वामभजन्नित्यर्थ:॥ २१॥

ननु दासस्य योगे ऽप्रवृत्तस्यापि तदंतरायभूतानां सर्वोक्तनानादुःखानां कुतः परिहारस्तत्राह सोहं त्वद्दासः सन् । नो नृसिंह तव लीलाकथा अनुगृणन् दुर्गाणि महादुःखान्यंजसातितर्मि तरामि न गणयिष्यामीत्यर्थः । तत्र हेतुः गुणैः रागादिभिर्विप्रमुक्तः सन् तत्कुतः । ते पदयुगमेवालयो येषां भक्तानां त एव हंसा नाऽज्ञानिनस्तैः संगो यस्य मम सोहं कथंभूतस्य कथाः तत्राह प्रियस्ये त्यादि कुतो ज्ञाताः ॥ विरंचेन गीताः । तत्संप्रदायप्रवृत्ताः । तथा चाथर्वणी श्रुति देवा ह वै प्रजापतिमब्रुवन्नित्यादि दासस्य प्रवृत्तस्य भगवत्तु यहेण तत्संगस्ततो विरागतया गानेवद्धरणा वर्नितत स्वन दुःखाभिभवः स्यादिति । वाक्यार्थः ननु दुःखे सत्तप्तस्य तत्प्रतीका

सोहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरंचिगीता ॥ अंजस्तितर्म्यनुगृणन् गुण विप्रमुक्तो दुर्गाणि ते पदयुगालयहंससंगः ॥ १९ ॥ बालस्य नेह शरणं पितरौ नृसिंह । नार्तस्य चागदमुदन्वति मज्जतो नौ तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टस्तावद्विभो तनुभृतां त्वदुपेक्षितानां ॥ २० ॥ ॥ ॥

रो लोके प्रसिद्ध एव किमदास्यादिना तत्राह । १८ । बालस्येति ॥ नो नृसिंह तप्तस्य तत्प्रतिविधिः दुःखप्रतीकार यह लोके योऽंजसा इष्टः सत्वयोपेक्षितानां तावदेव स्वल्पक्षणमात्रमेव न त्वात्यंतिक इत्यर्थः । तदेवाह बालस्य पितरौ शरणं रक्षकौ विभौ न भवतः । ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् क्वचिद्दृष्टिगतत्वादिषु ताभ्यामेव तद्वधदर्शनाच्च नावार्तस्य रोगिणः अगदमौषधं शरणं कृतेप्योषधे मृत्युदर्शनात् । न च उदन्वति समुद्रे मज्जतः पुंसो नौ शरणं तया सह मज्जनदर्शनात् अतस्त्वमेव शरणमित्यर्थः । अथ वैतत्काकाक्ष्या व्याख्येयं तप्तस्य तत्प्रतिविधिर्य इह तावत्प्रसिद्धः स त्वमुपेक्षितानां किमंजसेष्टः । अपि तु नेष्ट एव यथा घस्तावदिह प्रतिविधिरिष्टः स किमंजसा नापाति नैवांजसेत्यादि योज्यं बालस्येत्यादि पूर्ववदेव । १९ ॥

भाग०स०
३५

किं वर्तमान[स्य] काले पि न भोगार्हो इत्याह ॥ क्वेति श्रुतिश्रवणं तदेव सुखं यासु ताः ॥ मृगतृष्णिकावन्मिथ्याभूता आशिषः क्व अशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं क्व चेदं कलेवरं ॥ एवं चेत् सर्वोपि जनः किं न विरज्येत तत्राह यद्यपि इति विद्वानयं जनस्तथापि न निर्विद्यते विरक्तो न भवति ॥ कुतः कामएवानलस्तं मधुतुल्यैः सुखलवैः ॥ सा धीरपि समयत् कामाग्निं समनव्यग्रस्य निर्वेदस्य वकाशो नास्तीत्यर्थः ॥ अचिन्त्यमिदं त्वन्मायाचेष्टितमिति भावः । तर्हि त्वं कथं निर्विण्णोसि ॥ अनर्हो पि मयि प्रभुदयालक्ष्म

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ॥ निर्विद्यते न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन्दुरापैः ॥ ३५ ॥ क्वाहं रजःप्रभव ईश तमोधिकेस्मिन् जातः सुरेतरकुले क्व तवानुकंपा न ब्रह्मणो न तु भवस्य न वै रमाया ॥ यन्मेर्पितः शिरसि पद्मकरः प्रसादः ॥ ३६ ॥

पर्यवेत्याशयेनाह ३५ क्वेति रजसैव प्रभवो जन्म यस्य सः । सत्तम्यंतं वा कुलविशेषणं तमोधिकं यस्मिन् । तस्मिन्नसुराणां कुले हं क्व च तवानुकंपा नामेवाह ब्रह्मादीनां शिरसि यो नैवार्पितः सपद्मकरः सकलसंतापहरः करः प्रसादः पुरुषार्थैः रूपो मे शिरस्यार्पितः । इति यत् यतः पयानुकंपयेति वा ३६ ॥

३५

ननु मम मायिमायासंबंधात्कर्तृत्वात् विशेषाच्च त्वत्तः। को विशेषः अत आह स इति। स्वधाम्ना चिच्छक्त्या नित्यं विजिता आत्मनो बुद्धेर्गुणा येन स हि त्वं यतः॥ कालः मायाद्रेरकः अतः वशीकृता विसृज्यानां कार्याणां साधनानां च मत्या येन अतः दुःसहं चक्रवन्निपीड्यमानं मामुपकर्ष स्वसमीपं च ननु लोकपालानां भोगान्॥ भुंक्ष्व पित्र्यं वा राज्यमिह दास्य। किमिति संसारादुद्विजसे तत्राह। दृष्टा इति त्रिभिः। २२। श्रियः संप

सत्वं हि नित्यविजितात्मगुणः स्वधाम्ना॥ कालो वशीकृतविसृज्यविसर्गशक्तिः चक्रे विसृष्टमज येश्वर षोडशारे॥ निःपीड्यमानमुपकर्ष विभो प्रपन्नः २२॥ दृष्टा मया दिवि विभोखिलधिष्ण्यपाना मायुः श्रियो विभवयश्च्छति या जनोयं॥ योऽस्मत्पितुः कुपितहासविजृंभित भ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः॥ २३॥ तस्मादमूस्तनुभृतामहमाशिषोज्ञ आयुः श्रियं विभवमैंद्रियमा विरिंच्यात्॥ नेच्छामि ते विलुलितानुरुविक्रमेण॥ कालात्मनोपनय मां निजभृत्यपार्श्वे॥ २४॥

द्रः विभवनद्भवः। आयुरादयो दृष्टा इति काङ्क्षा तुच्छत्वमुक्तं॥ तदेवाह यः स्मात्पितुः कोपहासविजृंभितभ्रूसंगमात्रेण विध्वस्ताः सच त्वया निरस्तः। २३॥ यस्मादेवं तस्मात् आशिषः भोगानैंद्र। तत्परिपाकं विज्ञानहं ऐंद्रिये भोगं ब्रह्मणो भोगमभिव्याप्य किंपि नेच्छामि ते कालात्मना नुरुक्रमेण विलुलितान् विध्वस्तान णिमादीनपि॥ २४॥

९

त्रि

वत्सकऋषिवाक्यमृतं द्धातुमित्यहं मन्ये ॥ कुतः यद्यस्मात् असतुस्य युक्तं विधित्सुः । खड्गं प्रगृह्यावोचत् को मद्परो मद्यतिरि
क्तश्चेदीश्वरोस्ति । तर्हि त्वामिदानीं अवतु तावकं शिरोहं । हरामीति पाठांतरे अयमेवार्थः ॥ यद्यदाऽवोचत तदा मत्प्राणरक्षणा
मितिवान्वयः ॥ एतच्चासत्यं विधातुं निजभृत्यभाषितमिति अत्रैव वक्ष्यद्व्याख्यातं नु चेदं पाक्षिपातेन रक्षणादेस्तु हननं च त्वयि
स्वभाविकं ॥ किंतु मायागुणैर्यौधिकें सर्वात्मके त्वयि स्वतस्तद्द्योगादित्याह ॥ ३९ ॥ ह एक इति एतज्जगत्वमेवैकः । यद्यतः

मत्प्राणरक्षणमनंतपितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं ॥ खड्गं प्रगृह्य यदवोचदसद्विधि
त्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ ३९ ॥ एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यसि
मध्यतश्च ॥ सृष्ट्वा गुणव्यतिकरं निजमाययेदं ॥ नानेव तैरवसितस्तदनुप्रविष्टः ॥ ४० ॥ ॥ ॥ ॥

अमुष्यादावंते च पृथगवस्यसि विरमं करोषि । सन्मात्रतया कारणत्वेनाऽविधित्वेन वर्त्तसे इत्यर्थः ॥ अतो मध्यतश्च त्वमे
वक कथं तर्हि भेदप्रतीतिस्तत्राह ॥ निजमायया गुणपरिणामात्मकमिदं जगत् सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हि तु भूतैर्ना
नेव सन्नेक एव हे तेव च । अवसितः प्रतीतः तदुक्तं स्कंधोपक्रमे निर्गुणोप्यह्यजो व्यक्तो भगवान् प्रकृतेः परः । स्वमायागुणमा
विश्य बाध्यबाधकतां गत इत्यादि ॥ ४० ॥

नचत्वयीदं अति चित्रमित्याह। नैवेति। एते ब्रह्मादय उत्तमाः। अयमसुरो नीच इत्येषा परावरमतिः। इतो अकृतस्य यथा तु या भवतो
नैव स्यात्। अत्र हेतुः जगतः आत्मनः सुहृदः अतो हि सर्वत्र मत्प्रसाद एकरूप एव किं न स्यात् तत्राह संसेवया तव प्रसादो भवति। त
त्र च सेवानुरूपं तत्तदनुसारेण धर्मादीनामुदयो भवति। एवं सत्यपि वैषम्याभावे दृष्टांतः सुरतरुर्यथा शेवकसेवसंकल्पानु
सारेण फलं ददाति। नच विषमस्तद्वत्। न परावरत्वं अत्र कारणमिति शेषः। ३७ एतच्च तत्कृत्य नकृपया मया प्राप्तमिति। त्वत्कृत्य पा

नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथापि॥ संसेवया सुरतरोरिव ते प्रसादः
सेवानुरूपमुदयो न परावरत्वं॥ ३७॥ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगा
त्॥ कृत्वात्मसात् सुरर्षिणा भगवन्गृहीतः॥ सोहं कथं नु विसृजे तव भृत्यसेवां॥ ३८॥ श्री॥ श्री॥ ॥

पूर्वमेवमानयेत्याशयेनाह॥ एवमिति यथा त्वयानुकंपितोस्मि एवं नारदेनात्मसात्कृत्वा पूर्वमनुगृहीतः॥ सोहं कथं नु त्वद्भृत्यसेवां वि
सृजामि कथंभूतो अनुगृहीतोस्मि प्रभव एवाहिर्युक्तः कूपः तस्मिन् कामानभितः॥ कामयमानं जनं नियतितमनु तत्प्रसंगात्। प्र
यतन्नहं। तदेवं त्वद्भृत्यस्य श्रीनारदस्यानुग्रहेण त्वया त्वं तमनुकंपितोस्मि॥ अयमेव च परमो नुग्रहः॥ न पुनरिदमेति तुच्छं मत्स्व
णारहरणादि॥ ३८॥ न चेदं त्वयानुग्रहार्थं कृतं किं त्वन्यार्थमित्याह। नो अनंत यदेतन्मम प्राणरक्षणं मां हंतुमुद्यतस्य मत्पितुर्वध

ना० स०
८२

इदानीं कारणत्वेनाद्यावपि पृथगवस्थानं दर्शयन्मध्यतस्त्वमेवेत्येतत्प्रपंचयति ॥ चतुर्भिर्यस्त्वमशेषस्तस्यैव नेङ्गत् ॥ वपुःस्व
रूपं नान्यस्य यत् त्वं मध्यतो नान्यस्याः कथंभूतस्य निजया कालशक्त्या संचोदिताः प्रकृतेः धर्माः सत्वादयो येन स्वरूपत्वे हे
तु ॥ अनंतशयनात् शेषपर्यंकात् विरमन् ॥ समाधिर्यस्य तस्य नाभेः शाकासादेः कार्णिकाद्वक्केः महान्ब्ज लोकपद्मं अभूत् कथंभू
तं आत्मनि लये एव गूढं सत्वकर्णिकात् ॥ सूक्ष्मात् वटबीजात् महावट इव तद्देवं कारणत्वेनानुगतः सन्मध्यतस्त्व

तस्यैव ते वपुरिदं निजकालशक्त्या ॥ संचोदितप्रकृतिधर्मिण आत्मगूढं अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जं ॥ ६३ ॥ तत्संभवः कविरतोन्यदपश्यमानस्त्वां बीजमात्म
नि ॥ ततं स्वबहिर्विचिंत्य नाविंददब्दशतमप्सु निमज्जमानो जातेंकुरे कथमहोपलभेत बीजं ॥ ६४ ॥ सत्वा
त्मयोनिरतिविस्मित आस्थितोब्जं ॥ कालेन तीव्रतपसा परिशुद्धभावः ॥ त्वामात्मनीश भुवि गंधमिवातिसू
क्ष्मं भूतेंद्रियाशयमये विततं ददर्श ॥ ६५ ॥
म
त्वमेवावर्तस इत्युक्तं ॥ एतदेवसु

इदं सत्वम् एवानुभवेत्स्मुत्पितुं तस्य प्राक्त
नीमवस्थामाह ॥ ६३ ॥ तस्मिन्नब्जे संभवो यस्य सः कविर्ब्रह्मा अतः पद्मादन्यदपश्यमानः भूवीजं उपादानकारणभूतं त्वां स्वस्मि
न्व्याप्तं संतमपि नाविन्दत युक्तं चैतत् ॥ उ ह अहो अंकुरे जाते सति बीजं तदनुगतं कारणं पृथक्कथं नाम पुमानुपलभेत भवत्वपास्य
मातु स्वस्मिन्नेव दृष्टवानित्याह सत्वेति परोक्षस्यो कुमतस्ततः सन्तीव्रेण तपसा ध्यानेन अन्येन सन्मात्ररूपेण उपादानत्वा यादर्शीन
नामन
मुक्तं ॥ ६५ ॥

स्वे
८२

ननुपर्यवेत उक्तं जगदहमेवत्तर्हि जगतेवैषम्यं मपिकिंनस्यादित्यत आह। त्वंवैत्वमेवइदं सदसत्कार्यकारणात्मकं जगत नतुत्वत्तः पृथक् भवांस्तु ततोन्यः॥ न्यायघंतयोपृथगवस्थानात्॥ यत् यस्माद्वं अतोयमात्मा योयंपरइति याबुद्धिः सात्मपार्था मा येवकारणोर्कपार्थि भेदं दृष्टांतं। तेन साधयति यद्यतः॥ यस्यजन्मरक्षणप्रकाशश्चयस्मिन्निधनमवस्थितिः। अतद्वैतदेव। अ स्थिबीजंकारणं तरुः। कार्यं तयोर्यथावस्तुकालमात्रत्वं अयमर्थः कालशब्देन नीलत्वाधारणं गुणयोगात्। पृथ्वीवसुशब्देन वसु मात्रंभूतं सूक्ष्मं तत्र तरोर्यथा पृथ्वीमपबीजमात्रत्वं तम्पचय थाभूतसूक्ष्ममात्रत्वं एवं सर्वमपिकार्यकारणात्मकं। जगत परम

त्वंवाइदं सदसदीशभवांस्ततोन्योमायायदात्मपरबुद्धिरियंह्यपार्था॥ यद्यस्यजन्मनिधनंस्थितिरीक्षणंच तद्वैतदेववसुकालवदस्थितर्वोः॥६१॥ न्यस्पेदमात्मनिजगद्विलयांबुमध्ये॥ शेषेत्मनानिजसुखानुभवोनिरीहः॥ ॥ योगेनमीलितदृगात्मनिपीतनिद्रस्तुर्येस्थितोनतुतमोनगुणांश्चयुंक्षे॥६२॥ श्री॥ ॥

कारणात्मकं शेषेति॥ तथाचपारमर्षंच सूत्रं तदनन्यत्वमारंभणशब्दादिभ्यइति श्रुतिश्च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येवसत्यमिति। ६१। तत्र तावद्दर्तपृथगवस्थानं दर्शयति। न्यस्येति इदं जगदात्मनि निधाय सुखमेवानुभवति निःक्रियसन यत्प्रलयोदकमध्येशायनं करोषि तत्हि किंजीववत्स्वमायापितवाह्यंइतिरूपानिद्राशीनहि नहि योग एव त[illegible]हि रत्यज्ञानावसाम्यानिद्रोच्यत इत्याह। योगेननिमीलितेदृशौ येन आत्मनस्वरूपप्रकाशेन निपीता निद्रा येन तस्तुर्ये अवस्थात्रयातिरिक्ते स्वरूपे स्थितत्वं नतु स्वप्नएवात्मनातमोमुक्ष्मेन सोऽयशिन पश्यसि॥ नचजाग्रत्स्वप्नयोरिव गुणान विषयान इत्यर्थः॥६२॥

ति चपलादृक्चक्षुः॥ कर्मेशक्तिः कर्मेंद्रियाणि लुनंति ओटपति॥ न केवलमहमेक एवं कर्षंदशामापन्नः किंतु महानुजनोप्येवमेवक्लिश्यति॥ अतः सर्वं जनं पालयेति॥ प्रार्थयेति। एवमिति भवसंसारः एव वैतरणी। यमद्वारनदी तस्यां अन्योन्यतेर्याणि जन्मादीनि तेभ्यो अतिभीतं स्वेषां परेषां च विग्रहे सुयथापथ वैरमैत्रं च यस्य एवं मम जनं पश्यन् हे पारचर तस्याः पारे स्थितः नित्यमुक्त हे तात अहो कष्टमित्येवमनुकंप्यो द्वयोपीर हि वैतरणीमुत्तार्य पालय॥ एकेन मया सर्वो जनः कथं तारणीय इति

द्वितीये कतोऽच्युतविकर्षति माविविस्नाशि घ्नोन्यतस्त्वगुदरं श्रवणां कुतश्चित॥ घ्राणोन्यतश्चपलदृक्क्व च कर्मशक्ति र्वह्व्यः सपत्न्य इव गेहपतिं लुनंति॥ ४०॥ एवं सकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशयनीतनीतं पश्यन् जनं स्वपरविग्रहवैरमैत्रं हे ते तिपारपी बृहि गूढ मद्य॥ ४१॥ कोन्वत्रतेखिलगुरो भगवन्प्रयास उत्तारणेस्य भवसंभवलोपहेतोः॥ मूढेषु वै महदनुग्रह आर्त्तबंधो॥ किं तेन ते प्रियजनाननुसेवतां नः॥ ४२॥ श्रीराधावल्लभजी॥॥ ॥॥ ॥॥

चेत्तत्राह। कोन्वत्रेति। अत्र सर्वजनतोतारणे अल्पमात्रोनकोपि कृतः॥ अस्य विश्वस्य भवसंभवलोपानां उत्पातिस्थितिसंहाराणां हेतोः ततो किमेतत् दुष्करमिति भावः॥ उचितं चेतदित्याह मूढेष्विति॥ त्वां च त्वदीयांश्च तारयिष्यामि इमं दुराग्रहं मा कृथा इति चेत्तत्राह॥ तव ये प्रियजना भक्तास्तान् अनुसेवमानानां नोस्माकं तेन उत्तारणेन किं कोतिप्रयासो सुखालकाहरेः॥ कोन्वत्रतेखिलगुरो भगवन्प्रयासः प्रह्लाद इत्थमुपदिश्यपमित्योनराणां मीसेन सख्यमकरोत पनीयमायां॥ ४३॥ श्री॥ श्री॥॥

ईश्वरत्वेन चर स्याकृतार्थो भवदित्याह ॥ एवमनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धं मायामयं मायाः
प्रधानसत्ताप्रपंचेनोपलक्ष्यतेसंनिवेशः ॥ यद्वादिरचनायस्य तदा च भवांस्तस्यानुग्रहं ॥ कृतवानित्याह ॥ ३६ ॥ तस्मादितिहयग्रीव
मूर्ति बिभ्रत्सन् रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान् [illegible] समर्पितवान् तत्र हेतुः सत्वमिति ॥ ३७ ॥ एकः त्व

६

एवं सहस्रवदनांघ्रिशिरः करोरुनासास्यकर्णनयनाभरणायुधाढ्यं ॥ मायामयं सदुपलक्षितसंनिवेशं । दृष्ट्वा महा
पुरुषमापमुदं विरिंच्यः ॥ ३६ ॥ तस्मै भवान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ ॥ हत्वानयच्छ्रु
तिगुणांस्तु रजस्तमश्च सत्वं तव प्रियतमां तनुमामनंति ॥ ३७ ॥ इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभाव
यसि हंसि जगत्प्रतीपान् ॥ धर्मं महापुरुषपासि युगानुवृत्तिं छन्नः कलौ यदभवस्त्रियुगोऽथ सत्वं ॥ ३८ ॥ नैतन्मनस्त
वकथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधुतीव्रं ॥ कामातुरं हर्षशोकभयेषणार्तं तस्मिन्कथं तव गतिं विमृ
शामि दीनः ॥ ३९ ॥

मेवेत्यादिभिरष्टभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं ॥ तद्विपक्षवध श्च सत्वोपाधितो न तु स्वत इति । तदुपसं
हरति इत्थमिति । विभावयसि पालयसि हंसि घातयसि । कलौ तु तन्न करोषि यतस्त्वदा छन्नोऽभवः यतस्त्रिष्वपि युगेष्वाविर्भावात्
स एव त्वं त्रियुग इति प्रसिद्धः ॥ तदेवं भगवतस्तत्वं निरूप्य स्वस्य च तद्विचारयोग्यतां निवेदयन् आर्यपेते नेत । दिति त्रिभिः किं
च विकाश्च विविष्मास्मसतीभोगश्च्युतमामायतो मधुरादिरसस्य आकर्षयति । उदरं तु क्षुधासंतप्तं सद्य एव यत् किंचिदाहारमात्रं प्र

भा० स०
७३

ननु मौनादिभिर्मोक्षसाधनैः सुलभैव तेषामपि मुक्तिस्तत्राह ॥ मौनेति हे पुरुषः ॥ अंतर्यामिन् ये मौनादयो दश आपवर्ग्या अपवर्गः । हे
तवः ॥ प्रसिद्धाः विविक्तवासः ॥ ते तु प्रायसः ॥ अजितेंद्रियाणां इंद्रियभोगायार्थविक्रीणीता वार्त्ता जीवनोपाया भवंति ॥ दांभिकानां
वार्त्ता अपि न भवंति ॥ वा न वा दंभस्यानियतफलत्वात् ॥ ४६ ॥ त्वज्ज्ञानं तु भक्तिं विना सकामे मौनादिभिर्न भवत्येवेत्याह ॥ रूप इति त्रिभिः ॥ बी
जांकुराविव प्रवाहापन्ने इमे सदसती कार्यकारणे एव ते रूपे नु पलक्षणा । नृते वेदेन सृष्टे प्रकाशिते न चान्यत् । स्वसमवेति गोरत्वा

मौनानुबन्धश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रायः
परं पुरुष ते त्वजितेंद्रियाणां ॥ वर्त्ता न वंत्युत न चात्र तु दांभिकानां ॥ ४६ ॥ रूपे
इमे सदसती तव वेदसृष्टे बीजांकुराविव न चान्यदरूपकस्य युक्ताः समक्ष
मुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥

दिकमिव देवदत्तादेः कुतः अरूपस्य प्राकृतरूपादिसून्यस्य । अतः युक्ताः सपित्रा एव भक्तियोगेन सत्य हंत्वा मुनयः नु कार्य्य
कारणे वानुगतप्रतिम यथेन दारुषु वह्निमिव नान्यतः स्यात् ज्ञानमिति ॥ शेष यद्वा ज्ञान ॥ प्रकारमेवाह ॥ अत उभयमन्यतः
प्रधानपरमाणुवादेर्नस्यात् स एवेह्नितेत्यादिष्कृतेः ॥ अतस्त्वमेव कारणत्वात् सर्वज्ञानुस्यूत इति ॥ ४७ ॥

वत्सप्रह्लाद त्वं तावत्तारयिष्यामि ॥ तावतैव कृतार्थः किमनेन निर्बंधेनेत्यत आह । नैवेति ॥ हे पर सर्वोत्तम त्वद्वीर्यगापनमेव महामृ
तं तस्मिन् मग्नं चित्तं यस्य सोऽहं भववैतरण्या नैवोद्विजे । किंतु विमूढानशोचामि तानेवाह । ततो महामृतात् विमुखं चेतो येषां प्रत्युत्पथ
तः इंद्रियार्थनित्यं जन्मयासुखं तदर्थं भरं कुटुंबादिभारः मुद्वहत ॥५३॥ त्वं तावन्मुक्तिं गृहाण तां त्वज्ञा मुनयः उपदिशंतीति चेत्तत्रा
ह । प्रायेणेति न विमुमुक्षे विमुक्तिं नेच्छामि तर्हि त्वं किमपि प्रार्थयमानमेव किमिति निर्वेध्नासीति चेत्तत्राह । त्वत्तोन्यमस्य जनस्य शरणं न प

नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः । शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय
भरमुद्वहतो विमूढान् ॥५३॥ प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति विजने न परार्थनिष्ठाः । नैतान् वि-
हाय कृपणान् विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोनुपश्ये ॥५४॥ यन्मैथुनादि गृहमेधिसुखं हि तुच्छं । कंडू-
यनेन करयोरिव दुःखदुःखं तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसिजं विषहेत धीरः ॥५५॥ ॥

श्यामि ॥५४॥ नन्वेवं स्त्रीसंभोगादिना सुखिन एव कुतः कृपणास्तत्राह ॥ यदिति करयोः कंडूयने । न संघर्षणे नैव दुःखं यस्मिन् तर्हि दुःख
त्वादेव ततो निर्वेधमुचोरन् तत्राह ॥ कृपणाः कामुकाः बहुदुःखभाजोऽपि इह गृहमेधिसुखेन तृप्यंति अलमिति मन्यंते कंडूतिव
त्कामस्य दुःसहत्वात् । ननु कंडूतिमपि सहते कामं चेति स्यात्तत्राह । तत्प्रसादात्तु कश्चिद्धीर एव मनसिजं कामं विषहेत न तु सर्वे अत्रा
पि कंडूतिवदिति दृष्टांतः ॥५५॥

कामांन प्ररयतीति तथा यद्वा पुरुषार्थेष्ववाहोस्मीत्यर्थः। अप्रीणतः तप्तुं अपर्णीकामत्वेन शोचितुं ॥६३॥ प्रीणंति तोषयंती ॥६४॥ एकां
तित्वात निरुपाधिभक्तत्वात ॥६४॥ इति सप्तनवमः ॥९॥ दशमे त्वनुगृह्यास्तु भक्तमंतर्हिते हरौ ॥ प्रसंगाद्धरिणारुद्रे कृतानुग्रह ईर्यते ॥

श्रीनृसिंह उवाच ॥ प्रह्लाद भद्र भद्रं ते प्रीतोहं तेसुरोत्तमः ॥ वरं वृणीष्वाभिमतं कामपूरोस्म्यहं नृणां ॥६२॥ माम
प्रीणत आयुष्मन दर्शनं दुर्लभं हि मे ॥ दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हसि ॥६३॥ प्रीणंति ह्यथ मां धीराः सर्वभा
वेन साधवः श्रेयस्कामा महाभागाः ॥ सर्वासामाशिषां पतिं ॥६४॥ एवं प्रलोभ्यमानोपि वरैर्लोकप्रलोभनैः ॥ एका
तित्वाद्भगवति नैछत्तानसुरोत्तमः ॥६५॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे नवमोध्यायः ॥९॥ श्रीनारद
उवाच ॥ भक्तियोगस्य तत्सर्वमंतरायतयार्भकः ॥ मन्यमानो हृषीकेशं स्मयमानमुवाच ह ॥१॥ प्रह्लाद उवाच
मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः ॥ तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ॥२॥ भृत्यलक्षणजि
ज्ञासुर्भक्तं कामेष्वचोदयत ॥ भवान संसारबीजेषु हृदयग्रंथिषु प्रभो ॥३॥ नान्यथा तेखिलगुरो घटेत करुणात्मनः ॥४॥

तत्सर्वं वरजातं । उत्पत्त्या स्वभावेनैव आसक्तं मां तेषां कामानां संगाद्भीतः ॥ ननु किमहं भक्तं प्रलोभयामि न हि किंतु वरं वृणीष्वेति ॥ वदतस्त्व
वाभिप्रायोन्य एव इत्याह भृत्यलक्षणेति । हृदयग्रंथिवद्बंधकेषु ॥३॥ अन्यथा अनर्थसाधनेषु वर्तमानं न घटेत इत्यर्थः ॥४॥

तदेवाह — वायुरिति हृदयं मनः चित्तचितः अनुग्रहो हंकारः देवतावर्गो वासः गुणाः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनो
वचः । तेन निरुक्तं प्रकाशितं किमपि त्वत्तोऽन्यन्नास्ति ॥ ५८ ॥ अभक्तास्तु स्वस्मिन्ननुगतमपि त्वां न जानंतीत्याह नैते गुणाद्यभिमानिनो दे
वाः आद्यंतवंतः ॥ उडुपाधित्वात् अनाद्यंतं निरुपाधिं एवं त्वां न विदंति हि यस्मात् सुधियो विद्वांसः एवं विचार्य त्रास्त्रात् अध्या
नान् हित्वा पारावरमति । त्वामेव समाधिनोपासतामित्यर्थः । तथा च श्रुतिः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे इति । ना

त्वं वायुरग्निरवनिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च सर्वं त्वमेव सगुणो विगुणश्च भूमन्ना
न्यत्त्वदस्त्यपि मनोवचसा निरुक्तं ॥ ५८ ॥ नैते गुणा न गुणिनो महदादयो ये सर्वे मनः ॥ प्रभृतयः सहदेवम
र्त्याः आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधियो विरमंति शब्दात् ॥ ५९ ॥ तत्तेऽर्हत्तम नमः स्तुतिक
र्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायां संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः । परमहंसगतौ
लभेत ॥ ६० ॥ नारद उवाच ॥ एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ॥ प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥ हर ॥

नुध्यायान्बहूञ्छब्दान् वाचो विग्लापनं हि तदिति च स्मृतिश्च । यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य ।
श्रुतिस्य चेत्यादि ॥ ५९ ॥ उपसंहरति तदिति द्विः अर्हत्तम नमः स्तुतिकर्मपूजाः । अर्पिता याते स्तुतिः सर्वकर्मार्पणानि कर्म च प
रिचर्या चरणयोः । स्मृतिश्च कथायां श्रवणं चेत्येवं षडंगया सेवया विना परमहंसानां गतौ प्रेसित्वयि जनः कथं भ
क्तिं लभेत तस्मादेवं भक्तिं विना न च मोक्षो न न भक्तिसंसेवया विना श्रुतः । श्लोकप्रार्थितं दास्ययोगमेव देहीति प्रकरणार्थः ॥ ६० ॥

सत्यमेवैकांतभक्तस्त्वं तथापि मदाज्ञा करणीयेत्याह ॥ नेतिते एकांतिनः कदाचिदपि इहामुत्र च मत्त आशिषो न वांछंत्येव तथाप्येतन्मन्वं
तरमात्रं भोगाननुभुंक्ष्व ॥२२॥ ननु तर्हि बंधः स्यादित्यत आह कथा इति द्वाभ्यां सर्वेषु भूतेषु संतमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य
यजस्व तर्ह्यनेनैव कर्मणा बंधः स्यान्नेत्याह ॥ योगेन मदर्पणेन कर्म हित्वन यजस्वेति किंच ॥२२॥ भोगेन सुखानुभवेन प्रारब्धं पुण्यं हि
त्वा मुक्तबंधः शनलोकानुग्रहार्थं कीर्तिं च विस्तार्य मां प्राप्स्यसि कुशलेन पुण्याचरणेन पापं हित्वेति विभीषामात्रं अन्यथा तत्स्वराज्ये

श्रीनृसिंह उवाच ॥ नैकांतिनो मे मयि जात्विहाशिष आशासतेमुत्र च ये भवद्विधाः ॥ अथापि मन्वंतरमेत
दत्र दैत्येश्वराणामनुभुंक्ष्व भोगान् ॥२२॥ कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकं ॥ सर्वेषु
भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥२३॥ भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हि
त्वा कीर्तिं विशुद्धां सुरलोकगीतां वितत्य मामेष्यसि मुक्तबंधः ॥२४॥ य एतत्कीर्तयेन्मह्यं त्वया गीतमि
दं नरः ॥ त्वां च मां च स्मरन्काले कर्मबंधाद्विमुच्यते ॥२५॥

प्रवृत्ते ॥ ननु तस्य प्राचीनं पापमस्ति ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् ॥ तत्सुकृतदुःकृते विधुनुतः
इति श्रुतेश्च ॥ न चेदं प्रारब्धं पापं अभिप्रायं तस्य तत्र योगेनैव हन्यात् तत्कुशलेन हित्वेति वचनानुपपत्तेः ॥ न चासौ विद्वानिति वाच्यं भ
गवतैव कर्तार्यस्यानंतरं वक्ष्यमाणत्वात् ॥ अत एव योगेन कर्म हिन्वन्नितीदमपि लोकसंग्रहार्थे कर्मणि प्रवृत्तितस्यानु
द्वेगमात्रायेति सर्वमनवद्यं ॥२३॥ किंच य इति त्वां च मां च इदं मच्चरितं च स्मरन्नेतत् ॥ स्तोत्रं यः कीर्तयेत् सोपि कर्मबंधाद्विमुच्यते
॥२५॥

कथमेवं भृत्यलक्षणाज्ञानं स्यात्तत्राह ॥ य इति ॥ ते त्वत्तः ननु कामनयापि सेव्यसेवकयोः स्वामिभृत्यभावः प्रसिद्धः सत्यं सोपाधिकोऽसौ न त्वा-
त्त्विक इत्याह ॥ स्वामिन्यात्मन आशिषो ऽपेक्षमाणो नैव भृत्यः भृत्यहेतुकामात्मनः स्वाम्यमिच्छन्यो भृत्याय ददाति स च नैव स्वामी आ-
वयोस्तु तात्त्विको सावित्याहः ॥५॥ अहं त्विति ॥ अनपाश्रयो निरभिसंधिः ॥६॥ अन्यथा कामाद्यभिसंधिबीनाश्रयोऽङ्तं नास्ति । ननु तथा-
पि परमोदारस्य मम संतोषार्थं किमपि वृणीष्विति चेदत आह ॥ यदीति ॥७॥ कामांकुराणां असंरोहं ॥ अनुत्पत्तिं भवतः सकासात् ॥

यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् आशाशानो न वै भृत्यः ॥ स्वामिन्याशिष आत्मनः ऽ
न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः ॥५॥ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः । ना ऽ
न्यथेहावयोरर्थो राजसेवकयोरिव ॥६॥ यदि दास्यसि मे कामान्वरांस्त्वं वरदर्षभः । कामा ऽ
नां हृद्यसंरोहं भवतस्तु वृणे वरं ॥७॥ इंद्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ॥ ह्रीः श्रीः तेजः
स्मृतिः सत्यं यस्य नश्यंति जन्मना ॥८॥ विमुंचति यदा कामान्मानवो मनसि स्थितान तर्ह्येव पुंडरीकाक्ष
भगवत्त्वाय कल्पते ॥९॥ ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने ॥ हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥१०॥

ननु कामोत्पत्तौ सत्यां को दोषस्तत्राह ॥७॥ इंद्रियादीनि यस्य कामस्य ॥ जन्मना नश्यंतीति आत्मा देह ॥८॥ कामाभावे गुणमाह ॥ वि-
मुंचतीति ॥ भगवत्त्वाय तुल्यैश्वर्याय तथा च श्रुतिः । यदा सर्वे प्रमुच्यंते । कामा येऽस्य हृदि स्थिताः ॥ अथ मर्त्योऽमृतो भवत्य-
त्र ब्रह्म समश्नुत इति ॥ निर्दोषान् । कामान्दातुमिच्छंतं प्रारब्धस्य नमस्यति । ॐ नम इति ॥१०॥

भाग॰स॰
७६

ममर्त्विग्भिर्मयास्पृष्टैर्भर्तैस मस्तानि गमान धर्म्मानित्यपृक्षः ॥ अहतल्लवान सल्वयाहतः ॥ २६ ॥ एतद्दृष्ट्या समितः सम्यक् प्राप्तः सर्वतः संत्रा
सात ॥ गोमृत्स्वस्तकं ॥ २८ ॥ एवं वर स्त्वयान प्रदेयः ॥ क्रूरो निसर्गः खनवोयेषां मृतं स्त्रीरं शिम्भुपोलरं तव क्रूयोः दि घतोमीलान्तस्ता

श्रीशुक उवाच प्रल्हादोपितथाचक्रे पितुर्यत्सांपरायकं ॥ यथाह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ॥ प्रशान्तसुमुखं
दृष्ट्वा ब्रह्मा नरहरिं हरिं ॥ स्तुत्वा वाग्भिः पवित्राभि प्राह देवादिभिर्वृतः ॥ २७ ॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज ॥ दि
ष्ट्या ते निहितः पापो लोकसंतापनोसुरः ॥ योसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ॥ तपोयोगबलोन्नद्धः समस्तान्निगमान्नह
न् ॥ दिष्ट्यास्य तनयो साधुर्महाभागवतोसुरः ॥ त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोधुना ॥ एतद्रूपस्ते भगवन् ध्यायतः
प्रयतात्मनः ॥ सर्वतो गोप्तृसंत्रासान्मृत्योरपि जिघांसतः ॥ श्रीनृसिंह उवाच ॥ मैवं वरोसुराणां प्रदेयः पद्मसंभवः ॥ वरः
क्रूरनिसर्गाणामहीनाममृतं यथा ॥ नारद उवाच ॥ इत्युक्त्वा भगवान् राजंस्तत्रैवांतर्दधे हरिः ॥ अदृश्यः सर्वभूतानां पूजितः
परमेष्ठिना ॥ ३० ॥ ततः संपूज्य शिरसा ववंदे परमेष्ठिनं ॥ नवं प्रजेश तैर्देवान् प्रल्हादो भगवत्कलाः ॥ ततः काव्यादिभि
सार्द्धं मुनिभिः कमलासनः ॥ दैत्यानां दानवानां च प्रल्हादमकरोत्पतिं ॥ प्रतिनंद्य ततो देवाः ॥ प्रयुज्य परमाशिषः स्वधा
=
मानि ययुः राजन् ॥ ब्रह्माद्यो द्रोमकरोत्पतिं प्रतिनंतो दितेः ॥ हृदि स्थितेह हरिणा वैरभावेन तौ हतौ ॥ ३४ ॥ पुनश्च विप्र
शापेन राक्षसौ तौ बभूवतुः ॥ कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ॥
तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३६ ॥

पुत्रं तद्देवं पूर्वजन्मादि कथनादिभिरुपमा
समिः ॥ दितेपुत्रत्वं प्रापितो विप्रशापेन पुनरस्यानुषंगः ॥ ३६ ॥
दितमुपसंहरति एवमितिस

७६

स्वराज्ञ्यासाशिकर्माधिकारसन पितुर्निवृत्तिं प्रार्थयते ॥ वरं वरणीयमेतत्परं वृणोते त्वत्तः ॥ १४ ॥ विद्धेन मयि एनक्रोधेन आशयो
यस्य ते ॥ १५ ॥ अयोगेन संदृष्टः ॥ अतः एतदेव तथापि मोक्षपरत्वात्सलकार्य्ये एपेन प्रार्थयेत्यर्थः ॥ १६ ॥ यद्यपि कस्पयोमरीचिष्टिस्ते चेति
तत ॥ पितुस्त्वय एव एवं डाः ॥ तथापि त्रिसप्तभिः सहेति प्राक्तत्यगतपितृभिप्रायेणोक्तं ॥ १७ ॥ यद्यस्मात सम्पगुत्तमश्लोको रोयेयं लीक

प्रल्हाद उवाच ॥ वरं वरय एतत्ते वरदेशान महेश्वर ॥ यदनिंदत्पिता मे त्वामविद्वांस्तेज ईश्वरं ॥ १४ ॥ विद्धामर्षाशयः
साक्षात्सर्वलोकगुरुं प्रभुं ॥ भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् ॥ १५ ॥ तस्मात्पिता मे पूयेत दुरंतादुस्तराद् घा
त् ॥ पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल ॥ श्रीभगवानुवाच ॥ त्रिसप्तभिः पिता पूतः पितृभिः सह तेनघ ॥ यत्साधो
ऽस्य गृहे जातो भवान्वै कुलपावनः ॥ १७ ॥ यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शिनः ॥ साधवः समुदाचारास्ते पूयंतेऽपि
कीकटाः ॥ १८ ॥ सर्वात्मना न हिंसंति भूतग्रामेषु किंचन ॥ उच्चावचेषु दैत्येंद्र मद्भावेन गतस्पृहा ॥ १९ ॥ नेवंति पुरुषा
लोके मद्भक्तास्त्वामनुव्रताः ॥ भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २० ॥ कुरु त्वं प्रेतकार्याणि पितुः पुत्रस्य सद्व

मु

शः ॥ मदंगस्पर्शनेनांग लोकान्प्राप्स्यति सुप्रजाः ॥ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ॥ मय्यावेश्य मनस्तात कुरु कर्मा
णि मत्परः ॥ २२ ॥

टापि देशास्तत्तुल्याः असंतश्च पूयंते शुद्धाः भवंति ॥ ननु त्वद्भक्तानामयं महिमा तेन चित्रं अहं तु तादृशो नभवामीति
चेत्तत्राह ॥ १९ ॥ सर्वेणात्मनेति द्वाभ्यां मद्भावेन मद्भक्त्या विगतस्पृहा येषां मदंगस्पर्शेन नसद्वंशः ॥ एतस्य पितुः पापशंकैव नास्ति पुत्र
कृत्यानि प्रेतकार्याणि कुरु ॥ वेदवादिभिरुक्तां ॥ २२ ॥

एततएतांमृगेंद्रस्यलीलांतामेवाहदैत्येंद्रस्यचयूथपानांचवधंयःशुचिःसन्पठेत॥पुण्यमनुभावंप्रभावमितिनिश्चयंवालोकंवैकुं
ठं॥अहोप्रह्लादस्यभाग्यंयेनदेवोदृष्टःवयंतुमंदभाग्याः।इतिविषीदंतंप्रत्याह॥४६॥यूयमितित्रिभिःयेषांयुष्माकंगृहानमु
नयोभियांतिसर्वतःसमायांति।ततकस्यहेतोःयस्मादेवयुष्मद्गृहेषुनराकारंगूढंसनश्रीकृष्णाख्यंपरंब्रह्मसाक्षाद्वसतीतिननुकृ
ष्णोस्माकंमातुलेयः।कथंब्रह्मेत्युच्यतेतत्राह॥४७॥सवाइतिसोयंब्रह्मैवकथंभूतःमहद्भिर्विमृग्यंयत्कैवल्यंमुक्तिरूपंवा

एतद्यआद्यपुरुषस्यमृगेंद्रलीलांदैत्येंद्रयूथपवधंप्रयतःपठेत॥दैत्यात्मजस्यचसतांप्रवरस्यपुण्यं
श्रुत्वानुभावमकुतोभयमेतिलोकं॥४६॥यूयंनृलोकेवतभूरिभागाःलोकंपुनानामुनयोभियांति॥येषां॥
गृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगं॥४७॥सवाअयंब्रह्ममहद्विमृग्यःकैवल्यनिर्वाण॥
सुखानुभूतिःप्रियःसुहृद्वःखलुमातुलेयः॥आत्मार्हणीयोविधिकृद्गुरुश्च॥४८॥नयस्यसाक्षाद्भ
वपद्मजादिभिरूपंधियावस्तुतयोपवर्णितः॥मौनेनभक्त्योपशमेनपूजितःप्रसीदतामेषससात्वतांपतिः
॥४९॥

युष्माकंखलुप्रियःसुहृदित्यादिरूपोभवतिविधिकृतः।आज्ञानुवर्तीननुपरंब्रह्मचेत।कथंयुष्मत्सहस्त्रीपुरतिःकथंवाध
र्मोद्याचरणंतस्येत्यतआह॥४८॥नयस्यरूपंतत्वंसाक्षाद्भवादिभिरपियत्स्वबुध्यावस्तुतयाऽ[illegible]द्मिथ्यामितिसाक्षान्नो
पवर्णितसयुष्माकंस्वयमेवप्रसन्नः।अस्माकंतुमौनादिसाधिनैस्तत्प्रसादःप्रार्थनीयएवेत्याहमौनेनेतिसएषसात्वतांपति
नःप्रसीदतु।ननुप्रह्लादस्यगृहेषुपरंब्रह्मवसतिनचतद्दर्शनायमुनयस्तद्गृहानभियांतिनचतस्यब्रह्ममातुलेयादिरूपेण

रा

करूषभिडौ दंतवक्त्रः हरौ सायुज्यं समीयतुः ३९॥ कृष्णनिंदादिना एवं कृतं च यत्। एनः पापं तत्क्षिप्तेनेन तदात्मनः संतो जहुः। तदात्मत्वे हे
त्वंतः कीटपेशस्कृतो ध्यानेन यथा तदात्मा भवतीति ४०॥ अभिदा मेदरहितेनानुसन्धानेन हरेः॥ सात्म्यं सारूप्यं ४१॥ प्रह्लादचरितार्थमुपसंहर
ति एवेति चतुर्भिः॥ अवतारश्रीनृसिंहरूपस्तस्य कथा आख्यातेति शेषः॥ ४२॥ प्रह्लादस्यानुचरितं चेत्यादि समाप्तमिति तृतीयेनाऽयमर्थः

तावि है वपुनर्जातौ शिशुपालकरूषजौ॥ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः॥३९॥ एनः पूर्वकृतं यत्तद्राजानः कृष्ण
वैरिणः॥ जहुस्त्वंते तदात्मानः कीटः पेशस्कृतो यथा॥४०॥ यथा यथा भगवतो भक्त्या परमयाभिदा॥ नृपाश्चैद्या
द्यः सात्म्यं हरेस्तच्चिंतया ययुः॥४१॥ आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान्॥ दमघोषसुतादीनां हरेः सात्म्यम
पि द्विषां॥४२॥ एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः॥ अवतारकथा पुण्या वधो यत्रादिदैत्ययोः॥४३॥ प्रह्लादस्यानु
चरितं महाभागवतस्य च॥ भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः॥४४॥ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं
परावरेषां स्थानानां कालेन व्यत्ययो महान्॥ धर्मो भागवतानां च भगवान्येन गम्यते॥ आख्यानेऽस्मिन्समाम्नातमा
ध्यात्मिकमशेषतः॥४६॥ य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितं॥ कीर्तयेच्छ्रद्धया श्रुत्वा सर्वपापैर्विमुच्यते॥
॥४७॥

सेति॥ ४४॥ अनेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वं अनेन कृतं हरेर्गुणकर्मानुवर्णनं चेत्यर्थः। परावरेषां देवदैत्या
नां यानि स्थानानि तेषां व्यत्ययो विपर्यासः॥ अध्यात्मिकं आत्मानात्मविवेकादि एतच्छ्रवणादि फलमाह॥ ४६॥ य इति द्वाभ्यां एतच्छ्रुत्वा यः
क कीर्तयेत्॥ ४७॥ २

कृपरसेस्वयंनिर्म्मिता। कृपामृते॥५८॥वज्रसाराः वज्रवद्दृढांगाः महौजसोमहाबलाः मेघदलनाः मेघभेदिनोविद्युद्रूपा वक्त्राइव
५९

तैःसहाव्यसवःसर्वेनिपेतुःस्मपुरौकसः॥तानानीयमहायोगीमयःकृपरसेक्षिपत्॥५८॥ सिद्धामृतरसःस्पृष्टावज्र
सारामहौजसः॥नतस्युर्मेघदलनावैद्युताश्चवक्त्रायः॥विलोक्यभग्नसंकल्पंविमनस्कंवृषध्वजं॥५९॥तदायंभग
वान्विष्णुस्तत्रोपायमकल्पयत्॥६०॥वत्सआसीत्तदाब्रह्मास्वयंविष्णुरयंहिगो॥प्रविश्यत्रिपुरंकालेरसंकूपा
मृतंययौ॥६२॥तेऽसुराह्यपिपश्यंतोनन्यषेधन्विमोहिताः॥तद्विज्ञायमयोयोगीरसपालानिदंजगौ॥स्वयंविशो' कशा
कान्तान्स्मरन्दैवगतिंचतां॥देवोऽसुरोनरोन्योवानेश्वरोस्तीहकश्चन आत्मनोन्यस्यवादिष्टंदैवेनापोहितंद्वयोः
अथासौशक्तिभिःस्वाभिःशंभोःप्राधान्निकंव्यधात्॥६४॥धर्मज्ञानविरक्त्यर्द्धितपोविद्याक्रियादिभिः॥रथसूतध्व
जंवाहानधनुर्वर्मशरादियत्॥६५॥सन्नद्धोरथमास्थाययशरंधनुरुपाददे॥शरंधनुषिसंधायमुक्तेऽभिजिति
श्वरः॥दग्धाहतेनतुर्नैद्याःहरोथत्रिपुरोनृप॥६६॥

॥५९॥कालेमध्याह्ने॥६२॥आत्मनोवाअन्यस्यवाद्वयोरपिवादैवेनदिष्टमुपकल्पितं।अपोहितुंपरिहर्त्तुंइहकश्चिदपीश्वरः।स
मर्थोनास्ति॥असौश्रीकृष्णप्रधानंसंग्रामस्तत्साधन॥६४॥

पा

नन्वन्यैः दुष्करं त्रिपुरभेदादिकं श्रीरुद्रः कृतवान्स एवं भूतईश्वरोप्यस्य तत्वं न जानातीति कथमित्यत येदत्रायां तस्यापेत्यत माहात्म्ये
वसोप्यनाविनकेवलस्येति वक्तुमाख्यानमुपदिशति सएव इति राजयुधिष्ठिर ॥ ५० ॥ जगदीशितुर्देवस्य कीर्तिकस्मिन्कर्म्मणि म
पोहतवान् ॥ ५१ ॥ अनेन श्रीकृष्णोपबृंहिते संश्रूयते ॥ ५२ ॥ हेमी चैरो प्याय सीचेति निस्वपुरोनिर्मीयते न्योहदावितिशेषः ॥ दुह्ले

सएष भगवान्राजन्व्यतनोहि शर्दं यशः ॥ पुरारुद्रस्य देवस्य मयेनानंतमायिनः ॥ ५० ॥ राजोवाच ॥ कस्मिन्कर्म्मणि देवस्य
मयोहन् जगदीशितुः यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यतां ॥ ५१ ॥ नारद उवाच ॥ निर्जिता असुरादेवैः युध्यनेनोपबृंहि
तै ॥ मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५२ ॥ स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः दुर्लक्ष्यापायसंयोगा दुर्वितर्क्य
परिच्छदाः ॥ ५३ ॥ ताभिस्ते सुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप ॥ स्मरंतो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥ ५४ ॥ ततस्ते
सेश्वरा लोका उपासाद्येश्वरं विभो ॥ त्राहि नस्तावकान्देव विनष्टांस्त्रिपुरालयैः ॥ अथानुगृह्य भगवान्माभैष्टेति सुरा
न्विभुः ॥ शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुंचत ॥ ५६ ॥ ततोग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् ॥ यथा मयूखसंदोहा न
दृश्यंत पुरो यतः ॥ ५७ ॥

ह्लोऽपायसंयोगो गमनागमने यासां दुर्वितर्क्यो परि
च्छदायासु ॥ ५३ ॥ असुराणां सेनान्यः सेनापतयः पूर्व
वैरस्मरत ॥ ५४ ॥ अस्त्रं अभिमंत्रितं शरं पुरेषु व्यमुंचत ॥ ५६ ॥ ततः शरात्सूर्यमंडलात् ॥ मयूखसंदोहात्किरणसमूहा इव बहवः तेषु ॥ ५६ ॥

ननुस्मृतिकारैर्धर्मा उक्ता एव॥ तदेवात्राह॥ नारायणपरा इति॥ ६॥ अज्ञाय श्रीनारायणाय तस्यैव मुखात्तच्छ्रुतं। तन्मुखाद्दात्मनः श्रव
णं संभावयन् विशिनष्टि॥ ५॥ य इति प्रथमं तावद्धर्मप्रमाणमाह धर्मस्य मूलप्रमाणं स्मृते च स्मृतिः। तद्विदां वेदविदां येन चात्मा म
नः॥ प्रसीदति तुष्यति। तथा च याज्ञवल्क्यः श्रुतिस्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक् संकल्पजः कामो धर्ममूल

नारायणपरा विप्रा धर्मं गुह्यं परं विदुः करुणाः साधवः शांतास्त्वद्विधा न तथापरे॥ ६॥ नार॰ दन्॰ बाच॰ नत्वा भ
गवते ऽजाय लोकानां श्रेयसे हितवे॥ वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं॥ यो ऽवतीर्यात्मनो ऽंशेन दाक्षायण्यां
तु धर्मतः॥ लोकानां स्वस्तये ध्यास्तये ध्यास्ते तपो बदरिकाश्रमे॥ ६॥ ॥ धर्ममूलो हि भगवान् सर्ववेदमयो ह
रिः॥ स्मृतिं च तद्विदां राजन् येन चात्मा प्रसीदति॥ ७॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः। अहिंसा ब्रह्म
चर्यं च त्यागः स्वाध्याय आर्जवं॥ ८॥ संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः। नृणां विपर्ययेहेक्षा मौनमात्म

विमर्शनं॥ ९॥

मिदं स्मृतमिति॥ मनुश्च वेदो ऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति। ६॥
तत्र तावन्नरमात्रसाधारणधर्ममाह सत्यमिति पंचभिः तपः एकादश्युपवासादि इक्षा युक्तायुक्तविवेकः शमो मनसः संयमः द
मो बाह्येंद्रियाणां त्यागो दानं स्वाध्यायो यथोचितपाठः। ८। संतोषो दैवेन लब्धेनालंबुद्धिः समदृशां महतां सेवा ग्राम्येहोपरमः प्रव
तकर्मणो निवृत्ति। विपर्ययेहेक्षा नृणां फलं क्रियाणामीक्षणं मौनं वृथालायनिवृत्ति। आत्मविमर्शो देहादिव्यतिरिक्तानुसंधानः॥ ९॥

ये

विमानानिशतानिसंकीर्णानियेषांतेदेवादयः ॥ ६७ ॥ आदिरस्यस्कंधार्थंनिगमयति ॥ एवंविधानीतिनृलोकंनराकारमात्मनोवि
डंबमानस्यअनुकुर्वतः ॥ इतिसप्तदशम ॥ एकादशेनृणांधर्म्मःसाधारणेनवर्णितः ॥ विशेषेणचवर्णानांमुख्याश्रयोषितांतुदे
गो वंस्थानिशेनन्नत्तियोगावुदीरितो ॥ अथपंचनिरध्यायेःकर्म्मयोनुवर्ण्यते ॥ २ ॥ देत्यपते ॥ प्रल्हादस्यसाधूनांसभासुसभाजितस्

दिविदुंदुभयोनेदुर्विमानशतसंकुला ॥ देवर्षिपितृसिद्धेशाजयेतिकुसुमोत्करैः ॥ अवाकिरनजगुर्हृष्टानन्नृतु
श्चाप्सरोगणाः ॥ ६८ ॥ एवंदग्ध्वापुरस्तिस्रोभगवान्त्रिपुरहानृप ॥ ब्रह्मादिभिःस्तूयमानःस्वधामप्रत्यपद्यत
॥ ६९ ॥ एवंविधान्यस्यहरेस्स्वमायाविडंबमानस्यनृलोकमात्मनः ॥ वीर्याणिगीतान्यृषिभिर्जगद्गुरोलोकान्पुनाना
न्यपरंवदामिकं ॥ ७० ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेत्रिपुरविजयोनामदशमोध्यायः ॥ १० ॥
सप्त श्रीशुकउवाच ॥ श्रुत्वेहितंसाधुसभाजितंमहत्तमाग्रण्यउरुक्रमात्मनः ॥ युधिष्ठिरोदैत्यपतेर्मुदायुतः ॥ पप्र
च्छभूयस्तनयंस्वयंभुवः ॥ युधिष्ठिरउवाच ॥ भगवन्श्रोतुमिच्छामिनृणांधर्म्मंसनातनं वर्णाश्रमाचारयुतंयत्
पुमानविंदतेपरंभवानप्रजापतेःसाक्षादात्मजःपरमेष्ठिनःसुतानांसंमतोब्रह्मंस्तपोयोगसमाधिभिः ॥ ३ ॥

तत्कृतंईहितेचरितंश्रुत्वापुनर्नारदंपप्रच्छकथंभूतस्येहितंमहत्तमानामग्रण्यः मुख्यस्यतत्रहेतुः उरुक्रमेआत्मामनोयस्यअत्र
वर्णोत्कर्षहेतुः ॥ यत्यतोधर्म्मात्परंज्ञानंभक्तिंचविंदते ॥ ३ ॥ ॥ ॥ ॥

मा॰स॰
५०

ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्म्मानाह॥ सार्द्धैः सप्तभिः विप्रस्य षट्कर्म्माणि विहितानीत्यनुषंगः॥ तत्र अध्यायनं याजनं प्र
तिग्रहश्च वृत्तिर्जीविका यथाह मनुः षण्णां तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इ
ति॥ अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चायधं तु न जानातिव्रुह्यतिच्का नंतरमेव स्मृते
राजन्य इति आदिशब्देन दंडशुल्कादि वार्त्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य सः॥२५॥ शूद्रस्य द्विजशुश्रूषा विहिता स्वा

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः।२४॥ राज्ञो वृत्तिः प्रजागोप्तुरविशुद्धाकरादिभिः॥
वैश्यस्तु वार्त्तवृत्तिस्तु नित्यं ब्रह्मकुलानुगः।२५॥ शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत्॥ वा
र्त्ता विचित्रा शालीना पापावरं छितं॥२६॥ विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरा॥ जघन्यो
नोत्तमां वृत्तिमनापद्दि भजेन्नरः॥२७॥ कृते राजन्यमापत्सु सर्वेषामपि सर्वशः॥२८॥ ॥श्री॥

शिलो तरो

मिनो द्विजस्य तु शुश्रूषा विहिता वृत्तिश्च भवेत्॥ विप्रस्य मुख्यानुकल्पभेदेन वृत्त्यंतराण्याह वार्त्ता विचित्रा कृष्यादि॥ रूपा शा
लीनं धान्यसंचितं वैवाप्तमयाचितं पापावरं प्रत्यहं धान्ययाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणशोपादानं उंछनं स्वाप
णादिपतितकणोपादानं शिलोञ्छनं॥ द्वयमेकीकृत्य चतुर्द्धेत्युक्तं श्रेयसी॥२६॥ उत्तमा वृत्तिर्वै व्यवस्थां दर्शयेत
आपद्वृत्तीराह जघन्यो नीचः। उत्तमां अध्ययनादि॥ कृते राजन्ये क्षत्रियस्तु प्रतिग्रहादन्यां भजेत्॥२८॥ श्री॥ ॥श्री॥

सार्त

आत्मेति ॥ देवतेतिवबुद्धिः ॥२०॥ अस्य श्रीकृष्णस्य श्रवणादयो न इत्यादि अर्चनं ॥२१॥ एवं त्रिंसल्लक्षणवान् इत्युक्तो वर्णाधर्म्मोन॥
वक्तुं द्विजानां लक्षणमाह ॥२२॥ संस्कारा मंत्रवंतो गर्भाधानादयो यस्मिन् विच्छिन्नाः स द्विजः तर्हि शूद्रस्यापि संस्कारविच्छेदे सति
द्विजत्वं स्यात् ॥ तत्राह ॥ अजो ब्रह्मा यं मंत्रवत् भूतसंस्कारयुक्तं जगाद स द्विजः शूद्रोपि लब्धता सदा न केनचित् समस्तं छंदसा
म पतिरिति श्रुतिश्च गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रमिति ॥ अतो विवाहव्यतिरिक्तसंस्कार

विवाहमात्र
संस्कारस्त्रे
विलब्धतांसद

अनाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः ॥ तेषात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ॥२०॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ॥ सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ॥२१॥ नृ
णामयं परो धर्म्मः सर्वेषां समुदाहृतः ॥ त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति ॥२२॥ सं
स्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यं ॥ इज्याध्ययनदानानि विहितानि द्विजन्मनां ॥२३॥ ज
न्मकर्मावदातानां क्रियाश्चाश्रमचोदिता ॥२४॥ श्री श्रीराधाकृष्णवल्लभो जयति ॥

स्यानावश्यकत्वात् ॥ उपनयनस्य तु सर्वेषां निषिद्धत्वान्न तस्य द्विजत्वमित्यर्थः ॥ पाठान्तरे वैदिकादय इति गर्भाधानादय इत्यर्थः
त्रैवर्णिकानामवश्यान् धर्मानाह ॥ इज्येति एकादय ॥२३॥ जन्मनाद्य इति शुद्धेन कुलेन कर्मणा च आचारेणावदातानां
शुद्धानां ॥ दुष्कुलानां दुराचाराणां च नैतानि विहितानीत्यर्थः ॥ ब्रह्मचर्याश्रमं ॥ विहिता क्रियाश्च शूद्रस्य वर्णधर्माण
वाश्रमनेद कृत विशेषाभावान् ॥२४॥

नागा०स० ३५१ यो

त्यादेः पतिं नजेत् उत्तरेणान्वयः ॥ २६ ॥ परिमृष्टाः उद्वर्त्तनादिना निर्मलीकृताः ॥ परिच्छदाः गृहोपस्कराणि पीठताम्रानि य या ॥ २७ ॥ किंच संतुष्टा यथालाभेन न तावन्मात्रभोगेष्वलोलुपा दक्षा अनलसा प्रिया सत्या च वाक् यस्याः ॥ २९ ॥ स चेत् अप्रमत्ता अवहिता अपतितं महापातकमुक्तं यथाह याज्ञवल्क्य ॥ आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषित इति तत्परा सती भजेत् ॥ ३० ॥ श्रीहरिमिव हर्यात्मना पत्या सह ॥ प्रतिलोमजानां अनुलोमजानां वृत्तिमाह वृत्तिरिति ॥ तत्कुलकृता कुलपरंपराप्र।

संतुष्टालोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ॥ २९ ॥ अप्रमत्ताः शुचिः स्निग्धाः पतितं नजेत् ॥ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ॥ ३० ॥ हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ वृत्तिः संकरजातीनां तत्तत्कुलकृता भजेत् ॥ ३१ ॥ अचौराणामपापानामन्त्यजान्तेवसायिनां ॥ वर्णः स्वभावविहितो नृणां धर्मो युगे युगे ॥ ३२ ॥ वेददृग्भिः स्मृतो राजन्प्रेत्य चेह च शर्मकृत् ॥ वृत्त्या स्वभावकृतया वर्त्तमानः स्वकर्मकृत् ॥ ३३ ॥ हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥ ३४ ॥

पतिं

नामपि चौर्यहिंसादिकं च निषेधति । अचौराणामपापानां चेति ॥ तत्र प्रदर्शनार्थं कांश्चित् प्रतिलोमान् विशेषेणाह ॥ अन्त्यजेति ॥ रजक चर्मकार नट वरुड नापिकाः ॥ कैवर्त मेद भिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥ १ ॥ अन्तेवसायिनस्तु चाण्डालपुक्कसमातंगाद यस्तेषां परंपराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः । श्रेयादपि परधर्मान्नीचे रहकचन्तु येषां ते । भगवता चोक्तं श्रेयान् ॥ स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितादिति ननु स्वभावकस्य कर्मणो बन्धहेतुत्वात् कथं सुखहेतुत्वं तत्राह वृत्त्येति ॥ ३४ ॥

५२

चतुर्विधां पूर्वोक्तां विप्रवृत्तिमितरेषामपि दर्शयन्नाह ॥ ऋतामृताभ्यामिति श्लोकं श्लोकांतरेण व्याचष्टे ३१ ॥ ऋतमिति । २० सत्यो ।
त्तरचूडेनैव हेतुमाह सर्वे देवमयत्वेति ॥ वर्णानामभिव्यंजक रूपान् धर्मानाह ॥ शम इति चतुर्भिः ॥ २१ ॥ अच्युतात्मत्वं श्री विष्णुपरत्वं ॥ २२
सौर्यं युद्धोत्साहः ॥ वीर्यं प्रभावः तेजः प्रागल्भ्यं ॥ ३२ ॥ अमंत्रयज्ञः नमस्कारेणैव पंचयज्ञानुष्ठानं तथा च याज्ञवल्क्यः ॥ नमस्का

ऋताम ताभ्यां जीवेत मृतेन प्रमृतेन वा

सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥ ऋतमुंछशिलं प्रोक्तममृतं स्यादयाचितं ॥ २९ ॥ मृतं तु नित्ययांचा स्या
त् ॥ प्रमृतं कर्षणं स्मृतं ॥ सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं ॥ वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सितां
सर्वदेवमयो विप्रः सर्वदेवमयो नृपः ॥ २२ समो दमस्तपः शौचं संतोषः क्षांतिरार्जवं ॥ ज्ञानं दयाच्युतात्मत्वं सत्यं च
ब्रह्मलक्षणं ॥ शौर्यं वीर्यं धृतिस्तेजस्त्यागं आत्मजयः क्षमा ॥ ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणं ॥ २३ ॥
देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणं ॥ आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं ॥ २४ ॥ शूद्रस्य सं
नतिः शौचं सेवा स्वामिन्यमायया ॥ २५ अमंत्रयज्ञो ह्यस्तेयं सत्यं
गोविप्ररक्षणं स्त्रीणां तु पतिदेवानां तच्छुश्रूषानुकूलता २६ ॥ तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं ॥ संमा
र्जनोपलेपाभ्यां गृहमंडलवर्त्तनैः ॥ २७ ॥ स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा कामैरुच्चावचैः ॥ साध्वी
प्रश्रयेणादमेन च वाक्यैः सत्यैः प्रियैः प्रेम्णा काले कालेभजेत्पतिं ॥ २८ ॥

रेण मंत्रिणः पंचयज्ञानाह पयेदिति । २७ ॥ स्त्रीधर्मानाह स्त्रीणामिति पंचभिः ॥ पतिरेव देवो यासां तस्य यत्नः ॥ शुश्रूषा तदनुकू
लता च ॥ २७ ॥ तस्य यद्व्रतं नियमस्तस्य धारणं एतच्चतुष्टयं पतिव्रतानां लक्षणं । धर्मश्चकिंच समार्जनोपले मास्यामि

वर्णादीनां धर्म्मउक्त्वा इदानीमाश्रमधर्म्मोच्यंते तत्रास्मिन्द्वादशेध्याये ॥ ब्रह्मचारीवनस्थयोरसाधारणाश्चतुर्णां साधारणाश्चोच्यंते त्र
योदशेयते धर्माश्चतुर्दशेग्रहस्थस्य पंचदसेसर्वधर्मसारसंग्राह ॥ ब्रह्मचारीगुरुकुलेवसन्गुर्वादीनुपासितेत्युत्तरेणान्वयः ॥१॥ ब्रह्मगा
यत्रीं उपन्नसंध्यात्रयमप्युपासीत उभेसंध्ये युत वाग्जवेत्साप संध्याकालेनिमित्तंमौनंकुर्यादित्यर्थः ॥२॥ गुरोश्चरणोनमेत ॥३॥ यथो

श्रीनारद उवाच ॥ ब्रह्मचारीगुरुकुलेवसन्दांतोगुरोर्हितं ॥ आचरन्दासवन्नीचोगुरौसुदृढसौहृदः ॥१॥ सायंप्रा
तरुपासीतगुर्वग्न्यर्कसुरोत्तमान् ॥ संध्येउभेचयतवाक्जपनब्रह्मसमाहितः ॥२॥ छंदांस्यधीयीतगुरोराहूतश्चेत्सुयंत्रितः
उपक्रमेवसानेचचरणौशिरसानमेत् ॥३॥ मेखलाजिनवासांसिजटादंडकमंडलून् ॥ बिभृयादुपवीतंचदर्भपाणिर्य
थोदितं ॥४॥ सायंप्रातश्चरेद्भैक्ष्यंगुरवेतन्निवेदयेत ॥ भुंजीतयद्यनुज्ञातोनचेदुपवसेत्क्वचित् ॥५॥ सुशीलोमितभुग्
दक्षःश्रद्दधानोजितेंद्रियः यावदर्थंव्यवहारेत ॥ स्त्रीषुस्त्रीनिर्जितेषुच ॥ वर्जयेत्प्रमदागाथामगृहस्थोबृहद्व्रतः
इंद्रियाणिप्रमाथीनिहरंत्यपियतेर्मनः ॥६॥ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं गुरुस्त्रीभिर्युवतिभिःकारयेन्नात्मनो
युवा ॥ नन्वग्निःप्रमदानामघृतकुंभःसमःपुमान् ॥ सुतामपिरहोजह्यादन्यदायावदर्थ
कृत ॥८॥

दितं पालासोदंडोब्राह्मणस्यता
दि नियममनतिक्रम्य जलाधारणं तु केशप्रशाधनाभावमात्रं ॥४॥ यावदर्थमयोपगमेवरहहव्रतः ॥ ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोपि
वर्जयेत ॥६॥ तत्रहेतुः इंद्रियाणिबलवंतिसंयतस्यापिमनोहरंतीति ॥७॥ नकारयेदित्रहेतुः ॥ नन्विति रहः एकांते अन्यथाकेशप्रशाधनादि

ननुकस्मान्निकर्म्माणिकुर्वीतस्वतःफलोभोगोऽस्यकथंनैर्गुण्यंस्यात् तदुक्तंप्रह्लादेन ॥ औपस्थ्यजैह्व्यंबहुमन्यमानःकथंविरज्येतदुरंतमो
हः इत्यादितत्रसदृष्टांतमाह ३२ उप्यमानमितिद्वाभ्यांपुनःसूत्यैसस्यप्रभवायकामाआशेरतेवासनारूपेणयस्मिन्ततएवस्वभावः उक्तंच
वासनाविशिष्टस्यसहसैवकामत्यागासंभवाद्विहितोक्तनियमेनबहुशःकामान्भुञ्जानस्यैवनित्यनैमित्तिकैर्विशुद्धचेतसस्तद्दोषदर्शनेनयथातिसौ
नरिश्चसुखानामिवदर्शनेनविरागोभवति ॥ यथासवीर्यक्षेत्रंदर्शनेननिर्वीर्यंभवति ३३ यथाचप्रज्वलितोग्निर्नघृतबिंदुभिःसाम्यतिमहताचध

उप्यमानंमुहुःक्षेत्रंस्वयंनिर्वीर्यतामियात् ॥ नकल्पतेपुनःसूत्यैउप्तंबीजंविनश्यति ॥३२॥ एवंकामाशयंचित्तंकामा
नामतिसेवया ॥ विरज्येतयथाराजन्नाग्निवत्कामबिंदुभिः ॥३३॥ यस्ययल्लक्षणंप्रोक्तंपुंसोवर्णाभिव्यंजकं ॥ यदन्यत्रा
पिदृश्येततत्तेनैवविनिर्दिशेत ॥३४॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेएकादशोध्यायः ॥११॥ ॥

वर्णीते

तद्रूपेणशाम्यतेएवंतद्वत् ॥ प्रह्लादस्तुकौमारएवनिवृत्तउपदेशोमंदवासनानामधिकारेण । तदुक्तं तत्रैवबालानदुचितधियो
द्भुतोरामेरिरिति । अतःसर्वेमनवःघुसमादिभिरेवब्राह्मणादिव्यवहारोमुख्यः नजातिमात्रादित्याहयस्येति ३४ यद्यस्मिन्अन्यत्र
वर्णांतरेपिदृश्येत ॥ तद्वर्णांतरंतेनैवलक्षणनिमित्तेनैववर्णेनविनिर्दिशेत ॥ नतुजातिनिमित्तेनेत्यर्थः ॥३४॥
द्वादशेवर्ण्यतेधर्मोब्रह्मचारीवनस्थयोः । चतुर्णामाश्रमाणांचसाधारण्येनकथ्यते ॥१॥

नाग०स०
५३

वृतनतपुस्वचार ॥ एवमाचरन विदितं विज्ञा विज्ञेयं येतसः ॥ २६ ॥ ऋषिमहर्लोके ॥ २६ ॥ अकृष्टं अकृष्टपच्यं अकालतपाक काला
तं निष्पन्नमित्यर्थः ॥ अब्दे फलादि आहरेत आ ॥ यात ॥ २७ ॥ वन्यानी वा राद्विभिः कालेचोदितात पुराणां पूर्वसंचितान ॥ २० ॥ हिमादीन्सहे
तइति तथा केशादीन ममलंच प्रक्षालनेम धारयन कमंडल्वादीश्च दधत ॥ २१ ॥ कृच्छ्रंततपःक्लेशाद्य यावुद्दिनेन सेत तथा चरेत

एवं विधो ब्रह्मचारी वानप्रस्थोपतिर्ग्रही ॥ चरन विदित विज्ञानं परं ब्रह्मादि गच्छति ॥ २५ ॥ वानप्रस्थस्य वक्ष्यामि नि
यमान मुनिसंमतान ॥ यानातिष्ठन मुनिर्गच्छेदृषिर्लोकमिहांजसा ॥ २६ ॥ नकृष्टपच्यमश्नीयादकृष्टं चापि काला
ता — तः अग्निपक्वमथामं वा अर्कपक्वमुपाहरेत ॥ २७ ॥ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान ॥ लब्धे नवे नवे
नाद्ये पुराणं तु परित्यजेत ॥ २८ ॥ अग्न्यर्थमेव शरणं मुटजं वाद्रिकंदरं ॥ श्रयेत हिमवाय्वग्निवर्षार्कातपभाक्स्व
यं ॥ २९ ॥ केशरोमनखश्मश्रुमलानि जटिलो दधत ॥ कमंडल्वजिनो दंडवल्कलाग्निपरिच्छदान ॥ ३० ॥ चरेद्वने द्वा
दशाष्टानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा युथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥ ३१ ॥ यदा कल्पस्वक्रियायां व्याधिभिर्ज
न — दधिष्ठितं अन्वीक्षिक्यास्व विद्यायां कुर्यादंसनादिकं ॥ ३२ ॥ आत्मन्यग्नीन समारोप्य संन्यस्याहं ममात्मतां का
रणेषु न्यसेत्सम्यक संघातं तु यथार्हतः ॥ ३३ ॥

वादसा सादनंतरमपि यदि स्वधर्मानुष्ठानाविरुंजेतत हिं वन एव वसेत ॥ यदि
तु ज्ञानाभ्यासयोगस्तर्हि सततुनयरहितस्य तु पत्कत्यं तदाह यदा अकल्प असमर्थः अतः कासे अनसनादि करिष्य तए वेल्ल
त्यमाह आत्म नित्यादि यावत समाप्तिः ॥ यथा हे तः ॥ यथायोग्य प्रकारेणेच्छोका हन्यसेत प्रविलाययेन ॥ २३ ॥

य

ननुमिथ्वादितिकस्मान्नत्वाचिख्यंयंत्यक्तप्रायं द्वि अह्यादितिकोयमितिनिर्वेधस्तत्राह॥कल्पयित्वेति आत्मनास्वरूपसाक्षात्कारे णाहं॥देहेंद्रियादि आभासमात्रंकल्पयित्वा निश्चित्य यावदसौजीव ईश्वरः। स्वतंत्रो न भवति॥तावद्द्वैतं अहं पुमानियं स्त्रीत्यादि भेदो नाविरमेत्॥ततःकिमत आह॥ततोहि द्वैतात्॥विपर्ययः गुर्वध्यासेन भोग्यताबुद्धिः अतोऽध्यादेवेत्यर्थः।२०॥एतत्सर्वं सुशीलं इत्येत दुक्तं गृहस्थस्य विशेषमाह॥गुरुवृत्तिर्द्वीति॥२१॥अंजनादीनामामिषांतानां द्वंद्वं अंजनं शरीरस्य अभ्यंजनं शिरसः स्त्रियं चावि

६

जे

कल्पयित्वात्मनो यावदाभासमिदमीश्वरः॥द्वैतंतावन्न विरमेत्ततोह्यस्य विपर्ययः॥२०॥एतत्सर्वंगृहस्थस्य
समाम्नातं यतेरपि॥गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः॥२१॥अंजनाभ्यंजनोन्मर्द स्त्र्यवलेखामिषंमधु
स्रग्गंधालेपालंकारांस्त्यजेयुर्येधृतव्रताः॥२२॥उषित्वैवं गुरुकुले द्विजोधीत्यावबुध्य च॥ त्रयीं सांगोपनिषदं
यावदर्थं यथाबलं॥२३॥दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः॥गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् २४
अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं॥भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत्॥२५॥ ॥श्री॥ ॥

लेखांचचित्रकर्मस्त्रीणांकुड्यादेरवलेखनंच तन्निरीक्षणं॥२२॥अत्राभ्यंगादिस्वरूपतो निषिध्यते पूर्वं तु कथंचित्प्राप्तमपि स्त्रीकर्तृकं नि षिद्धमितिभेदः॥२३॥अंगैः शिक्षादिभिरुपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थं च विचार्य यावदर्थं स्वस्वादिकारा नुसारेण॥२४॥असौ शिष्यः यदीश्वरः शक्तः स्यात्तर्हि गुरोः काममभयेप्सितं वरं दत्वा यथाधिकारं गृहं द्याश्रमं स्वीकुर्यात् तत्र वा नै ष्ठिकः स्यादित्यर्थः॥२४॥स्वधामभिः स्वाश्रयभूतैः जीवैः सहितं निर्यंत्रितया॥२५॥ ॥

भा०ग०स०
५४

ननुविकारवत॥कथंपरेलयःस्यात्विकारहेतूनांसर्वोपाधीनंलयः॥द्वारेणोत्पत्यर्थमाह॥अप्स्विति॥अदोज्योतिःसच्चनभःकूटस्थेऽहंतत्वे
तच्चकूटस्थंमहतिमहतत्वे॥तदव्यक्तेप्रधाने॥तच्च॥व्यक्तेऽक्षरेपरमात्मनि इतिसर्वोपाधिलयाद्धेतोः॥अविशेषंचिन्मात्रमात्मानंद्वैतेचज्ञंम
हरतया॥३१॥ज्ञात्वाद्वयःसनविरमेत॥दग्धकाष्ठोयथानल॥३२॥इतिसप्तमेद्वादशः॥१२॥त्रयोदशेयतेधर्मःसाधकस्योच्यतेमहान्

वायुं

अप्सुक्षितिमपोज्योतिष्यदोनभस्यमुं॥३०॥कूटस्थेतच्चमहतितदव्यक्तेऽक्षरेचतत॥३१॥इत्यक्षरतयात्मानंचिन्मात्र
मवशेषितं॥ज्ञात्वाद्वयोथविरमेद्दग्धयोनिरिवानलः॥३२॥इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेद्वादशोध्या
यः॥नारदउवाच॥कल्पस्त्वेवंपरिव्रज्यदेहमात्रावशेषितः॥ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीं॥१॥विभृयाद्य
द्यसौवासःकौपीनाछादनंपरं॥त्यक्तंनलिंगदंडादेरन्यत्किंचिदनापदि॥२॥एकएवचरेद्भिक्षुरात्मारामोनपाश्रयः
सर्वभूतसुहृच्छांतोनारायणपरायणः॥३॥पश्येदात्मन्यदोविश्वंपरेसदसतोव्यये॥आत्मानंचपरंब्रह्मसर्व
त्रसदसन्मये।४॥

अवधूतेतिहासेन॥सिद्धावस्थांचवर्णयते॥१॥एवंध्यात्वाअल्पोनशनादिकंकुर्यात॥अन्वहिकयांकल्पस्त्वेवंध्यात्वापरिव्रजे
तिसंवंधः किंपुनस्तत्पाडपदेहव्यतिरिक्तसर्वमित्याहदेहमात्रेति।तस्यधर्मानाह।ग्रामैकरात्रेति।१।तद्यकौपीनं गुह्यंआछाद्यतेयावता
तवन्मात्रंपरंकेवलंअन्यादितिवात्यक्तंपेसौ चारणतेएवमेव॥२॥३।सदसतःपरेकार्यकारणव्यतिरिक्ते ४॥४॥

तदेव विभङ्गपदर्शयति ॥ खेष्वाकाशे खानि देहगतच्छिद्राणि आत्मवान् धीमान् शेषं अस्थिमांसादिकं क्षितौ ॥ २५ ॥ एवं स्थूलशरीर-
रस्य लयमुक्त्वा लिङ्गशरीररूपस्याध्यात्मादित्रयस्य लयमाह ॥ वाचमित्यादिना अत्र यद्यपि यथोद्भवं लयस्य युक्तत्वादध्यात्मा-
दीनां स्वस्वकारणेषु राजसाहंकारादिषु लयो वाच्यः ॥ तथापि हि तेषां लयभावने यम हितीयात्मप्रतीयन्त्रियरेतियथाकथंचित्
येभावे देवतानां प्रवर्त्तकत्वेन प्राधान्यादिन्द्रियतद्विषययोर्देवतासु लयः ॥ कथ्यते वचः त्यसहितां वाचमग्नौ न्यसेत् एवं सर्वत्र पदा-

खे खानि वायौ निश्वासांस्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ॥ २५ ॥ वाच-
मग्नौ सवक्तव्यमिन्द्रे शिल्पं करावपि पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥ मृत्यौ पायुं विसर्गं च यथास्था-
नं विनिर्दिशेत् दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचि ॥ २७ ॥ रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत् ॥
अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ २८ ॥ मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ॥ कर्माण्यध्यात्मना रु-
द्रे यदहं ममता क्रिया ॥ २९ ॥ सत्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥

निपादौ वयसि विष्णौ ॥ २५ ॥ सनादेन शब्देन सह
अध्यात्मविदिति पाठे वायाविति ज्ञातव्यं ॥ २५ ॥ ज्योतिषि आदित्ये रसगंधयोरिन्द्रियाद्या ॥ कर्षकत्वेन प्राधान्यविवक्षया देवतासु हि-
तेन्द्रियस्य विषयलयमाह ॥ प्रचेतसा सह जिह्वा रसेन च अप्सु रसरूपासु घ्राणं शब्देनाश्विनोर प्युलक्षणं ॥ अश्विभ्यां सह घ्राणं घ्रे-
यैर्गन्धैः सह लक्षितायां क्षितावित्यर्थः ॥ २८ ॥ परे कवौ ब्रह्मणि ॥ अध्यात्मना अहंकारेण अध्यात्मतामिति पाठे कर्मेणाहंकारे
चेत्यर्थः कार्यभूते हृदये यद्यस्मादहं ममता पूर्विका क्रिया भवति तस्मिन् ॥ २९ ॥ सत्वेन चेतनया गुरोः गुणकार्यैः प्रागविशिष्टैः देवैः स-

[illegible]

तस्यैवज्ञानदार्ढ्याभावेयोगभ्रंशपरिहार्यमाह ॥ नच मिर्व्यक्तंलिंगंयस्यव्यक्तोर्थः ॥ अथोऽनंआत्मानुसंधानंयस्यसः मनीष्यपिउन्मत्तव
द्वालवच्चकविरपिमूकवदात्मानंनृणांदृष्ट्यादर्शयेत ॥ तेपद्योन्मतादिरूपंमन्येरनतथावर्तेतस्वदृष्टेति पाठेवाह्यानुसंधनाभावेत्यर्थः
१० परमहंसधर्मेमेवेतिहासेनस्फुटयति अत्रापीतियावदध्यायसमाप्तिः आजगरस्यव्रतस्यमुनेश्च ॥ ११ ॥ धरोपस्थेभूपृष्ठेसह्याइत
स्यसानुनिसंगेकावेर्यानद्यस्तस्यास्तटेरजोभिर्धूसरेस्तदंगैर्देहावयवैर्निगूढममलंतेजोयस्यतं ॥ १२ ॥ कर्माद्भिर्जनायंनविदुः ॥ १४

अव्यक्तलिंगोव्यक्तार्थोमनीष्युन्मत्तवालवत ॥ कविर्मूकवदात्मानंसदृष्ट्यादर्शयेन्नृणां ॥ १० ॥ अत्राप्युदाहरंतीमिमितिहासंपुरातनं ॥ प्रह्लादस्यतुसंवादंमुनेराजगरस्यच ॥ ११ ॥ तंशयानंधरोपस्थेकावेर्यांसह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसा ॥ १२ ॥ ददर्शलोकान्विचरंल्लोकतत्वविवित्सयावृतोमात्यैःकतिपयैः ॥ प्रह्लादोभगवत्प्रियः ॥ १३ ॥ कर्मणाकृतिभिर्वाचालिंगैर्वर्णाश्रमादिभिः ॥ नविदंतिजनायंवैसोसावितिवेतिच ॥ तंनत्वाभ्यर्च्यविधिवत्पादयोःशिरसास्पृशन् ॥ विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः ॥ बिभर्षिकायंपीवानंसोद्यमोभोगवान्यथा ॥ वित्तंचैवोद्यमवतांभोगोवित्तवतामिह ॥ भोगिनांखलुदेहोयंपीवाभवतिनान्यथा ॥ १७ ॥ नतेशयानस्यनिरुद्यमस्य ॥ ब्रह्मन्नुहार्थोयतएवभोगः ॥ अभोगिनोयंतवविप्रदेहः पीवायतस्तद्वदनःक्षमंचेत ॥ १८ ॥ ॥

तंपादयोःशिरसास्पृशन्नत्वाअप्राक्षीदित्युत्तरेणान्वयः ॥ १५ ॥ उद्यमसहितस्वभोगवानिवपीवानंस्थूलदेहंधारयसितत्र ॥ हेतुः वेदेति
त्वतायेणान्वय ॥ उद्यमसहितस्वभोगा विनेवममभोगोस्तीतिचेत्तत्राह ॥ वित्तंचेति ॥ १७ ॥ ननुइतिनिश्चयेइहइतिप्रसिद्धेत्वयो
र्योनास्तीतिप्रसिद्धमेवेत्यर्थः यतोर्थादेवयतोहेतोःपीवाक्षमंयोगंपचेत ॥ १८ ॥

नन्वात्मानं परं ब्रह्मेति कथं समानाधिकरण्यनिर्देशः ॥ न हि बद्धमुक्तयोरैक्यं संभवति तत्राह सुप्तेति सुखसेहितमसावृत्तमात्मतत्त्वं ईड्यग्र
त् ॥ स्वप्नयोस्तु विहिहिस्तंप्रकाशते बंधं तु न न समो नापि विक्षेपः ॥ अतस्तदा आत्मदृक् आत्मानं लब्ध्वा कृत्या स्थितः सन् आत्मनो गतिं तत्त्वं पश्यन्
अत एव बंधो मोक्षश्च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः ॥ तदात्मदृक् कृतद्वंद्वयोगग्रंथे निद्राया जागरस्यांते । डो भावत्रुप
पद्यते तं भावयन्नित्यं मु[illegible]च्यते नेतरो यतिरिति ५ अस्य देहस्य प्रभवाप्ययश्च ॥ यस्मात् कालः असच्छास्त्रेषु अनात्मपरेषु डीविकां नद्दत्रवि

सुप्तप्रबोधयोः संधा वात्मनो गतिमात्मदृक् ॥ पश्यन् बंधं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥ नाभिनंदेत ध्रुवं मृत्युमध्रुवं
वास्य डीवितं ॥ कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययं ॥ ६ ॥ नासच्छास्त्रेषु शज्जेत नोपडीवेत डीविकां । वादवादांस्त्यजेत्तर्का

न

तान्पक्षं कं च न संश्रयेत् ॥ ७ ॥ न शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुंजीत नारंभानारभेत्क्वचित् ॥ ८ ॥
न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः । शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत् । ९ ॥

ध्यादिवृत्तिं वादान् जल्पवितंडादीन् ॥ न स्तान् कं च न [illegible] पि पक्षं निर्बंधेन तु न संश्रयेत । नानुबध्नीत । प्रलोभमानादिना बलान्नायाद्येत । आरंभा
नमठादिव्यापारान् ॥ ८ ॥ परमहंसस्य विशेषमाह । न यतेराश्रमो धर्मार्थः कथंभूतस्य महात्मनं तस्य लक्षणं शांतस्येत्यादि प्रायइति तस्याप्यनुव-

हि

ज्ञानोत्पत्तिपर्यंतं वक्तुस्कादिलिंगमाश्रित्य सत्वसं[illegible]र्थ यमान्नियमांश्च [illegible] रन्नेव ज्ञानोत्पत्तौ यतेत । [illegible] न्नतु ज्ञानेन नियमेः । कृत्स्नम [illegible] त्तियमा
अतस्त्वतरवस्तु । अतस्तदा लिंगादिभिः । प्रयोजनाभावं लोकसंग्रहार्थं धारयेत्यजेद्वा ॥ ९ ॥

नाग० स०
५६

अत्रापि मनुष्यत्वे पि अन्यापनुत्तये दुःखनिवृत्तये विपर्ययं दृष्ट्वा निवृत्तोस्मि ॥ २६ ॥ ननु प्रवृत्या कदाचित्सुखस्यापि निवृत्तस्तानु किं स्यादि ति चेत्तत्रा
ह ॥ सुखमस्य जीवस्य स्वरूपमेव तर्हि किं न प्रकाशते ॥ तत्राह सर्वे ति । तनोती ति तनुः सर्वक्रियानिवृत्तेः सुखं तु एतत् प्रकाशत इत्यर्थः भोगश्च मनः
संस्पर्शजान् मनोरथमात्रजान् असत्त्वतान् दृष्ट्वा स्वप्स्यामि नैरुद्यमोस्मीत्यर्थः ॥ तर्हि कदाचित्कथं भ्रमे तत्राह ॥ संविशन् प्रारब्धान्
भोगान् भुंजान इत्यर्थः ॥ २७ ॥ एवं चेत्कोन संसारं प्राप्नुयात्तत्राह ॥ इत्येतदात्मनः सुखात्मकं स्वार्थं स्वस्मिन्नेव संतं पुरुषार्थं च विस्मृ

अत्रापि दं यतीनां च सुखायान्यापनुत्तये । कर्माणि कुर्वतां दृष्ट्वा निवृत्तोस्मि विपर्ययं ॥ २६ ॥ सुखमस्यात्मनो रूपं सर्वेहोपर
तिस्तनुः मनःसंस्पर्शजान् दृष्ट्वा ॥ भोगान् स्वप्स्यामि संविशन् ॥ २७ ॥ इत्येतदात्मनः स्वार्थं संतं विस्मृत्य वै पुमान् ॥ विचित्रा
मसति द्वैते घोरामाप्नोति संसृतिं ॥ २८ ॥ जलं तदुद्भवैश्छन्नं हित्वाज्ञो जलकाम्यया ॥ मृगतृष्णामुपाधावत् यथान्यत्रा
र्थदृक् स्वतः ॥ २९ ॥ देहादिभिर्दैवतंत्रैरात्मनः सुखमीहतः ॥ दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः ॥ ३० ॥ आध्या
त्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् मर्त्यस्य कृच्छ्रोपनतैः रर्थैः कामैः क्रियेत किं ॥ ३१ ॥ पश्यामि धनिनां क्लेशं लुब्धा
नामजितात्मनां भयादलब्धनिद्राणां सर्वतोभिविशंकिनां ॥ ३२ ॥

त्य असत्यपि द्वैते ॥ एतदेव दृष्टांतेन स्पष्टयति जलमिति ॥ २८ ॥ तदुद्भवैः तृणसेवालादिभिः जलकाम्यया जले छन्नया स्वतः आत्मरूपाद
न्यत्र पुरुषार्थं पश्यन् एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं दृष्ट्वेति तदुक्तं तद्विवृणोति देहादिभिरिति पंचभिः ॥ २९ ॥ ईहतः इच्छतः
अनीशस्य निर्दैवस्य पुनः पुनः आरब्धाः विफला एव भवंति । क्रिया णां सफलत्वेपि फलस्यानुपयोग ॥ ३० ॥ मोह आध्यात्मिकादिभिरि
ति मर्त्यस्य मरिष्यतः । कृच्छ्रेण दुःखेनोपनते ॥ ३१ ॥ कृच्छ्रं विनैव प्राप्तेर्थे दुःखं तदेव स्यमित्याह पश्यमिति ॥ ३२ ॥

म

५६

किंच विताडे नानाधुसमर्थोप्ययं ऽनल्लर्थमुद्यमं करोति ॥ त्वं तु समर्थोपि किमिति न करोषीत्याह ॥ कविर्विद्वान ॥ कल्पो दक्षः निपुणा दृक् चतुरः चित्राः प्रियाः लोकरंजनाः कथा यस्य ॥ तथापि लोकस्य कर्म कुर्वतः शेषे तद्वीक्षितापि च सर्वप्रपन्नप्रमाणांतरेण दृष्ट्वा तत्कर्म मनुद्दिश्य न नोद्यिनचत्नौषीत्यर्थः ॥ १९ ॥ तस्य वाग् एव वामृतं येन यंत्रितो वशीकृतः सन ॥ २० ॥ अध्यात्मचक्षुषा त्वं तद्वेत्थ भगवान वेदेत्यन्वयः आर्याणां ज्ञानिनां संमतो न बुभ वान ॥ २१ ॥ यदमिति यदुक्तं तदेवाह नृणामीहोपरमयोः ॥ प्रवृत्तिनिवृत्त्योः ॥ पदानि स्थानानि फलानीत्यर्थः ॥ ३२ ॥

कविः कल्पो निपुणदृक् चित्रप्रियकथः समः ॥ लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितोपि वा ॥ १९ ॥ नारद उवाच ॥ स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ॥ स्मयमानस्तमभ्याह तद्वागमृतयंत्रितः ॥ २० ॥ ब्राह्मण उवाच ॥ वेदेदमसुरश्रेष्ठ भगवानार्यसंमतः ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा ॥ २१ ॥ यस्य नारायणो देवो भगवान्हृद्गतः सदा ॥ भक्त्या केवलयाज्ञानं धुनोति ध्वांतमर्कवत् ॥ २२ ॥ अथापि ब्रूमहे प्रश्नांस्तव राजन्यथाश्रुतं ॥ संभाषणीयो हि भवानात्मनः शुद्धिमिच्छता ॥ २३ ॥ तृष्णया भववाहिन्या योग्यैः कामैरपूरया ॥ कर्माणि कार्यमाणोहं नानायोनिषु योजितः ॥ २४ ॥ यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन ॥ स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ २५ ॥

वेदेत्यत्र हेतुः यस्येति हृदि स्थितः ॥ सन्नज्ञानं धुनोति अर्को यथा हि ध्वांतं ॥ यथाश्रुतमित्यौद्धत्यपरिहारायोक्तं ॥ २३ ॥ लोकः कर्मसु प्रवर्तते ॥ त्वं तु कथं निवृत्तः सन किं शेषे इति यदुक्तं तत्राह तृष्णयेति चतुर्भिः भवप्रवाहकारुण्या यथोचितैरपि विषयैः ॥ पूरयितुमशक्यया तृष्णया कर्मसु प्रवर्तमानोहं पूर्वं नानायोनिषु प्रवेशितः ॥ २४ ॥ तथैव मं लोकमनुष्यदेहं यदृच्छया प्रापितकथंभूतं लोकं धर्मेण स्वर्गस्य द्वारं साधनं अधर्मेण तिरश्चां च शूकरादियोनेर्द्वारं मिश्राभ्यां पुनरपि मनुष्यत्वस्य द्वारं सर्वतो निवृत्त्या अपवर्गस्य द्वारमित्यर्थः ॥ २५ ॥

नचमानाय मानादिकं तेषु मम वै युष्मित्याह ।नाहं निंदामि महात्मनि विश्लौ ४२ ॥ एवंभूते तत्त्वे स्थितामुपायमाह । विकल्पमिति द्वाभ्यां ।
विभो भेदग्राहकं मनोवृत्तौ ॥ अर्थरूपो विभ्रमो यस्मिन् वैकारिके अहंकारे ४३ अनुं अनंतरं महत्तत्त्वद्वारेणेत्यर्थः ॥ सत्यमेवमुपती
तितथा मंदहर्ष्या लोकशास्त्राव्यपेतं न तु दृष्याय तो भवान् भगवत्परः ॥ इति सप्तमे त्रयोदशः ॥ चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते

नाहं निंदे न च स्तौमि स्वभावविषमं जनं ॥ एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ४२ ॥ विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थ
विभ्रमे ॥ मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु ४३ ॥ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ्मुनिः ततो निरीहो विरमेत्
स्वानुभूत्यात्मनि स्थितः ४४ ॥ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितं ॥ व्यपेतं लोकशास्त्राभ्यां भवान् हि भगवत्प्रियः ॥ ४५ ॥ नार
द उवाच ॥ धर्मं पारमहंस्यं वै मुनेः श्रुत्वासुरेश्वरः ॥ पूजयित्वा ततः प्रीत आमंत्र्य प्रययौ गृहं ॥ ४६ ॥ इति श्रीभागवते महापुराणे
सप्तमस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ युधिष्ठिर उवाच ॥ गृहस्थ एतां पदवीं विधिना येन चांजसा ॥ यायाद्देवऋषे ब्रूहि मादृशो गृ
हमूढधीः ॥ १ ॥ नारद उवाच ॥ गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् यथोचिताः ॥ वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ २ ॥
त शृण्वन् भगवतोऽभीक्ष्णमवतारकथामृतं ॥ श्रद्दधानो यथाकालमुपशांतजनावृतः ॥ ३ ॥ तत्संगाच्छनकैः संगमात्मजाया^
त्मजादिषु विमुच्येमानेषु स्वयं स्वप्नवदुत्थितः ४ ॥

देशकालादिभेदेन पुनः श्रेयाविशेषं पृच्छति ॥ १ ॥ गृहस्थस्य मुख्यं धर्मो ह्यांतरंगत्वेन प्रथमं वनस्थयति ॥ धर्मेषु तर्हि गृहस्थस्य मोक्षो न स्यादि
ति शंकितुचितः इच्छति गृहस्थ इति । तस्य मोक्षधर्मानाह ॥ गृहेष्वित्यादि यावदध्यायसमाप्ति साक्षाद्वासुदेवार्पणं यथा भवत्येवं
कुर्वन्नुपासीत ॥ २ ॥ स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा उत्थितः पुमान् स्वप्नदृष्टेषु पुत्रादिषु संगं विमुंचति तद्वत् ४

शो
मुच्येत्
त्ति

नयं प्रपंचयतिराजतइति ॥ स्वस्मानमत्तएव कथं चित्सागभोगविस्मरणादिनानाशः स्यादिति । प्राणवतामर्थवतां च नयं नित्यं अतोनर्थहेतु
त्वात्प्राणेनार्थं स्पृहा न कार्येत्याह श्लोकेति २४ नन्वेवमनर्थो ननुभवंतोपि न केचिद्विरज्यंते न च यथा मे न तुष्यंति त्वं तु कथं वै राज्ञादिकं प्रा
प्तोसि तत्राह मधुकरेति मधुमक्षिकाजगरोपपयोः ॥ नत्वोच्छयो रत्नपर्यालोचनयो मधुकाराच्छिक्षितत्राह विरागइति । ३५ । वित्तपति
हत्वाप्यन्योवित्तं हरेदित्येव ॥ ३६ ॥ अजगराच्छिक्षितमाह ॥ अनीह इति सत्ववान् धैर्यवान् ॥ ३७ ॥ पीनत्वेहेतुत्वेन यदृच्छया प्राप्तात्परितो

राजतश्चौरतः श्रेष्ठोः स्वजनात्पशुपक्षितः ॥ अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवज्जयं ॥ ३४ ॥ शोकमोहभय
क्रोधरागः लै व्यश्रमादयः ॥ यन्मूलाः स्युर्नृणां जह्यात ॥ स्पृहां प्राणार्थयोर्बुधः ॥ ३५ ॥ मधुकारमहासर्पौलो
केस्मिन्नो गुरुत्तमौ ॥ वैराग्यं परितोष्यं च प्राप्ता यच्छिक्षया वयं । ६३ ॥ विरागः सर्वकामेभ्यो शिक्षितः मे मधुव्रतात् ॥
कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिं ॥ ३७ ॥ अनीहः परितुष्टात्मा यदृच्छोपनतादहं ॥ नोचेच्छयेवहानिम
हाहिरिवसत्ववान ॥ ३८ ॥ क्वचिदल्पं क्वचिद्भूरि भुंजेन्नं स्वाद्वस्वादु वा ॥ क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित

कल

श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितं । भुंजे भुक्त्वाथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया । ४० । क्षौमं दुकूलमजिनं ची

मं.ऽ

रवल्कलमेव च वसेन्यदपि संप्राप्तं दिष्टभुक्तुष्टधीरहं । ४१ ॥ क्वचिच्छये धरोपस्थे तृणपर्णाश्ममस्मसु ॥ क्वचित्प्रसादश
येकेकशिपौ वा परेच्छया । ४२ । क्वचित्स्नातोनुलिप्तांगे सुवासाः स्रग्लंकृतः । रथेनाश्वेभचरैः क्वापि दिग्वासा ग्रहवद्विभो
॥ ४२ ॥

षं प्रपंचयति ॥ क्वचिदल्पमिति षड्भिः । ३८ ॥ चीरं जीर्णवस्त्रखंडं वसे परिदधे दिष्टभुक् ॥ प्रारब्धभोगी । ३९ । प्रसादः मध्योपर्यंके तजो ।
पिकश्यपोतु[illegible]लिकायां चरे विचरामि । ४ ॥ ४० । क्वचित गृहवद्दिगंवरो विचरामि ॥ ४२ ॥

ना०ग०स०
५८

एवं चेत्तेनेश्वरो वशीकृतः स्यादित्याह ॥ यदर्थे यन्निमित्तं अन्यैरजितोपीश्वरस्तेन जित एव ननु कथमेवं स्यां स्वत्वाभिमानो हातुं शक्य
त्वाविचारणेत्याह १२ कृमिविड्भस्मनिष्ठापर्यवसानमस्येयस्य तदीहायो रतिर्यस्यां सा स्वमहिम्ना नभोपि छादयतीति तथा कि
च १३ सिद्धैर्देवलब्धैः यज्ञावसिष्टार्थैः ॥ पंचयज्ञशेषैः ॥ अन्नादिभिः स्युः महतां निरक्तानां रातद्धिरेवनाह ॥ १४ देवादीनां च यज्ञदे
वताः ॥ आत्मानं च एवं पृथक् ॥ अंतर्यामिणमेव यजेत ॥ न पुनरतिनिर्वेधा यज्ञार्थकार्य इत्याह नहीति विप्रमुखे हुतैरन्नादिभिः ॥ य

जह्याद्यदर्थे स्वान्प्राणान्हन्याद्वा पितरं गुरुं ॥ तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः १२ ॥ कृमिविड्भस्मनिष्ठांतं क्वे
दं तुच्छकलेवरं क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १३ सिद्धैर्यज्ञावसिष्टार्थैः कल्पयेद्वृत्तिमात्मनः ॥ शेषे स्वत्वं
त्यजन्प्राज्ञः ॥ पदवीं महतामियात् ॥ १४ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं ॥ स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृ
थक् १५ ॥ यर्ह्यात्मनोधिकाराद्याः सर्वाः स्युः यज्ञसंपदः ॥ वैतानिकेन विधिना अग्निहोत्रादिना यजेत् ॥ १६ ॥ न ह्यग्नि
मुखतोयं वै भगवान्सर्वयज्ञभुक् ॥ इज्येत हविषा राजन् यथा विप्रमुखे हुतैः ॥ १७ ॥ तस्माद्ब्राह्मणदेवेषु मर्त्यादि
षु यथार्हतः ॥ तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु १८ ॥

द्यार्ह्य्यपेत एव्यपेतन तथा अग्निमुखतो हविषा इज्येत १७ ब्राह्मणेषु देवेषु च पंचयज्ञदेवतासु मर्त्यादिषु अन्येष्वपि नरेषु पश्वादिषु
क्षेत्रज्ञं अंतर्यामिणं ब्राह्मण ॥ ननु मृत्यादि यजनेन ब्राह्मणादीनां अनंतरमन्येषु यजनं पात्रं तारे ब्राह्मणा आननं यस्य तं ॥ १८ ॥

नन्वेवंभूतस्य कुटुंबेनाभिभूयमानस्य कुतो गृहोचिताः क्रियास्युस्तत्राह ॥ यावदर्थमिति अंतरनासक्तः बहिरासक्त इव नृलोके जनमध्ये नरतां मानुष्यं न्यसेत ॥ पुरुषकारं नाविःकुर्यादित्यर्थः । आग्रहं तु क्वापि न कुर्यादित्याह ॥ ५ ॥ ज्ञातय इति नन्वेवं सर्वानुमोदनेन वित्तव्यय प्रसंगात् कुतो जीवनं कुतो वा कर्मकरणं तत्राह ॥ ६ ॥ दिव्यं वृष्ट्यादिभिः जातं धान्यादि भौमं निधानादि अन्तरिक्षं अकस्मादेव प्राप्तं एवं स्वत एव अच्युतनिर्मितं योऽसौ विश्वंभरो देवः । कथं भक्तानुवृत्ते देवात् ॥ तत्स्वैरीतिकं कर्मादि देवाद्दुरिलाभे जाते पितद्वाभिमानो न कार्यमित्याह

यावदर्थमुपासीनो देहे गेहे च पंडितः ॥ विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत ॥ ५ ॥ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ॥ यद्वदंति यदिच्छंति चानुमोदेत निर्ममः ॥ ६ ॥ दिव्यं भौमं चांतरिक्षं वित्तमच्युतनिर्मितं ॥ तत्सर्वमुपभुंजान एतत्कुर्यात्स्वतो बुधः ॥ ७ ॥ यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनां ॥ अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति ॥ ८ ॥ मृगोष्ट्रखरमर्काखुसरीसृप खगमक्षिकाः आत्मनः पुत्रवत्पश्येत्तैरेषामंतरं कियत् ॥ ९ ॥ त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि ॥ यथादेशं यथाकालं यावद्दैवोपपादितं ॥ १० ॥ आश्वाघांतेवसायिभ्यः कामान्संविभजेद्यथा ॥ अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ११ ॥

॥ ७ ॥ यावदिति भ्रियेत पूर्येत अत एव यं कमपि स्वगृहं स्तेत्रं वा प्रविश्य भुंजानं न निवारयेदित्याह । मृगेति मर्को मर्कटः सरीसृपः सर्पमक्षिकास्ते तैः पुत्रैः । एषां मृगादीनां ॥ ९ ॥ अतिकृच्छ्रेणायासेन त्रिवर्गेन भजेत किंतु यावद्दैवोपपादितं प्रापितं तावदेव भजेत ॥ १० ॥ श्वान श्वआघाश्च पतिताः । अंतेवसायिनश्चांडालादयः । तानभिव्याप्य यथार्हं कामान्संविभजेत् स्वभोगपात विभज्य दद्यात ॥ यद्वाद्येकैवात्मनो दाराभार्या तस्यामतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्यां च नृणां स्वत्वग्रह ममेवेयमित्याग्रहः । तामेकामपि संविभजेत ॥ अतिथ्यादिशुश्रूषणे नियुंजीतेत्यर्थः ॥ नन्वन्यथा मंतव्यं यथाहं संविभजेदित्युक्तत्वात ॥ ११ ॥

ना० स०

५८

कर्म्मादि आत्मनो यन्नदीत्यादि प्रेत संस्थापाहनादिमृताहश्च सांवत्सरिकः। यदा अन्यस्मिन्नपि श्रद्धादाये पैत्रकर्मणि श्रेयः कुर्यादित्यनुषं
गः। २८॥ यत्र यस्मिन्देशे सर्वमेतच्चराचरमिति तस्य भगवतो विश्वरूपसत्ता। योयत्र लभ्यते सर्वपुण्यतमो देशः। २९। अर्हंते मेरा श्रितानि
सीतादियाराम वाश्रमश्रादि येषां द्वयो पृथक्। ग्रहण वियोगकालाभिप्राये। ग्राम्यश्चोश्रितांश्च स्थिरप्रतिमास्थिताः एवं शालग्रा

संस्कारकालेर्डयीयाया अपत्यस्यात्मनस्तथा॥ प्रेतसंस्थाम्र ताहश्च कर्मणभ्युदये नृप॥ ३१॥ अथ देशान्प्रविक्ष्यामि
धर्मादिश्रेय आवहान। सर्वपुण्यतमो देशःसत्पात्रं यत्र लभ्यते॥ ३०॥ बिंबं भगवतो यत्र सर्वमेतच्चराचरं॥ यत्र ह ब्राह्मणकुलं त
पोविद्यादयान्वितं॥ ३१॥ यत्र यत्र हरेरर्चा स देशः श्रेयसां पदं॥ यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः॥ ३२ सरांसि पुष्करा
दीनि क्षेत्राण्यर्हाश्रितान्युत॥ कुरुक्षेत्रं गयशिरः प्रयागं पुलहाश्रमं॥ ३२॥ नैमिषं फाल्गुनं सेतुः प्रभासोथ कुशस्थ
ली॥ वाराणसी मधुपुरी पंपा बिंदुसरस्तथा॥ ३४ नारायणाश्रमो नंदा सीताराम आश्रमादयः॥ सर्वे कुलाचलाराजन्महें
द्रमलयादयः एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये॥ एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः॥ धर्मो ह्यत्रेहितः पुंसां
सहस्राधिफलोदयः॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः॥ ३५ हरिरेवैक उर्वीशः यन्मयं वै चराचरं॥ देवैर्हंतसुरैर्युक्ते

मशिलाद्यर्चनदेशान्तः इत्ययोनरूत्यं ३६ विष्णु ब्रह्मात्मजादिषु राजन यदश्रपूजायामतः पात्रतयाच्युतः॥ ३७॥ अत्रएषु सीताया
रामस्य वाप्याश्रमादि यत्र द्वयोः। पृथक् ग्रहण वियोग कालामभिप्रायेण ३३। इहितः कृतसहस्रगुणामधिक स्पन्दयो यस्मात्सतथा
॥ ३५ हरिरेवैकपात्रं निरुक्तं निर्णीतं तद्देवाह। देवेषु च ऋषिषु च अर्हत्सु च तपायोगादि सिद्धिब्रह्मात्मजादिषु सनकादिष्वपि सत्सु
तत्र ब्रह्मदायेराजसूये यद्यस्मादच्युत एव पात्रतयासंमत ३७॥

५८

पोष्ठपदे नाड्पदे ।१९। शुक्लपक्षेऽ पा रूपलक्ष्मी तृतीयामित्यर्थः ॥ हेमंते शिशिरे इति मार्गशीर्षो हिमाख्यस्तु ग्रन्थेऽपि यस्तिस्त्वस्ति स्वो सृका ।२२।
त्तामु संपर्शं चंद्रापौर्णिमा राकान्यतं चंद्रसे वानुमतिः ॥ तयामासर्क्षेण तत्तन्मासनामप्रवृत्तिनिमित्ता ॥ निनेहृत्राणि युतानि पदास्फुः तरो
तद्धृत्रिकाड्रीपुष्ययुक्ता पौर्णमासी पौषीत्यर्थः ।२३। मासे तु यत्र सनाम्ना मासयो मो वाघाष्ठैव मेकादशा परइति । अनुराधा श्रवण
उत्तराफाल्गुनी उत्तराभाद्रपदा द्वादश्यो यदा स्यात् आसूत्तरासु एकादशी वा यदा स्यात ॥ तदा च जन्मर्क्षं श्रोणयोगयुग ॥ जन्मनक्षत्र

कुर्याद्दर्पपरपक्षीयं मासि प्रोष्ठपदे द्विजः । श्राद्धं पित्रोर्यथावृत्तं तद्धनानां च वित्तवान् ॥१९॥ अयने विषुवे कुर्याद्व्यतीपाते दिन
क्षये । चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च ॥२०॥ तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके च तथाष्टकासु हेमं
ते शिशिरे तथा ॥२१॥ माघे च सितसप्तम्यां मघाराकासमागमे ॥ राकया चानुमत्या वा मासर्क्षाणि युतान्यपि ॥२२॥ द्वादश्या
मनुराधास्याच्छ्रवणास्तिस्र उत्तराः ॥ तिसृष्वेकादशी चासु जन्मर्क्षश्रोणयोगयुक् ॥२३॥ एतेऽश्रेयसः कालान्नृणां श्रेयो
विवर्धनाः । कुर्यात्सर्वात्मनैतेषु श्रेयो मोघं तथायुषः ॥२४॥ एषु स्नानं तपो होमो जप्तं देवद्विजार्चनं ॥ पितृदेवद्विजातिभ्यो
यद्दत्तं तद्ध्यनश्वरं ।२६॥

स्पृश्य श्रवणस्य वा योगे तदुक्तं जन्मदिनं यदा योगग्रहणासंबंधं वा उत्पार्थे न केवलं श्रेयसे वैते कालाः किंतु आ
त्मने मात्रुषत्याह । तमेतयुतद्वाभ्यां तदेवायुषः । अमोघं साफल्यमित्यर्थः ॥२६॥ संस्कारकाला इति यायाः पुंसवनादि । अपत्यस्य जात॥

वै

ततः पंचदशे सर्ववर्णाश्रमनिबंधनं सारतः संग्रहेणायं वर्ण्यते मोक्षलक्षणं ॥१॥ सर्वेषामपि मोक्षधर्माणां सारसंग्रहार्थमध्यायारंभः तत्र प्रसंगागतान् विशेषानाह कर्मनिष्ठा इति ॥ स्वाध्यायादिषु परिनिष्ठिता इति शेषः ॥१॥ कव्यानि पितॄनुद्दिश्य देयानि दैवे च हव्यान्यपि तस्मै देयानि यथार्हतः इति सर्वत्र ज्ञानादितारतम्येन ॥२॥ ननु विस्तरतः कुतः श्राद्धं न विधीयते तत्राह ॥३॥ स्वजनानामर्पणात् । आमालाचेन्नि

श्रीनारद उवाच ॥ कर्मनिष्ठा द्विजाः केचित् । तपोनिष्ठा नृपापरे स्वाध्यायेन्ये प्रवचने ॥ केचिज्ज्ञानयोगयोः ॥१॥ ज्ञाननिष्ठाय देयानि कव्यान्यानंत्यमिच्छता ॥ दैवे च तदभावे स्यादितरेभ्यो यथार्हतः ॥२॥ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि श्राद्धे कुर्यान्न विस्तरं ॥३॥ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानि च सम्यग्भवंति नैतानि विस्तरात्स्वजनार्पणात् ॥४॥ देशे काले च संप्राप्ते मुन्यन्नं हरिदैवतं ॥ श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं ॥ देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ॥५॥ अन्नं संविभजन्पश्येत्सर्वं तत्पुरुषात्मकं ॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्ववित् ॥ मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥७॥ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छतां न्यासो दंडस्य भूतेषु मनोवाक्कायकर्मभिः ॥८॥

मन्यते तत्रापि श्राद्धादयः कथं । बहुपात्रेष्वेवं प्राप्तविस्तारादित्यर्थः मुन्यन्नं आरण्यं व्रीह्यादि हरिदैवतं हरये निवेदितं ॥५॥ पुरुषात्मकं ईश्वररूपं ॥६॥ दंडन्यासः हिंसायास्त्यागो यः एतादृशो योनास्ति ॥८॥

संमत्वे हेतुमाह । जीवराशिभिर्व्याप्तो ब्रह्मांडकोश एव योंघ्रिपो महान् तन्मूलत्वादच्युतेज्या सर्वजीवानामात्मनश्च तर्पणं ।३६। रातदेवपुरुषनामनिरुक्तिमाह इति । पुराणीति नृतिर्यगादिरूपाणि पुराणि तेषु तया निरूपेणात्मांशेन शेते च यतः । शेतेऽतः पुरुष इति प्रसिद्धः ।३७। तारतम्येन तिर्यगादिषु पुरुषो यस्मादधिकेन वर्त्तते तस्मात्पुरुषः ॥ पात्रं तथापि यावानात्मा ज्ञानांशः । यथा तथा तपआदिर्येन यत्र प्रतीयते तथा तथासौ पात्रमित्यर्थः । तथा च श्रुतिः पुरुषत्वेवाविस्तरामात्मेत्यादि ।३८। तर्हि प्रतिमा शेहरेः पूजा किमिति कुर्वंतीत्यत्रा

जीवराशिभिराकीर्ण अंडकोशांघ्रिपो महान ॥ तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ॥३६॥ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ॥ शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ।३७॥ तेष्वेव भगवान्राजंस्तारतम्येन वर्त्तते ॥ तस्मात्पात्रं हि पुरुषो यावानात्मा यथेज्यते ॥३८॥ दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप त्रेतादिषु हरेरर्चा क्रियायै कविभिः । कृता ।३९॥ ततोर्चायां हरिं केचित् संश्रद्धाय सपर्यया ॥ उपासत उपास्तापि नार्थदा पुरुषद्विषां ॥४०॥ पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुं ॥४१॥ नन्वस्य ब्राह्मणा राजन् कृष्णस्य जगदात्मनः ॥ पुनंतः पादरजसा त्रिलोकीं दैवतं महत ।४२॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्दशोऽध्यायः ॥१४॥

। दृष्ट्वेति द्वाभ्यां मिथोऽवज्ञानमसत्मानस्तस्मिन्नात्मावुद्धिर्येषां भावं दृष्ट्वा क्रियायै पूजार्थं हरिमुपास्तेः ।४०। हरिमुपासिता अपि पुरुषद्वेषिणः अर्थदा न भवंति पुरुषे द्वेषं हित्वा चिंतोपासीत सोपि मंदाधिकारिणां पुरुषार्थः । पुरुषेष्वेव जात्या तपआदिभिश्च पुनर्विशेषांतरमाह ।४१। पुरुषेष्वपीति यो धत्ते तासुपात्रं विदुः एतदेव कैमुत्यन्यायेन दृढ इति नन्वस्येति सक्तं ब्राह्मणे नन्वागच्छतीत्यर्थः ।४२॥ इति

ना॰गा॰स॰ उपानहौ पादयोर्यस्य स उपानत्पात् तस्य गृहपालः श्वा तद्वदाचरति ॥१८॥ क्षुत्तृड्भ्यां च उनकामस्यान्तं याति अनीहकाति रिक्तकामां
६२ वा तराभौत । क्रोधस्य चान्तं याति । एतस्य क्रोधस्य फलं संहिंसा तस्योदयान्निष्पत्तेः । दिशो जित्वापि भुक्त्वापि लोभस्य नैवान्तं यातीत्यर्थः

संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखं कुतस्तत्कामलोभेन धावतोर्थेहया दिशः ॥१६॥ सदा संतुष्टमनसः सर्वाः शिवमया दिशः शर्कराकंटकादिभ्यो यथोपानत्पदः शिवं ॥१७॥ संतुष्टः केन वा राजन्न वर्तेतापि वारिणा । उपस्थ्यजिह्वाकार्पण्यात् गृहपालायते जनः ॥१८॥ असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशः स्रवंतीन्द्रियलौल्येन ज्ञानं चैवावकीर्यते ॥१९॥ कामस्यांतं तु क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् जनो जाति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥२०॥ पंडिता बहवो राजन्बहुज्ञाः संशयच्छिदः सदसस्पतयोप्येक ॥ असंतोषात्पतंत्यधः ॥२१॥ असंकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् ॥ अर्थानर्थेक्षया लोभं भयं तत्त्वाविमर्शनात् ॥२२॥ आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया ॥ योगांतरायान्मौनेन हिंसां कायाद्यनीहया ॥२३॥

वि॰ २० इदानीं कामादिजयोपायमाह । असंकल्पादिति चतुर्भिः २२ युयेदिति यथापेक्षमलेति । अर्थानर्थदर्शनेन । तत्त्वावमर्शनात् । अद्वैतानुसंधानेन २१ आन्वीक्षिक्या आत्मनात्मविवेकेन महतां सात्विकानां सेवया योगस्यांतराया लोकवार्तादीन् २३ ॥ ६२

अतएवोत्तमाधिकारिणो वाह्यानि कर्माणि त्यक्तुं तीत्याह ॥ एकेऽत्र नेहा निषेधमाः ज्ञानदीपिते आत्मस्फूर्तिमति आत्मसंयमने जुह्वति
मृतो ऽस्मिन्नप्यदंतराय तयात्यक्तेतीत्यर्थः ॥ १९ ॥ तदुक्तं सर्वेद्वेस्वरक्तैः । प्रतिस्फूर्तेरतिस्फूर्ति स्त्वनु निष्ठाविघातकं संलक्ष्य संत्यक्त्वेल्के
मेत्यक्तेतावि घ्नहतोन्यथेति ॥ माएवधर्मं विहन्यादितिकुतः अकरणात् तत्कुतः असुलभत्वात् तथैकः ततकिमत आत्मतत्वाननिष्ठ
अतज्ञाः । तथाचश्रुति नतंविदाथ यइमाजजानान्यत युष्माकमंतरंबभूव नीहारेणप्रावृत्ताजल्पाचासुतृपउक्थशासश्चरंतीति ॥ २० ॥

एकेकर्मभयानयज्ञान् ज्ञानिनो यज्ञवित्तमाः ॥ आत्मसंयमने नीहाजुह्वतिज्ञानदीपिते । १९ ॥ इज्यायज्ञैर्येस्तमाराध्य
स्यामूतानिविभूति ॥ एषमाकरणोहन्यादतज्ञोप्यसुलभध्रुवं ॥ २० ॥ तस्मादेवोपपन्नेन मुन्यन्नेनापि धर्मवित् । संतुष्टो
हरहकुर्यान्नित्यनैमित्तिकाःक्रियाः ॥ २१ ॥ विधर्मः परधर्मश्च आभासनुपमाच्छलः ॥ अधर्मः शाखाः पंचेमाधर्मज्ञोध
र्मवत्त्यजेत् ॥ २२ ॥ धर्मबाधोविधर्मश्च स्मातपरधर्मोन्यचोदितः ॥ उपधर्मस्तुपाखंडोदंभोवाशाखभिच्छलः ॥ २३ ॥ यस्त्वि
च्छयाकृतःपुंभिःराभासोह्याश्रमात्पृथक् स्वभावविहितोधर्मः ॥ कस्यनेष्टः प्रशांतये ॥ २४ ॥ धर्मार्थमपि नेहेतयात्रा
र्थंवाधनोधनं ॥ अनीहानीहमानस्य महाहेरिववृत्तिदाः ॥ २५ ॥
परस्तुतमनुवर्तयतीतितस्मादितिअधर्मवत्ताह ॥ निषिद्धवत्
कर्मभमनात्पंचापिव्याचष्टे ॥ २२ ॥ धर्मबाधः धर्मबुद्ध्यापियस्मिन्कृपमाणेस्वधर्मबाधः अन्यस्यचोदितोन्यपरधर्मः उपमेतियोच्यते
उपधर्मस्त्विति शास्त्रस्यमितनेदः । अन्यथाव्याख्यातंयस्मिन् ॥ यथोदशावरान् जोऽयेदित्युक्ते दशाभ्योवरानितिशब्दभित् । शास्त्रदितिपा
के । धर्मशब्दमात्रं विभर्तीति । तथा गांदद्यादित्युक्तेमरिष्यंत्यागोःदान् ॥ २३ ॥ स्वधर्मानुष्ठानानंतरं धर्मभूस्त्वात्पृ मपिपरधर्मोनानु
ष्ठेयः अनुपयोगादित्याह । स्वभावविहितइति । २४ । किंच अधनोधनार्थं धनेनेहेतनापेक्षत धर्मार्थं न प्रयतेत तच्चदैवोपनेनेवस्वधर्मो

नाग० स०
६२

एतदेव दृष्टांतेनाह ॥ यथा वार्त्तादयः कृष्याद्यः ॥ अर्थास्तत्फलानि च ॥ योगस्यार्थं मोक्षं न साधयंति ॥ प्रस्तुत अनर्थाय संसा
रायैव असतो बहिर्मुखस्येष्टापूर्त्तोऽपि तथा । एवं योगं युंजतोऽपि यस्य कुटुंबादिसंयोगेन । चित्तं विक्षिप्येत तस्य कृत्यमाह । २९ । य
श्चित्तस्य विजये प्रयत्नेन युक्तः ॥ स भिक्षुः स्यात् संगमसेत ॥ तथा च स्मृतिः । ध्रुवाहतस्य गार्हस्थ्ये ध्यानभंगादिकारणं लक्षयित्वा गृ
ही स्यष्टसन्नास्य सद्विचारयन्निति भिक्षया आत्मनि । मितमशनं यस्य ॥ ३० । स्वदेशे सममंगं यस्य सः । सुखं यथा भवत्येव मासीत ते

यथा वार्त्तादयो ह्यर्था योगस्यार्थं न बिभ्रति ॥ अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथासतः ॥ २९ ॥ यश्चित्तविजये यत्तः
स्यान्नि ःसंगोऽपरिग्रह ॥ एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ॥ ३० । देशे शुचौ समे राजन् संस्थाप्यासनमात्मनः ।
स्थिरं सुखं समं तस्मिन्नासीतर्ज्वंग ओमिति ॥ ३१ ॥ प्राणापानौ संनिरुध्यात्पूरकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्का
मान् स्वनासाग्रनिरीक्षणः ॥ ३२ ॥ यतो यतो निःसरति मनः कामहतं भ्रमत् ॥ ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बु
धः ॥ ३३ ॥ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यते ॥ अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ॥ ३४ । कामादि
भिरनाविद्धं प्रशांताखिलवृत्ति यत् ॥ चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३५ ॥ यः प्रव्रज्य गृहात्पूर्वं त्रिव
र्गावपनात्पुनः ॥ यदि सेवेत तान्भिक्षुः स वै वान्ताश्यपत्रपः ॥ ३६ ॥

मित्युच्चारयन्निति शेषः । ३२ ॥ एवमनिश
मभ्यसतस्तस्य यतेश्चित्तं निर्वाणं शांतिं याति न च पुनर्विक्षिप्येतेत्याह ॥ ३४ । कामादिभिरस्पृष्टं नित्यं यच्चित्तं नोत्तिष्ठेत ॥ यतः प्रशांता
स्वखिलावृत्तयो यस्य कुतः ॥ ब्रह्मसुखेन स्पृष्टं यस्तु प्रव्रज्यां कृत्वापि भोगलिप्सुः स्यात्तं निंदति । ३५ ॥ य इति त्रयाणां धर्मादीनां व
र्गः । आसमंतादुप्यते यस्मिन् तस्मा-द्गृहाणात् । तान् धर्मादीन् वांताशी छर्दितभोजी निर्लज्जश्च सः । ३६ ॥

त
त
६२

येभ्यो भूतेभ्यो भयं जायेत तेष्वेव कृपया हिताचरणेन दैवोपसर्गनिमित्तं ॥ दुःखं मनःपीडादि ॥ तदुक्तं पावके नविमना विफलारंभ
संसीदत्यनिमित्ततश्चेति । आत्मजं देहजं योगवीर्येण प्राणायामादिबलेन सत्वनिषेवया सात्विकाहारादिना ॥ २४ ॥ ननु कथं गुरो
र्नत्यासर्वं स्वजयः स्यात्तस्यापि मनुष्यत्वेन तद्वस्थत्वात् ॥ तत्राह ॥ २६ ॥ यस्येति मर्त्यासद्धीः मनुष्य इति दुर्वुद्धिः तस्य श्रुतं श्रवणं
कुंजरस्नानवद्व्यर्थं ननु गुरोरपि पुत्रादयस्तेन नरमेनं मन्यंतो अत आह एष गुरुः । साक्षाद्भगवान् एव लोकस्य विति बुद्धिरित्यर्थः ।

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना ॥ आत्मजं योगवीर्येण निद्रां सत्वनिषेवया ॥ २४ ॥ रजस्तमश्च सत्वे
न सत्वं चोपशमेन च ॥ एतत्सर्वं गुरो भक्त्या पुरुषो ह्यंजसा जयेत ॥ २५ ॥ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ।
मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् ॥ २६ ॥ एष वै भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ योगेश्वरैर्विमृ
ग्यांघ्रिर्लोको यं मन्यते नरं ॥ २७ ॥ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः । तदंता यदि नो योगानावहे
युः श्रमावहा ॥ २८ ॥

तिरित्यर्थः ॥ यद्वा पिनहितत्सुवादेर्मनुष्यवुध्याप्रतीयमानोपि गुरुर्भगवानेव भवेत ग्रंथे श्रीकृष्ण इत्यर्थः । एवं सर्वैरुपायैः
कामादिवेगं जित्वा निर्जितेंद्रियो भूत्वा ध्यानपरो भवेत ॥ अन्यथा तं प्रति सर्वशास्त्रवैफल्यं स्यादित्याह ॥ २७ ॥ षड्वर्गेति सर्वा अपि
नियमचोदना इष्टापूर्तादिविधयः । षडिंद्रियवर्गस्य यः संयमः । तस्मिन्नेवैकस्मिन्नेकांते यासां ता तदेकपरा इत्यर्थः । न तु तावता
पि चरितार्था इत्याह ॥ तदंता संतोपि यदि योगान् ध्यानधारणासमाधीन्नो आवहेयु न साधयेयुः । तर्हि केवलं श्रमं चेहा एव

ग

॥ २८ ॥
श्रीः

रागादयो जेतव्याः शत्रवः ॥४३॥ तत्र रजोभिनिवेशः क्वचित् आरूढसमाधेः ॥ सत्वप्रकृतयोपि परोपकारादि प्रवृत्ताः शत्रवः ।४४। नृ
कायरूपं रथं आत्मवशत्तुपकल्पं इंद्रियादि परिकरो यस्मिन् । तथाभूतं यावद्दे वर्त्तेत तावद्गरिष्ठानां चरणार्चनया निशितं ज्ञानख
ड्गं धत्ते अच्युताश्रयः सन् निरस्तशत्रुरुपशांतः । स्वानंदेन तुष्टो भूत्वा इदं रथादिकमुपेक्षेतेत्यर्थः ॥ अच्युताश्रयाभावे बाधकमाह

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानोवमानोसूयाच माया हिंसा च मत्सरः ॥ रजः प्रमादः क्षुन्निद्रा शत्रव एवमादयः ॥ र
जस्तमःप्रकृतयः सत्वप्रकृतयः क्वचित् ४४ ॥ यावन्नृकायरथमात्मवशोपकल्पं धत्ते ॥ गरिष्ठचरणार्चनया निशा
तं ज्ञानासिमच्युतबलो दधदस्तशत्रुः ॥ स्वानंदतुष्ट उपशांत इदं विजह्यात् ॥४५॥ नो चेत्प्रमत्तमसदिंद्रियवाजिसू
तं नीत्वोत्पथं विषयदस्युषु निक्षिपंति ते दस्यवः ॥ सहयसूतममुं तमोंधे संसारकूप उरुमृत्युभये क्षिपंति ४६ ॥ प्रवृत्तं च
निवृत्तं च द्विविधं कर्म वैदिकं ॥ आवर्त्तते प्रवृत्तेन निवृत्तेनाश्नुतेमृतं ॥४७॥ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांतिदं ॥ दर्शश्च पूर्ण
मासश्च चातुर्मास्यं पशुः सुतं ४८ ॥ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ॥ एतत्सुरालयारामकूपाजीव्यादिलक्षणं ॥४

९॥ नो चेदिति असंतो बहिर्मुखा ये इंद्रियवाजिनः ॥ सूतश्च तेन उत्पथं प्रवृत्तिमार्गे नीत्वा विषया एव दस्युषु निक्षिपंति हि ये सूतेन च
सह वर्त्तमानं तमोंधे तमसांधे उरुमृत्युभयं यस्मिन् ननु च वेदविहिते प्रवृत्तिकारिणः पुंसः कथमेवमनर्थप्राप्तिः स्यादित्याशंक्य
वेदोक्तकर्मणां द्विविधं दर्शयन् फलमाह ॥ प्रवृत्तं चेति द्वाभ्यां ॥४६॥ हिंस्रसेनादिकर्म ॥ अशांतिदं अतृप्ताचासक्तियुक्तं त्र्यादिशास्त्रार्थं ।
विवरणं दर्शश्चेति पशुः पशुयागः सर्वसोमयागः ॥४७। हुतं वैश्वदेवं प्रहुतं बलिहरणं एतत्सर्वं मिष्टमुच्यते ॥ एतदेव यदि काम्यं

प्र

प्रवृत्तेन

ते

न चेदमघटितं दृष्टत्वादित्याह एवं स्वदेह अनात्मादिरूपः स्मृतः चिंतितः त एव पुनरेनमात्मेति मत्वा श्लाघ्यंति स्तावयंति हि यति-
मुपलक्षणीकृत्य गृहिणोपि स्वधर्मत्यागिनो निंदति गृहस्थस्येति द्वाभ्यां ३६ ॥ नन्वात्मतत्त्वज्ञस्य भिक्षोरिंद्रियलौल्येपि को दोषस्तत्राह आत्मा-
नं परं ब्रह्मेति ॥ जानीयात ॥ ज्ञानेन धुता निरस्ता आशया यस्य ॥ वासना यस्य तस्य ज्ञानिनो लौल्यमेव न संभवतीत्यर्थः । तथा च श्रुतिः । आत्मानं चेद्विजा-
नीयादयमस्मीति पुरुषः । किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति ॥ अज्ञस्य तु लौल्येन नरकपातापतेरप्रमत्तेन सदा तत्त्वज्ञाने यता-
तितव्यमिति ॥ ममार्थे आत्मानं रथिनं विद्धि शरीरं रथमेवेत्यादिश्रुत्युक्तं रथरूपकं धारणाह । आहुरिति षड्भिः ॥ ४० इंद्रियेशं मनो अभि-

यः स्वदेहः स्मृतोनात्मा मर्त्यो विट्कृमिभस्मसात ॥ त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ॥ ३७ ॥ गृहस्थस्य क्रियात्यागो
व्रतत्यागो वटोरपि ॥ तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलोलता ॥ ३८ ॥ आश्रमापसदा ह्येते खल्वाश्रमविडंबकाः । देव-
मायाविमूढांस्तानुपेक्षेतानुकंपया ॥ ३९ ॥ आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः । किमिच्छन्कस्य वा हेतोर्देहं
पुष्णाति लंपटः ॥ ४० ॥ आहुः शरीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रियेशं वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्-
बंधुरमीशसृष्टं ॥ ४१ ॥ अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवं धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव
लक्ष्यं ॥ ४२ ॥

मौर्वीह । मात्राः शब्दादीन् वर्त्मानि गंतव्यदेशान् अंकुसत्त्वं चित्तं बृहत् देहव्यापि बंधुरं बंधनं चित्तं विना देहस्य निबद्धमिव धारी-
भवति ॥ ईशसृष्टमिति । वध्यकर्तृत्वे नेश्वरस्येत्यर्थः ॥ ४१ ॥ प्राणादयः पंच नागः कूर्मः कृकलो देवदत्तो धनंजयश्चेति दश प्राणा विध-
प्राणमहि अभिमानस्य हकारो जीवं रथिनं स्फुटं जीवं शरं परं ॥ ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्म-
णि एकीक्रियते इत्यर्थः ॥ ४२ ॥

को

कि

र्निर्मैर्दिशिनादिसंकल्परूपे मनसि वैकारिकं ॥ विकारयुक्तं मनो वा विविद्यास्विलक्षणयावाचा हि मनकर्तृत्वाद्धि विकारं भवति वर्णानां
समाम्नाये समुदाये ॥ तद्विशेषत्वाद्भावः स्वरे अकारादि स्वरत्रयात्मके ॥५२॥ ओंकारं बिन्दौ तं च नादे प्राणे सूत्रात्मनि महति ब्रह्मणि प्रकृतौ
न्यग्नि रिति तत्तदभिमानि ॥ नोदेवताः ताः प्राप्नोतीति ॥ एवं व[illegible]दिवाहः प्राह्णः कुत्सस्पेवातः राका शुक्लपक्षस्यांताः ॥ यद्वा प्राह्णो राकेति
च [illegible]ति च पुराणमतं उत्तरं उत्तरमयनं स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह ॥ विश्वमति विश्वस्थूलो
पाधिं स्थूलं सूक्ष्मे प्रविलाप्य सूक्ष्मोपाधिस्तैजसो भवति ॥ सूक्ष्मं च कारणे विलाप्य कारणोपाधिः ॥ प्राज्ञो भवति कारणं च सर्वेमां

इंद्रियाणि मने सपूर्मो वा विवैकारिकं मनः ॥ वाचां वर्णसमाम्नाये तमोंकारे स्वरे न्यसेत् ॥५३॥ ओंकारं बिन्दौ नादे तं तं तु प्राणे
महत्यमुं ॥ अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् ॥५४॥ विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ देवया
नमिदं प्राहुः भूत्वा भूत्वानुपूर्वशः ॥५५॥ आत्मयाजी उपशान्तात्मा ह्यात्मस्थो न निवर्तते ॥ य एते पितृदेवानाम् अयने वेदनिर्मि
ते ॥५६॥ शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥ आदावन्ते जनानां सद्बहिरन्तः परावरं ॥५७॥ ज्ञानं ज्ञेयं वचो वाच्यं तमो
ज्योतिस्त्वयं स्वयं ॥५८॥

त्रित्वेनान्वया ॥ तासाहि स्वरूपे विलाप्य तुर्यो भवति तेषां व्यभिचारिणां लयस्तु आत्मा भवति मुच्यत इत्य
त्यर्थः ॥५५॥ [illegible] य एतेतरो भूत्वा निवर्तते तथा न निवर्तेत इत्यर्थः ॥५६॥ वेदेन निर्मिते धूममभिसंबुतीत्यादि वेदेन निश्चये
न विवेक्य ज्ञायत इत्यर्थः ॥५६॥ जनस्थो देहस्थोऽपि न मुह्यति ॥ तत्र हेतुमाह त्र्य ॥५॥ दावित ॥ जनानां देवादीनां आदौ कारणत्वेन अन्ते चा
वधित्वेन यत्सत् ॥ तथा बहिर्नोग्यं ॥ अन्तर्भोक्तृ परावरं च उच्चं नीचं तमो प्रकाशः ॥ ज्योतिः प्रकाशः ॥ तत् सर्वमयं ज्ञानी स्वयमे

ॐ

प्राइत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह ॥ द्रव्यस्य पुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहांतरारंभकं येन संपरिष्व
क्तो गच्छति । य एव सूक्ष्मतां उपशब्देनोक्तः । इति तु पंचम्यां आहुतावापः पुरुषवचसो भवंतीति पाठांतरे द्रव्यमात्रोष्मपाकश्च द्रव्यशब्देन तेजो
मात्राशब्देनोक्तानींद्रियाणि सूक्ष्मविपाकशब्देन गृह्यंते यावृप्रयोतः । तथा च श्रुतिः स इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्व
वक्रामतीति तथा तस्यैतस्य हृदयस्याग्रं प्रद्योतेन हृष एष आत्मा निष्क्रामतीति धूमादिशब्दैस्तदभिमानिन्यो देवताः संज्ञापह्नयः सूक्ष्म
पहः सोमे ॥ ४९ ॥ लोके च भुक्त्वा भोगस्यावरोहणप्रकारो दर्शयति ॥ इत्यादि दर्शयति । विपरीतलक्षणया विशेषेण नागेहयशोकाग्नि

द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः ॥ अयनं दक्षिणं सोमो वर्ग ओषधिवीरुधः ॥ ५० ॥ अन्नं रेत इति पितृया
नं पुनर्भवः ॥ एकैकस्यैवानुपूर्व्यं भूत्वा भूत्वेह जायते ॥ ५२ ॥ निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ॥ इंद्रियेषु क्रि
यायज्ञाज्ञानदोषे प्रवर्तते ॥ ५२ ॥

नाद्दे हलयेनाहं नमुच्यते एतदुक्तं भवति ॥ नूतनसूक्ष्मयुक्तो धूमाद्यभिमानिकाश्च ताभिः सोमलो
कं प्रापितस्तत्र भोगावसाने विलीनदेहो वृष्टिद्वारेण ओषधीवीरुधादि साम्यापत्तिः निष्क्रमेण जायते । एवं पुनर्भवे हेतुः ॥ ५० ॥ पितृयानं
प्रवृत्तकर्म इति स्पष्टं । अहमसते पुनर्भवमेवाह । एकैकस्येन प्रत्येकं भूत्वा तत्तत्स्थानविधिं प्राप्य इह भूमौ जायते ॥ ५१ ॥ तत्र निवृत्तिकामाधिका
रिण माह ॥ निषेकादीनि श्मशानान्तानि वैदिकाः ... लभते इत्यर्थः । निवृत्तकर्मनिरस्यापाशताविशेषमुपदिशन्न चिरादिमार्गे
ण ब्रह्मलोकप्राप्तिमाह इंद्रियेषु क्रियायज्ञेषु हिंसायां दुर्वारत्वात् निरुद्धं कर्मैव दर्शयन्नाह ॥ ज्ञाननिष्ठा प्रवर्तते इति
तथा तेषु इंद्रियव्यापाराणां मिथ्यावृत्तौ दिनानि इंद्रियतावन्मात्रतां भावयतीत्यर्थः । एवमुत्तरत्रापि ॥ ५२ ॥

ना०गा०म०
६५

ननु स्वप्ने नो भावेष्वागमापायिषु बालादिषु सोयं देवदत्त इति । ४ ॥ प्रत्यभिज्ञानं न स्यात् ॥ तदुक्तं भट्टैः आविर्भावतिरोभावधर्मकेष्वनु
पायिन । तद्धर्मानित्याह स्यादिति । ६० । वस्तुतः परमात्मनो विकल्पे भेदे असति यथा वस्तुनोऽविद्यया विकल्पे सति । एवं युवा रोपसा
दृश्यपात् सद्रूपेवेति भ्रमः स्यात् ॥ स च तावदेव यावद्विद्यानिवृत्तिः । ननु सर्वेस्मि थ्यात्वे शास्त्रविधिनिषेधता कथं तत्राह । स्वप्ने मध्येऽप्यत्व
पव्यवस्थया यायण्ये । ति इदानीमुक्तमेवाद्वैतं भावनात्रयापदेशेन दृढीकरोति भावाद्वैतमिति त्रिभिः । ६१ । वर्त्तयन्नालोचयन्स्वानुभू ।

स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः ॥ जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता । ६२ । भावाद्वैतं क्रि
याद्वैतं द्रव्याद्वैतं तथात्मनः ॥ वर्त्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः । ६३ । कार्य्यकारणवस्त्वैक्यमर्शनं पटतंतुवत् ॥ अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते । ६४ ॥ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्प्पणम् ।
मनोवाक्तनुभिः ॥ पार्थ क्रियाद्वैतं तदुच्यते ॥ ६५ ॥

त्यात्स्वात्मतत्वानुभावेन त्रीन् जाग्रदादीन त्रयः स्वापवत्त्वात् स्वप्नाः इति स्फुटे यथावस्तुभेदबुद्धिरेकः स्वप्नः ततस्ततः
दृधिकारिनिदेन कर्मनेदबुद्धिः । इति द्वितीयः ततो मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान् धुनुते निवर्त्तयति ।
६३ । कार्यकारणयोर्वस्त्वैक्यमर्शनं आलोचनं । ६४ । मनोवाक्तनुभिः । कृतानां कर्मणां समर्प्पणं तैः । समर्प्पणमिति वा
उद्देश्यफलभेदो हि क्रियाभेदहेतुः । ईश्वरार्प्पणे न च तद्भावात् क्रियाणामद्वैतं । ६५ ॥

६५

ननु लौकिकं यं एष गर्थे प्रतीतः एतेन आह ॥ अबाधितः तर्केविरोधेन सर्वतो बाधितोपि आभासः ॥ प्रतिबिंबादिः सर्वैर्वस्तुतया यथा
स्मृतः तद्वदैन्द्रियादिकं सर्वमयथार्थेन विकल्पितं न तु परमार्थतः । दुर्घटत्वात् देवाह ॥ ५९ ॥ क्षित्यादीनां पंचभूतादीनां छायापि एकापि न स्या
त्तेवन रूपे देहादिसंघातारंभपरिणामानेम ध्ये कतमोपि न भवति ॥ ६० ॥ न तावत्तेषां संघातः । वृक्षाणामिव वनम् एकदेशाकर्षणे सर्वा
कर्षणानुपपत्तेः । न ह्येकस्मिन्देशे आकृष्टे सर्वं वनमाकृष्यते न च विकारः क्षीरस्य दध्यो वयव ॥ अपि शब्दात् न परिणामोपि कृतः स किं
स्वावयवेभ्यो वारूपान्तरप्राप्तेभ्यः । पृथक् तदन्वितो वा न तावत् तत्त्वं तत्पृथक्तया अप्रतीतेः न चान्वितः स किं प्रत्यवयवं सर्वो वा नेति अं

अबाधितोपि ह्याभासो यथा वस्तुतया स्मृतः ॥ दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितं ॥ ५९ ॥
क्षित्यादीनामिहार्थानां छाया न कतमापि हि ॥ न संघातो विकारोपि न पृथङ्नान्वितो मृषा
॥ ६० ॥ धातवोवयवित्वाच्च तन्मात्रावयवैर्विना न स्युर्ह्यसत्यवयविन्यसन्नवयवोन्ततः ॥ ६१ ॥

शेन वा आद्ये आंगुलिमात्रेपि देहबुद्धिः स्यात् ॥ द्वितीयेपि तस्याप्यंशांगीकारे सत्यनवस्था स्यात् ॥ अतो मृषैव तु तदर्थः । एवं देहादेर्मिथ्या
त्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह ॥ ६० ॥ धारयतीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः । अवयविला
तेषामपि । ननु अवयवाः सत्या इति चेत् तत्राह । उक्तप्रकारेणावयविन्यसति ॥ अवयवोप्यन्ततोऽसन्नेव स्यात् अवयवविप्रतीत्यन्यथा
नुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः ॥ तदुक्तं पंचमस्कंधे एवं निरुक्तं क्षितिश ॥ ६१ ॥ ॥ श्रीराधाकृष्णाय नमः ॥

छायापि नस्या
एकदेशाना
सेत
वो

ना॰भा॰स॰७
६६

श्रीकृष्णसेवामहतामवज्ञयाच्च्यवतेति ॥ तत्कृपया च सिध्यतीति दर्शयन्स्वपूर्ववृत्तांतमाह । अहमिति सार्द्धैरिति पंचभिः ।६९॥ नाम्ना

अहं पुराभवं कश्चिद्गंधर्व उपबर्हणः ॥ नाम्नातीते महाकल्पे गंधर्वाणां सुसंमतः ।७०॥ रूपपेशलमाधुर्य
सौगंध्यप्रियदर्शनः ॥ स्त्रीणां प्रियतमो नित्यं मत्तस्त्वपुरलंपटः ॥७१॥ एकदा देवसत्रे तु गंधर्वाप्सरसां ग।
णाः उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥७२॥ अहं च गायंस्तद्विद्वान्स्त्रीभिः परिवृतो गतः ॥ ज्ञा
त्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ॥७३॥ याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥ तावद्दास्याम
हं यज्ञे तत्रापि ब्रह्मवादिनां ॥७४॥ शुश्रूषयानुषंगेण प्राप्तोहं ब्रह्मपुत्रतां ॥ धर्मस्ते गृहमेधीयो वर्णि
तः पापनाशनं ॥७५॥ गृहस्थो येन पदवीमंजसा न्यासिनामियात् ॥७६॥ ॥ श्रीराधावल्लभो जयति

उपबर्हणं ॥ पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ॥७१॥ तद्वाक्यानं विद्वन् । उन्मत्तः सन् गायते वा गतः ।७२॥ श्रीरामः

६६

आत्मनः स्वस्य जायादीनां च स्वार्थस्य कामस्य च तयोर्देहादीनां पंचमलात्मैकत्वेन भोक्तुश्च परमात्मतत्वेनानेदालोचनेनार्थकामयो पदैक्यं दर्शनमित्यर्थः ॥ उक्तानाश्रमधर्मान संक्षिप्याह ६६ ॥ यदीति यदृच्छया येनोपपन्नेन यतः । सकाशात् प्रस्तुतमुपसंहरति ६७ एतैरिति ॥ अस्य श्रीकृष्णस्य गतिं तद्भक्तिं ना कुतस्य भक्तेः ॥ ६७ एतच्च सर्वसाधारणमुक्तं भक्तस्य तु भक्तिरेव सर्वपुरुषार्थत्वेहे ।

आत्मा जायासुतादीनामन्येषां सर्वदेहिनां ॥ यत्स्वार्थकामयोरैक्यं इव्याद्धैतं तदुच्यते ॥ ६६ ॥
यद्यस्य र्चानिषिद्धं स्यादेन यत्र यतो नृप ॥ स तेनेहेत कार्याणि नरो नान्यैरनापदि ॥ ६७ ॥ एतैरन्यैश्च
वेदोक्तैर्वर्त्तमानः स्वकर्मभिः ॥ ६७ ॥ गृहेप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ॥ ६८ ॥ यथा हि यूयं नृ
पदेव दुस्त्यजादापद्गणादुत्तरतात्मनः ॥ र यत्पादपंकेरुहसेवया भवानहारषीन्निर्जितदि ।
ग्गजः क्रतून् ॥ ६९ ॥

प

तु इति ॥ वीडवा ॥ तु रिति ॥ पांडवानेव लक्ष्मी ॥ कृत्वाह यथा हीति ॥ ६८ ॥ हे नृपदेव नृपैर्देवैश्च सहायैर्दुस्त्यजादिति वाच्यात्म
नः श्रीकृष्णोदेव अमोहेतोः । श्याउ भावश्च र्वेत्कर्षैराप्युत्सवेतार्थः ॥ यथाय यथावत्तमेव भजतेति शेषः ॥ यज्ञयया ऋाप गज
णाउतीर्णत्वं तमेयाचकेदनकाषीत तयाश्रीकृष्णदेवता रकोत्संसारात् अप्युत्तरेत्यर्थः ६९ ॥

तं तु कृतार्थ एवेति हर्षेण पुनः पूर्वश्लोकानेव पठति स्वयमिति ॥ इति श्रीसप्तमस्कंधे श्रीभागवतभावार्थदीपिकायां श्रीधर
विरचितायां टीकायां पंचदशोऽध्यायः ॥ १५ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दी

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियांति ॥ येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगं
॥७५॥ स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृ
द्गुरुश्च ॥ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदता
मेष स सात्वतां पतिः ॥७९॥ श्रीशुक उवाच ॥ इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः ॥ पूजयामास सुप्रीतः कृष्ण
च प्रेमविह्वलः ॥८०॥ कृष्णपार्थावुपामंत्र्य पूजितः प्रययौ ॥ मुनिः श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥८२॥
इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः ॥ देवासुरमनुष्याद्या लोका यत्र चराचराः ॥८३॥ इति श्रीभाग
वते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे पंचदशोऽध्यायः ॥ १५ ॥ ॥ श्रीराधाकृष्णाय ॥ श्री ॥

यते ॥ संवत ॥ १८३८ मासोत्तममासे [illegible] असाढमासे शुक्लपक्षे प्रतिपद शुक्रवासरे लिपिकृतं बालकृष्णब्राह्मण लोहाजेलमध्ये